प्रथम निम्नलिखित वाक्य पढ़कर गायत्री-कवचका विनियोग करे—

ॐ अस्य श्रीगायत्रीकवचस्य ब्रह्मा ऋषिर्गायत्री छन्दो गायत्री देवता ॐ भूः

बीजम्, भुवः शक्तिः, स्वः कीलकम्, गायत्रीप्रीत्यर्थं जपे विनियोगः ।

निम्नलिखित मन्त्रोंसे गायत्रीमाताका ध्यान करे—

पञ्चवक्त्रां दशभुजां सूर्यकोटिसमप्रभाम् ।
सावित्रीं ब्रह्मवरदां चन्द्रकोटिसुशीतलाम् ।।
त्रिनेत्रां सितवक्त्रां च मुक्ताहारविराजिताम् ।।
वराभयाङ्कुशकशाहेमपात्राक्षमालिकाम् ।।
शङ्खचक्राब्जयुगलं कराभ्यां दधतीं वराम् ।
सितपङ्कजसंस्थां च हंसारूढां सुखस्मिताम् ।।
ध्यात्वैवं मानसाम्भोजे गायत्रीकवचं जपेत् ।

तदनन्तर गायत्रीकवचका पाठ करे—

ॐ ब्रह्मोवाच

विश्वामित्र! महाप्राज्ञ! गायत्रीकवचं शृणु ।
यस्य विज्ञानमात्रेण त्रैलोक्यं वशयेत् क्षणात् ।।
सावित्री मे शिरः पातु शिखायाममृतेश्वरी ।
ललाटं ब्रह्मदैवत्या भ्रुवौ मे पातु वैष्णवी ।।
कर्णौ मे पातु रुद्राणी सूर्या सावित्रिकाऽम्बिके ।
गायत्री वदनं पातु शारदा दशनच्छदौ ।।
द्विजान् यज्ञप्रिया पातु रसनायां सरस्वती ।
सांख्यायनी नासिकां मे कपोलौ चन्द्रहासिनी ।।
चिबुकं वेदगर्भा च कण्ठं पात्वघनाशिनी ।
स्तनौ मे पातु इन्द्राणी हृदयं ब्रह्मवादिनी ।।
उदरं विश्वभोक्त्री च नाभौ पातु सुरप्रिया ।
जघनं नारसिंही च पृष्ठं ब्रह्माण्डधारिणी ।।
पार्श्वौ मे पातु पद्माक्षी गुह्यं गोगोप्त्रिकाऽवतु ।
ऊर्वोरोंकाररूपा च जान्वोः संध्यात्मिकाऽवतु ।।
जङ्घयोः पातु अक्षोभ्या गुल्फयोर्ब्रह्मशीर्षका ।
सूर्या पदद्वयं पातु चन्द्रा पादाङ्गुलीषु च ।।
सर्वाङ्गं वेदजननी पातु मे सर्वदाऽनघा ।
इत्येतत् कवचं ब्रह्मन् गायत्र्याः सर्वपावनम् ।
पुण्यं पवित्रं पापघ्नं सर्वरोगनिवारणम् ।।
त्रिसन्ध्यं यः पठेद्विद्वान् सर्वान् कामानवाप्नुयात् ।
सर्वशास्त्रार्थतत्त्वज्ञः स भवेद्वेदवित्तमः ।।
सर्वयज्ञफलं प्राप्य ब्रह्मान्ते समवाप्नुयात् ।
प्राप्नोति जपमात्रेण पुरुषार्थांश्चतुर्विधान् ।।

।। श्रीविश्वामित्रसंहितोक्तं गायत्रीकवचं सम्पूर्णम् ।।

(ग) गायत्रीतर्पण (केवल प्रात:संध्यामें करे)

ॐ गायत्र्या विश्वामित्र ऋषिः सविता देवता गायत्री छन्दः गायत्रीतर्पणे विनियोगः । ॐ भूः ऋग्वेदपुरुषं तर्पयामि । ॐ भुवः यजुर्वेदपुरुषं त० । ॐ स्वः सामवेदपुरुषं त० । ॐ महः अथर्ववेदपुरुषं त० । ॐ जनः इतिहासपुराणपुरुषं त० । ॐ तपः सर्वागमपुरुषं त० । ॐ सत्यं सत्यलोकपुरुषं त० । ॐ भूः भूर्लोकपुरुषं त० । ॐ भुवः भुवर्लोकपुरुषं त० । ॐ स्वः स्वर्लोकपुरुषं त० । ॐ भूः एकपदां गायत्रीं त० । ॐ भुवः द्विपदां गायत्रीं त० । ॐ स्वः त्रिपदां गायत्रीं त० । ॐ भूर्भुवः स्वः चतुष्पदां गायत्रीं त० । ॐ उषसीं त० । ॐ गायत्रीं त० । ॐ सावित्रीं त० । ॐ सरस्वतीं त० । ॐ वेदमातरं त० । ॐ पृथिवीं त० । ॐ अजां त० । ॐ कौशिकीं त० । ॐ सांकृतिं त० । ॐ सार्वजितीं तर्पयामि । ॐ तत्सद्ब्रह्मार्पणमस्तु ।। (देवीभागवत)

* **तत्सद्ब्रह्मार्पणं कर्म कृत्वा त्रिर्विष्णुं स्मरेत् ।** (आचारभूषण)

मध्याह्न-संध्या

(प्रातः-संध्याके अनुसार करे)

प्राणायामके बाद **'ॐ सूर्यश्च मेति'** के विनियोग तथा आचमन-मन्त्रके स्थानपर नीचे लिखा विनियोग तथा मन्त्र पढ़े।

विनियोग—ॐ आपः पुनन्त्विति ब्रह्मा ऋषिर्गायत्री छन्दः आपो देवता अपामुपस्पर्शने विनियोगः* **।**

आचमन—ॐ आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम् । पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु माम् । यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम । सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहॅं स्वाहा ।

(तै० आ० प्र० १०, अ० ३०)

उपस्थान—चित्रके अनुसार दोनों हाथ ऊपर करे।

अर्घ्य—सीधे खड़े होकर सूर्यको एक अर्घ्य दे।

विष्णुरूपा गायत्रीका ध्यान—

ॐ मध्याह्ने विष्णुरूपां च ताक्ष्यर्स्थां पीतवाससाम् ।
युवतीं च यजुर्वेदां सूर्यमण्डलसंस्थिताम् ।।

सूर्यमण्डलमें स्थित युवावस्थावाली, पीला वस्त्र, शंख, चक्र, गदा तथा पद्म धारण कर गरुडपर बैठी हुई यजुर्वेदस्वरूपा गायत्रीका ध्यान करे।

---

* **सायं 'अग्निश्च मे' त्युक्त्वा प्रातः सूर्येत्यपः पिबेत् ।।**
आपः पुनन्तु मध्याह्ने ततश्चाचमनं चरेत् ।।

(भरद्वाज, ब्रह्मोक्त याज्ञवल्क्यसंहिता)

(शब्दान्तरके साथ लघ्वाश्वलायनस्मृ० ३६-३७)

सायं-संध्या

(प्रातः-संध्याके अनुसार करे)

उत्तराभिमुख हो सूर्य रहते करना उत्तम है। प्राणायामके बाद **'ॐ सूर्यश्च मेति०'** के विनियोग तथा आचमन-मन्त्रके स्थानपर नीचे लिखा विनियोग तथा मन्त्र पढ़कर आचमन करे।

विनियोग—ॐ अग्निश्च मेति रुद्र ऋषिः प्रकृतिश्छन्दोऽग्निर्देवता अपामुपस्पर्शने विनियोगः ।

आचमन—ॐ अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम् । यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अहस्तदवलुम्पतु । यत्किञ्च दुरितं मयि इदमहं माममृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा ।

(तै० आ० प्र० १०, अ० ३१)

अर्घ्य—पश्चिमाभिमुख होकर बैठे हुए तीन अर्घ्य दे।

उपस्थान—चित्रके अनुसार दोनों हाथ बंदकर कमलके सदृश करे।

सायंकालीन सूर्योपस्थान

शिवरूपा गायत्रीका ध्यान—

ॐ सायाह्ने शिवरूपां च वृद्धां वृषभवाहिनीम् ।
सूर्यमण्डलमध्यस्थां सामवेदसमायुताम् ।।

सूर्यमण्डलमें स्थित वृद्धारूपा त्रिशूल, डमरू, पाश तथा पात्र लिये वृषभपर बैठी हुई सामवेदस्वरूपा गायत्रीका ध्यान करे।

आशौचमें संध्योपासनकी विधि

महर्षि पुलस्त्यने जननाशौच एवं मरणाशौचमें संध्योपासनकी अबाधित आवश्यकता बतलायी है[१]। किंतु आशौचमें इसकी प्रक्रिया भिन्न हो जाती है। शास्त्रोंने इसमें मानसी संध्याका विधान किया है[२]। इसमें उपस्थान नहीं होता[३]। यह संध्या आरम्भसे सूर्यके अर्घ्यतक ही सीमित रहती है[४]। यहाँ दस बार गायत्रीका जप आवश्यक है[५]। इतनेसे संध्योपासनका फल प्राप्त हो जाता है[६]।

एक मत यह है कि इसमें कुश और जलका भी प्रयोग न हो[७]। निर्णीत मत यह है

कि बिना मन्त्र पढ़े प्राणायाम करे, मार्जन-मन्त्रोंका मनसे उच्चारण कर, मार्जन करे। गायत्रीका सम्यक् उच्चारण कर सूर्यको अर्घ्य दे[८]। फिर पैठीनसिके अनुसार सूर्यको जलाञ्जलि देकर प्रदक्षिणा और नमस्कार करे[९]। आपत्तिके समय, रास्तेमें और अशक्त होनेकी स्थितिमें भी मानसी संध्या की जाती है[१०]।

१-**संध्यामिष्टिं च होमं च यावज्जीवं समाचरेत् ।**
न त्यजेत् सूतके वापि त्यजन् गच्छत्यधोगतिम् ।।

२-**सूतके मानसीं संध्यां कुर्याद् वै सुप्रयत्नतः ।** (स्मृतिसमुच्चय)

३-**उपस्थानं न चैव हि ।** (भारद्वाज, आचारभूषण)

४-**अर्घ्यान्ता मानसी संध्या ।** (निर्णयसिन्धु)

५-६-**गायत्रीं दशधा जप्त्वा संध्यायाः फलमाप्नुयात् ।** (स्मृतिसमुच्चय)

७-**कुशवारिविवर्जिता ।** (निर्णयसिन्धु)

८-**सूतके मृतके कुर्यात् प्राणायाममनन्त्रकम् । तथा मार्जनमन्त्रांस्तु मनसोच्चार्य मार्जयेत् ।।**
गायत्रीं सम्यगुच्चार्य सूर्यायार्घ्यं निवेदयेत् । मार्जनं तु न वा कार्यमुपस्थानं न चैव हि ।।

(भारद्वाज आचारभूषण १०३-१०४)

९-**सूतके तु सावित्र्याञ्जलिं प्रक्षिप्य प्रदक्षिणम् ।**
कृत्वा सूर्यं तथा ध्यायन् नमस्कुर्यात् पुनः पुनः ।।

१०-**(क) 'आपन्नश्चाशुचिः काले तिष्ठन्नपि जपेद् दश ।** (आचारभूषण पृ० १०४)

(ख) आपद्यध्वन्यशक्तश्च संध्यां कुर्वीत मानसीम् । (गौतम)

पञ्चमहायज्ञ

गृहस्थके घरमें पाँच स्थल ऐसे हैं, जहाँ प्रतिदिन न चाहनेपर भी जीव-हिंसा होनेकी सम्भावना रहती है। चूल्हा (अग्नि जलानेमें), चक्की (पीसनेमें), बुहारी (बुहारनेमें), ऊखल (कूटनेमें), जल रखनेके स्थान (जलपात्र रखनेपर नीचे जीवोंके दबने) से जो पाप होते हैं, उन पापोंसे मुक्त होनेके लिये ब्रह्मयज्ञ—वेद-वेदाङ्गादि तथा पुराणादि आर्षग्रन्थोंका स्वाध्याय, पितृयज्ञ—श्राद्ध तथा तर्पण, देवयज्ञ—देवताओंका पूजन एवं हवन, भूतयज्ञ—बलिवैश्वदेव तथा पञ्चबलि, मनुष्ययज्ञ—अतिथि-सत्कार —इन पाँचों यज्ञोंको प्रतिदिन अवश्य करना चाहिये।

पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः ।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन् ।।
तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः ।
पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम् ।।
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ।।

(मनु० ३।६८-७०)

ब्रह्मयज्ञ

संध्या-वन्दनके बाद द्विजमात्रको प्रतिदिन वेद-पुराणादिका पठन-पाठन करना चाहिये अथवा नीचे लिखे मन्त्रोंका पाठ करे। (समयाभाव होनेपर केवल गायत्री महामन्त्रके जपनेसे भी ब्रह्मयज्ञकी पूर्ति हो जाती है*।)

देश-कालके स्मरणपूर्वक **'अथ ब्रह्मयज्ञाख्यं कर्म करिष्ये'—**ऐसा उच्चारण कर संकल्प करे।

ऋग्वेद—ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ।

यजुर्वेद—ॐ इषे त्वोर्जे त्वा वायव स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वमघ्न्या इन्द्राय भागं प्रजावतीरनमीवा अयक्ष्मा मा वस्तेन ईशत माघशँ सो ध्रुवा अस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून् पाहि ।

सामवेद—ॐ अग्न आ याहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि ।

अथर्ववेद—ॐ शं नो देवीरभीष्टय आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ।

निरुक्तम्—समाम्नायः समाम्नातः ।

छन्द—मयरसतजभनलगसंमितम् ।

निघण्टु—गौः ग्मा ।

ज्यौतिषम्—पञ्चसंवत्सरमयम् ।

शिक्षा—अथ शिक्षां प्रवक्ष्यामि ।

व्याकरणम्—वृद्धिरादैच् ।

कल्पसूत्रम्—अथातोऽधिकारः फलयुक्तानि कर्माणि ।

गृह्यसूत्रम्—अथातो गृह्यस्थालीपाकानां कर्म ।

न्यायदर्शनम्—प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयव-तर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः ।

वैशेषिकदर्शनम्—अथातो धर्मं व्याख्यास्यामः । यतोऽभ्युदय-निःश्रेयससिद्धिः स धर्मः ।

योगदर्शनम्—अथ योगानुशासनम् । योगश्चित्तवृत्तिनिरोधः ।

सांख्यदर्शनम्—अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः ।

भारद्वाजकर्ममीमांसा—अथातो धर्मजिज्ञासा । धारको धर्मः ।

जैमिनीयकर्ममीमांसा—अथातो धर्मजिज्ञासा, चोदना-लक्षणोऽर्थो धर्मः ।

ब्रह्ममीमांसा—अथातो ब्रह्मजिज्ञासा । जन्माद्यस्य यतः । शास्त्रयोनित्वात् । तत्तु समन्वयात् ।

स्मृतिः—

मनुमेकाग्रमासीनमभिगम्य महर्षयः ।
प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन् ।।

रामायणम्—

तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ।।

भारतम्—

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ।।

पुराणम्—

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ।।

तन्त्रम्—

आचारमूला जातिः स्यादाचारः शास्त्रमूलकः ।
वेदवाक्यं शास्त्रमूलं वेदः साधकमूलकः ।।
साधकश्च क्रियामूलः क्रियापि फलमूलिका ।
फलमूलं सुखं देवि सुखमानन्दमूलकम् ।।

---

* **अवेदविन्महायज्ञान् कर्तुमिच्छंस्तु यो द्विजः ।**
तारव्याहृतिसंयुक्तां सावित्रीं त्रिः समुच्चरेत् ।।

(आचारेन्दुमें अग्निस्मृति)

तर्पण (पितृयज्ञ)

तर्पणका फल—

एकैकस्य तिलैर्मिश्रांस्त्रींस्त्रीन् दद्याज्जलाञ्जलीन् ।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ।।

एक-एक पितरको तिलमिश्रित जलकी तीन-तीन अंजलियाँ प्रदान करे। (इस प्रकार तर्पण करनेसे) जन्मसे आरम्भकर तर्पणके दिनतक किये पाप उसी समय नष्ट हो जाते हैं।

तर्पण न करनेसे प्रत्यवाय (पाप)—ब्रह्मादिदेव एवं पितृगण तर्पण न करनेवाले मानवके शरीरका रक्तपान करते हैं अर्थात् तर्पण न करनेके पापसे शरीरका रक्त-शोषण होता है।

‘अतर्पिताः शरीराद्रुधिरं पिबन्ति’

—इससे यह सिद्ध होता है कि गृहस्थ मानवको प्रतिदिन तर्पण अवश्य करना चाहिये।

तर्पणके योग्य पात्र—सोना, चाँदी, ताँबा, काँसाका पात्र पितरोंके तर्पणमें प्रशस्त माना गया है। मिट्टी तथा लोहेका पात्र सर्वथा वर्जित है[*]।

तिल-तर्पणका निषेध—सप्तमी एवं रविवारको, घरमें, जन्मदिनमें, दास, पुत्र और स्त्रीकी कामनावाला मनुष्य तिलसे तर्पण न करे। नन्दा (प्रतिपदा, षष्ठी, एकादशी) तिथि, शुक्रवार, कृत्तिका, मघा एवं भरणी नक्षत्र, रविवार तथा गजच्छायायोगमें तिल मिले जलसे कदापि तर्पण न करे[१]।

कुशाके अग्रभागसे देवताओंका, मध्यसे मनुष्योंका और मूल तथा अग्रभागसे पितरोंका तर्पण करे[२]।

घरमें, ग्रहण, पितृश्राद्ध, व्यतीपातयोग, अमावास्या तथा संक्रान्तिके दिन निषेध होनेपर भी तिलसे तर्पण करे। किंतु अन्य दिनोंमें घरमें तिलसे तर्पण न करे[३]।

तर्पण-प्रयोग-विधि[१]

गायत्रीमन्त्रसे शिखा बाँधकर तिलक लगाकर प्रथम दाहिनी अनामिकाके मध्य पोरमें दो कुशों और बायीं अनामिकामें तीन कुशोंकी पवित्री[2] धारण कर ले। फिर हाथमें

त्रिकुश, यव, अक्षत और जल लेकर निम्नलिखित संकल्प पढ़े—

अद्य... श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं देवर्षिमनुष्यपितृतर्पणं करिष्ये । (पृ० २१ के अनुसार संकल्प करे)

आवाहन—इसके बाद ताँबेके पात्रमें जल और चावल डालकर त्रिकुशको पूर्वाग्र रखकर उस पात्रको दायें हाथमें लेकर बायें हाथसे ढककर नीचे लिखा मन्त्र पढ़कर देव-ऋषियोंका आवाहन करे।

आवाहन-मन्त्र—

ब्रह्मादयः सुराः सर्वे ऋषयः सनकादयः ।
आगच्छन्तु महाभागा ब्रह्माण्डोदरवर्तिनः ।।

(१) देव-तर्पण-विधि—देव तथा ऋषि-तर्पणमें—१-पूरब दिशाकी ओर मुँह करे। २-जनेऊको सव्य रखे। ३-दाहिना घुटना जमीनपर लगाकर बैठे[3]। ४-अर्घ्यपात्रमें चावल[4] छोड़े। ५-तीनों कुशोंको पूर्वकी ओर अग्रभाग[1] कर रखे । ६-जलकी अञ्जलि एक-एक हो[2]। ७-देवतीर्थसे अर्थात् दायें हाथकी अँगुलियोंके अग्रभागसे दे। (देवतीर्थका चित्र पृ०-सं० ६० में देखें) ८-जलाञ्जलिको सोना, चाँदी, ताँबा अथवा काँसेके बर्तनमें डाले। यदि नदीमें तर्पण किया जाय तो दोनों हाथोंको मिलाकर जलसे भरकर गौकी सींग-जितना ऊँचा उठाकर जलमें ही अञ्जलि डाल दे[3]।

निम्नलिखित प्रत्येक नाम-मन्त्रके बाद **'तृप्यताम्'** कहकर एक-एक अञ्जलि जल देता जाय।

ॐ ब्रह्मा तृप्यताम् । ॐ विष्णुस्तृप्यताम् । ॐ रुद्रस्तृप्यताम् । ॐ प्रजापतिस्तृप्यताम् । ॐ देवास्तृप्यन्ताम् । ॐ छन्दांसि तृप्यन्ताम् । ॐ वेदास्तृप्यन्ताम् । ॐ ऋषयस्तृप्यन्ताम् । ॐ पुराणाचार्यास्तृप्यन्ताम् । ॐ गन्धर्वास्तृप्यन्ताम् । ॐ इतराचार्यास्तृप्यन्ताम् । ॐ संवत्सरः सावयवस्तृप्यताम् । ॐ देव्यस्तृप्यन्ताम् । ॐ अप्सरसस्तृप्यन्ताम् । ॐ देवानुगास्तृप्यन्ताम् । ॐ नागास्तृप्यन्ताम् । ॐ सागरास्तृप्यन्ताम् । ॐ पर्वतास्तृप्यन्ताम् । ॐ सरितस्तृप्यन्ताम् । ॐ मनुष्यास्तृप्यन्ताम् । ॐ यक्षास्तृप्यन्ताम् । ॐ रक्षांसि तृप्यन्ताम् । ॐ पिशाचास्तृप्यन्ताम् । ॐ सुपर्णास्तृप्यन्ताम् । ॐ भूतानि तृप्यन्ताम् । ॐ पशवस्तृप्यन्ताम् । ॐ वनस्पतयस्तृप्यन्ताम् । ॐ ओषधयस्तृप्यन्ताम् । ॐ भूतग्रामश्चतु-र्विधस्तृप्यताम् ।

(२) ऋषि-तर्पण—इसी प्रकार निम्नाङ्कित मन्त्रवाक्योंसे मरीचि आदि ऋषियोंको भी एक-एक अञ्जलि जल दे—

ॐ मरीचिस्तृप्यताम् । ॐ अत्रिस्तृप्यताम् । ॐ अंगिरास्तृप्यताम् । ॐ पुलस्त्यस्तृप्यताम् । ॐ पुलहस्तृप्यताम् । ॐ क्रतुस्तृप्यताम् । ॐ वसिष्ठस्तृप्यताम् । ॐ प्रचेतास्तृप्यताम् । ॐ भृगुस्तृप्यताम् । ॐ नारदस्तृप्यताम् ।

(३) दिव्य मनुष्य-तर्पण—दिव्य मनुष्य-तर्पणमें—१-उत्तर दिशाकी ओर मुँह

करे[१]। २-जनेऊको कंठीकी तरह कर ले। ३-गमछेको भी कंठीकी तरह कर ले। ४-सीधा बैठे। कोई घुटना जमीनपर न लगाये[२]। ५-अर्घ्यपात्रमें जौ छोड़े। ६-तीनों कुशोंको उत्तराग्र रखे। प्राजापत्य (काय) तीर्थसे दे अर्थात् कुशोंको दाहिने हाथकी कनिष्ठिकाके मूलभागमें रखकर यहींसे जल दे। ७-दो-दो अंजलियाँ दे[३]।

प्राजापत्यतीर्थ

अञ्जलिदानके मन्त्र—

ॐ सनकस्तृप्यताम् (२) । ॐ सनन्दनस्तृप्यताम् (२) । ॐ सनातनस्तृप्यताम् (२) । ॐ कपिलस्तृप्यताम् (२) । ॐ आसुरिस्तृप्यताम् (२) । ॐ वोढुस्तृप्यताम् (२) । ॐ पञ्चशिखस्तृप्यताम् (२) ।

(४) दिव्य पितृ-तर्पण—पितृ-तर्पणमें—१-दक्षिण दिशाकी ओर मुँह करे। २-अपसव्य हो जाय अर्थात् जनेऊको दाहिने कंधेपर रखकर बायें हाथके नीचे ले जाय[१]। ३-गमछेको भी दाहिने कंधेपर रखे। ४-बायाँ घुटना जमीनपर लगाकर बैठे[२]। ५-अर्घ्य-पात्रमें कृष्ण तिल छोड़े[३]। ६-कुशोंको बीचसे मोड़कर उनकी जड़ और अग्रभागको दाहिने हाथमें तर्जनी और अँगूठेके बीचमें रखे। ७-पितृतीर्थ-(चित्र पृ०-सं० ६० में देखें) से अर्थात् अँगूठे और तर्जनीके मध्यभागसे अंजलि दे। ८-तीन-तीन अञ्जलियाँ दे[४]।

उपर्युक्त नियमसे प्रत्येक मन्त्रसे तीन-तीन अञ्जलियोंको देनेके मन्त्र इस प्रकार हैं—

ॐ कव्यवाडनलस्तृप्यताम् इदं सतिलं जलं (गङ्गाजलं वा) तस्मै स्वधा नमः, तस्मै स्वधा नमः, तस्मै स्वधा नमः[५] **। ॐ सोमस्तृप्यताम् इदं सतिलं जलं (गङ्गाजलं वा) तस्मै स्वधा नमः (३) । ॐ यमस्तृप्यताम् इदं सतिलं जलं (गङ्गाजलं वा) तस्मै स्वधा नमः (३) । ॐ अर्यमा तृप्यताम् इदं सतिलं जलम् (गङ्गाजलं वा) तस्मै स्वधा नमः (३) । ॐ अग्निष्वात्ताः पितरस्तृप्यन्ताम् इदं सतिलं जलं (गङ्गाजलं वा) तेभ्यः स्वधा नमः, तेभ्यः स्वधा नमः, तेभ्यः स्वधा नमः । ॐ सोमपाः पितरस्तृप्यन्ताम् इदं सतिलं जलं (गङ्गाजलं वा) तेभ्यः स्वधा नमः (३) । ॐ बर्हिषदः पितरस्तृप्यन्ताम् इदं सतिलं जलं (गङ्गाजलं वा) तेभ्यः स्वधा नमः (३) ।**

(५) यम-तर्पण—इसी प्रकार निम्नलिखित प्रत्येक नामसे यमराजको पितृतीर्थसे ही दक्षिणाभिमुख तीन-तीन अञ्जलियाँ दे—

ॐ यमाय नमः(३) । ॐ धर्मराजाय नमः(३) । ॐ मृत्यवे नमः(३) । ॐ अन्तकाय नमः(३) । ॐ वैवस्वताय नमः(३) । ॐ कालाय नमः(३) । ॐ सर्वभूतक्षयाय नमः(३) । ॐ औदुम्बराय नमः(३) । ॐ दध्नाय नमः(३) । ॐ नीलाय नमः(३) । ॐ परमेष्ठिने नमः(३) । ॐ वृकोदराय नमः(३) । ॐ चित्राय नमः(३) । ॐ चित्रगुप्ताय नमः(३)[*]**।**

(६) मनुष्यपितृ-तर्पण—पितरोंका तर्पण करनेके पूर्व निम्नाङ्कित मन्त्रोंसे हाथ जोड़कर प्रथम उनका आवाहन करे—

ॐ उशन्तस्त्वा नि धीमह्युशन्तः समिधीमहि ।
उशन्नुशत आ वह पितॄन् हविषे अत्तवे ।।

(यजु० १९।७०)

आ यन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः ।
अस्मिन् यज्ञे स्वधया मदन्तोऽधि ब्रुवन्तु तेऽवन्त्वस्मान् ।।

(यजु० १९।५८)

यदि ऊपर लिखे वेदमन्त्रोंका शुद्ध उच्चारण सम्भव न हो तो निम्नलिखित वाक्यका उच्चारण कर पितरोंका आवाहन करे—

ॐ आगच्छन्तु मे पितर इमं गृह्णन्तु जलाञ्जलिम् ।

इसी तरह नीचे लिखे मन्त्रोंका भी शुद्ध उच्चारण सम्भव न हो तो मन्त्रोंको छोड़कर केवल **'अमुकगोत्रः अस्मत्पिता...अमुकस्वरूपः'** आदि संस्कृत वाक्य बोलकर तिलके साथ तीन-तीन जलाञ्जलियाँ दे, यथा—

अमुकगोत्रः अस्मत्पिता अमुकशर्मा वसुरूपस्तृप्यतामिदं तिलोदकं (गङ्गाजलं वा) तस्मै स्वधा नमः, तस्मै स्वधा नमः, तस्मै स्वधा नमः ।

अमुकगोत्रः अस्मत्पितामहः अमुकशर्मा रुद्ररूपस्तृप्यतामिदं तिलोदकं

(गङ्गाजलं वा) तस्मै स्वधा नमः (३) ।

अमुकगोत्रः अस्मत्प्रपितामहः अमुकशर्मा आदित्यरूपस्तृप्यतामिदं तिलोदकं (गङ्गाजलं वा) तस्मै स्वधा नमः (३) ।

अमुकगोत्रा अस्मन्माता अमुकी देवी वसुरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा नमः, तस्यै स्वधा नमः, तस्यै स्वधा नमः ।

अमुकगोत्रा अस्मत्पितामही अमुकी देवी रुद्ररूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा नमः (३) ।

अमुकगोत्रा अस्मत्प्रपितामही अमुकी देवी आदित्यरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा नमः (३) ।

यदि सौतेली माँ मर गयी हो तो उसको भी तीन बार जल दे—

अमुकगोत्रा अस्मत्सापत्नमाता अमुकी देवी तृप्यतामिदं तिलोदकं तस्यै स्वधा नमः(३) ।

इसके बाद निम्नाङ्कित नौ मन्त्रोंको पढ़ते हुए पितृतीर्थसे जल गिराता रहे* (जिन्हें वेदमन्त्र न आता हो, वे इसे ब्राह्मणद्वारा पढ़वावें या छोड़ भी सकते हैं।)—

ॐ उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः ।
असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ।।

(यजु० १९।४९)

अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ।
तेषां वयँ् सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ।।

(यजु० १९।५०)

आ यन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः ।
अस्मिन् यज्ञे स्वधया मदन्तोऽधि ब्रुवन्तु तेऽवन्त्वस्मान् ।।

(यजु० १९।५८)

ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् ।
स्वधा स्थ तर्पयत मे पितॄन् ।।

(यजु० २।३४)

पितृभ्यः स्वधायिभ्यः स्वधा नमः । पितामहेभ्यः स्वधायिभ्यः स्वधा नमः । प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः । अक्षन्पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः पितरः शुन्धध्वम् ।

(यजु० १९।३६)

ये चेह पितरो ये च नेह याँश्च विद्म याँ उ च न प्रविद्म । त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञँ् सुकृतं जुषस्व ।

(यजु० १९।६७)

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ।

(यजु० १३।२७)

मधु नक्तमुतोषसो मधुमत्पार्थिवँ् रजः । मधु द्यौरस्तु नः पिता ।।

(यजु० १३।२८)

मधुमान्नो वनस्पतिर्मधुमाँ् अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ।।

(यजु० १३।२९)

ॐ मधु । मधु । मधु । तृप्यध्वम् । तृप्यध्वम् । तृप्यध्वम् ।

फिर नीचे लिखे मन्त्रका पाठमात्र करे—

ॐ नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्मैतद्वः पितरो वास ।

(यजु० २।३२)

द्वितीय गोत्र-तर्पण—इसके बाद द्वितीय गोत्रवाले (ननिहालके) मातामह (नाना) आदिका तर्पण करे। यहाँ भी पहलेकी भाँति निम्नलिखित वाक्योंको तीन-तीन बार पढ़कर तिलसहित जलकी तीन-तीन अञ्जलियाँ पितृतीर्थसे दे—

अमुकगोत्रः अस्मन्मातामहः (नाना) अमुकः वसुरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः (३) ।

अमुकगोत्रः अस्मत्प्रमातामहः (परनाना) अमुकः रुद्ररूप-स्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः (३) ।

अमुकगोत्रः अस्मद् वृद्धप्रमातामहः (वृद्ध परनाना) अमुकः आदित्यरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः (३) ।

अमुकगोत्रा अस्मन्मातामही (नानी) अमुकी देवी दा वसुरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा नमः (३) ।

अमुकगोत्रा अस्मत्प्रमातामही (परनानी) अमुकी देवी दा रुद्ररूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा नमः (३) ।

अमुकगोत्रा अस्मद्वृद्धप्रमातामही (वृद्ध परनानी) अमुकी देवी दा

आदित्यरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा नमः (३) ।

पत्न्यादितर्पण—इसके आगे पत्नीसे लेकर आप्तपर्यन्त जो भी सम्बन्धी मृत हो गये हों, उनके गोत्र और नाम लेकर एक-एक अञ्जलि जल दे*—

अमुकगोत्रा अस्मत्पत्नी (भार्या) अमुकी देवी दा वसुरूपा तृप्यताम् इदं सतिलं जलं तस्यै स्वधा नमः । अमुकगोत्रः अस्मत्सुतः (बेटा) अमुकशर्मा वसुरूपस्तृप्यताम् इदं सतिलं जलं तस्मै स्वधा नमः । अमुकगोत्रा अस्मत्कन्या (बेटी) अमुकी देवी दा वसुरूपा तृप्यताम् इदं सतिलं जलं तस्यै स्वधा नमः । अमुकगोत्रः अस्मत्पितृव्यः (पिताके भाई) अमुकशर्मा वसुरूपस्तृप्यताम् इदं सतिलं जलं तस्मै स्वधा नमः । अमुकगोत्रः अस्मन्मातुलः (मामा) अमुकशर्मा वसुरूपस्तृप्यताम् इदं सतिलं जलं तस्मै स्वधा नमः । अमुकगोत्रः अस्मद्भ्राता (अपना भाई) अमुकशर्मा वसुरूपस्तृप्यताम् इदं सतिलं जलं तस्मै स्वधा नमः । अमुकगोत्रः अस्मत्सापत्नभ्राता (सौतेला भाई) अमुकशर्मा वसुरूपस्तृप्यताम् इदं सतिलं जलं तस्मै स्वधा नमः । अमुकगोत्रा अस्मत्पितृभगिनी (बूआ) अमुकी देवी दा वसुरूपा तृप्यताम् इदं सतिलं जलं तस्यै स्वधा नमः । अमुकगोत्रा अस्मन्मातृभगिनी (मौसी) अमुकी देवी दा वसुरूपा तृप्यताम् इदं सतिलं जलं तस्यै स्वधा नमः । अमुकगोत्रा अस्मदात्मभगिनी (अपनी बहन) अमुकी देवी दा वसुरूपा तृप्यताम् इदं सतिलं जलं तस्यै स्वधा नमः । अमुकगोत्रा अस्मत्सापत्नभगिनी (सौतेली बहन) अमुकी देवी दा वसुरूपा तृप्यताम् इदं सतिलं जलं तस्यै स्वधा नमः । अमुकगोत्रः अस्मच्छ्वशुरः (श्वशुर) अमुकशर्मा वसुरूपस्तृप्यताम् इदं सतिलं जलं तस्मै स्वधा नमः । अमुकगोत्रः अस्मद्गुरुः अमुकशर्मा वसुरूपस्तृप्यताम् इदं सतिलं जलं तस्मै स्वधा नमः । अमुकगोत्रा अस्मदाचार्यपत्नी अमुकी देवी दा वसुरूपा तृप्यताम् इदं सतिलं जलं तस्यै स्वधा नमः । अमुकगोत्रः अस्मच्छिष्यः वसुरूपस्तृप्यताम् इदं सतिलं जलं तस्मै स्वधा नमः । अमुकगोत्रः अस्मत्सखा अमुकशर्मा वसुरूपस्तृप्यताम् इदं सतिलं जलं तस्मै स्वधा नमः । अमुकगोत्रः अस्मदाप्तपुरुषः अमुकशर्मा वसुरूपस्तृप्यताम् इदं सतिलं जलं तस्मै स्वधा नमः ।

इसके बाद सव्य होकर पूर्वाभिमुख हो सीधे बैठ जाय। कुशोंको सीधा कर उनके अग्रभागको भी पूरबकी ओर कर ले। फिर नीचे लिखे श्लोकोंको पढ़ते हुए देवतीर्थसे जल गिराये—

देवासुरास्तथा यक्षा नागा गन्धर्वराक्षसाः ।
पिशाचा गुह्यकाः सिद्धाः कूष्माण्डास्तरवः खगाः ।।
जलेचरा भूनिलया वाय्वाधाराश्च जन्तवः ।
तृप्तिमेते प्रयान्त्वाशु मद्दत्तेनाम्बुनाखिलाः ।।

इसके बाद अपसव्य होकर जनेऊ और अँगोछेको भी दाहिने कंधेपर रखकर दक्षिणाभिमुख हो जाय*। कुशोंको बीचसे मोड़कर इनकी जड़ और अग्रभागको

दक्षिणकी ओर कर दे। फिर नीचे लिखे हुए श्लोकोंको पढ़कर पितृतीर्थसे जल गिराये—

नरकेषु समस्तेषु यातनासु च ये स्थिताः ।
तेषामाप्यायनायैतद्दीयते सलिलं मया ।।
येऽबान्धवा बान्धवाश्च येऽन्यजन्मनि बान्धवाः ।
ते तृप्तिमखिला यान्तु यश्चास्मत्तोऽभिवाञ्छति ।।

(पद्मपु० १।२०।१६९-७०)

ये मे कुले लुप्तपिण्डाः पुत्रदारविवर्जिताः ।
तेषां हि दत्तमक्षय्यमिदमस्तु तिलोदकम् ।।
आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृमानवाः ।
तृप्यन्तु पितरः सर्वे मातृमातामहादयः ।।
अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ।
आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम् ।।

वस्त्र-निष्पीडन—इस प्रकार सब पितरोंका तर्पण हो जानेके बाद अँगोछेकी चार तह कर उसमें तिल तथा जल छोड़कर नीचे लिखा मन्त्र पढ़कर जलके बाहर बायीं ओर पृथ्वीपर निचोड़े—

ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः ।
ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ।।

(देवी० भा० ११।२०।२६-२७)

भीष्मतर्पण—इसके बाद भीष्मपितामहको पितृतीर्थ और कुशोंसे जल दे—

भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः ।
आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम् ।।

सूर्यको अर्घ्यदान—इसके पश्चात् पात्रको जल तथा मिट्टीसे स्वच्छ कर ले। तदनन्तर पूर्वोक्त रीतिसे आचमन और प्राणायाम कर सव्य हो जाय अर्थात् जनेऊको बायें कंधेपर कर ले। अर्घ्यमें फूल-चन्दन लेकर निम्नलिखित मन्त्रसे सूर्यको अर्घ्य दे—

नमो विवस्वते ब्रह्मन्! भास्वते विष्णुतेजसे ।
जगत्सवित्रे शुचये सवित्रे कर्मदायिने ।।

सूर्यार्घ्य देकर प्रदक्षिणा करे। इसके बाद दिशाओं एवं उनके अधिष्ठातृ देवताओंका वन्दन करे*—

१-ॐ प्राच्यै नमः, ॐ इन्द्राय नमः । २-ॐ आग्नेय्यै नमः, ॐ अग्नये नमः । ३-ॐ दक्षिणायै नमः, ॐ यमाय नमः । ४-ॐ नैर्ऋत्यै नमः, ॐ निर्ऋतये नमः । ५-ॐ प्रतीच्यै नमः, ॐ वरुणाय नमः । ६-ॐ वायव्यै नमः, ॐ वायवे नमः । ७-ॐ उदीच्यै नमः, ॐ कुबेराय नमः । ८-ॐ ऐशान्यै नमः, ॐ ईशानाय नमः । ९-ॐ ऊर्ध्वायै नमः, ॐ ब्रह्मणे नमः । १०-ॐ अधरायै नमः, ॐ अनन्ताय नमः ।

इस तरह दिशाओं और देवताओंको नमस्कार कर बैठकर नीचे लिखे मन्त्र पढ़कर एक-एक जलाञ्जलि दे—

ॐ ब्रह्मणे नमः । ॐ अग्नये नमः । ॐ पृथिव्यै नमः । ॐ ओषधिभ्यो नमः । ॐ वाचे नमः । ॐ वाचस्पतये नमः । ॐ महद्भ्यो नमः । ॐ विष्णवे नमः । ॐ अद्भ्यो नमः । ॐ अपाम्पतये नमः । ॐ वरुणाय नमः ।

समर्पण—निम्नाङ्कित वाक्य पढ़कर यह तर्पण-कर्म भगवान्को समर्पित करे —

अनेन यथाशक्तिकृतेन देवर्षिमनुष्यपितृतर्पणाख्येन कर्मणा भगवान् पितृस्वरूपी जनार्दनवासुदेवः प्रीयतां न मम । ॐ तत्सद्ब्रह्मार्पणमस्तु ।

तदनन्तर हाथ जोड़कर भगवान्का स्मरण करते हुए पाठ करे—

प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ।।
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ।।
यत्पादपङ्कजस्मरणात् यस्य नामजपादपि ।
न्यूनं कर्म भवेत् पूर्णं तं वन्दे साम्बमीश्वरम् ।।
ॐ विष्णवे नमः । ॐ विष्णवे नमः ।

ॐ विष्णवे नमः ।

तर्पण-विधि समाप्त।

---

* **हैमं रौप्यमयं पात्रं ताम्रं कांस्यसमुद्भवम् ।**
पितॄणां तर्पणे पात्रं मृण्मयं तु परित्यजेत् ।।

(आह्निकसूत्रा०)

१-**सप्तम्यां भानुवारे च गृहे जन्मदिने तथा ।**
भृत्यपुत्रकलत्रार्थी न कुर्यात् तिलतर्पणम् ।।
नन्दायां भार्गवदिने कृत्तिकासु मघासु च ।
भरण्यां भानुवारे च गजच्छायाह्वये तथा ।
तर्पणं नैव कुर्वीत तिलमिश्रं कदाचन ।।

(आचारमयूख)

२-**कुशाग्रैस्तर्पयेद्देवान् मनुष्यान् कुशमध्यतः ।**

द्विगुणीकृत्य मूलाग्रैः पितॄन् संतर्पयेद्द्विजः ।।

३-**उपरागे पितृश्राद्धे पातेऽमायां च संक्रमे ।**
निषेधेऽपीह सर्वत्र तिलैस्तर्पणमाचरेत् ।।

(आ० सूत्रा० भाग ४, कात्यायनका वचन)

१-संध्योपासनमें सूर्यार्घ्यसे मन्देहादि राक्षस भस्म होते हैं और तर्पणसे समस्त ब्रह्माण्डका कल्याण होता है। इस तर्पण-प्रयोगके द्वारा थोड़े समयमें हमसे जो इतना महान् कार्य हो जाता है, वह भगवान्‌की असीम दयाका सूचक है, क्योंकि ऐसा विधान हमें उन्होंने दिया। इसलिये प्रत्येक अधिकारीको इसका अनुष्ठान प्रतिदिन अवश्य करना चाहिये। गृह्यसूत्रमें भगवान्‌का यह आदेश है—

'नित्यमेव स्नात्वाऽद्भिर्देवानृषींश्च तर्पयन्ति तर्पयन्ति ।' पुराणमें लिखा है—**'तर्पयेदन्वहं द्विजः ।'**

२-बिना कुश आदि पहने केवल हाथसे तर्पण नहीं करना चाहिये—

खड्गमौक्तिकहस्तेन कर्तव्यं पितृतर्पणम् ।
मणिकाञ्चनदर्भैर्वा न शुद्धेन कदाचन ।।

३-**दक्षिणजानुभूलग्नो देवेभ्यः सेचयेज्जलम् ।** (वृद्धपराशर)

४-**देवान् ब्रह्मऋषींश्चैव तर्पयेदक्षतोदकैः ।**(कूर्मपुराण)

१-**कुशाग्रेषु सुरांस्तर्पयेत् ।** (ब्रह्मपुराण)

२-**एकैकमञ्जलिं देवान् ।** (व्यास)

३-**द्वौ हस्तौ युग्मतः कृत्वा पूरयेदुदकाञ्जलिम् ।**
गोशृङ्गमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत् ।। (उशना)

१-**ततः कृत्वा निवीतं तु यज्ञसूत्रमुदङ्मुखः ।**
प्राजापत्येन तीर्थेन मनुष्यांस्तर्पयेत् पृथक् ।।

(विष्णु)

२-**मनुष्यतर्पणं कुर्वन्न किञ्चिज्जानु पातयेत् ।** (पुलस्त्य)

३-**द्वौ द्वौ तु सनकादयः अर्हन्ति ।** (व्यास)

१-जिनके पास यज्ञोपवीत नहीं है, उन्हें उत्तरीय (गमछे) के द्वारा तर्पणकार्य करना चाहिये।

२-**भूलग्नसव्यजानुश्च दक्षिणाग्रकुशेन च ।**
पितॄन् संतर्पयेत्.... । (वृद्धपराशर)

३-**पितॄन् भक्त्या तिलैः कृष्णैः.... ।** (माधव)

४-**अर्हन्ति पितरस्त्रींस्त्रीन् ।** (व्यास)

५-कुछ पद्धतियोंके अनुसार तर्पणमें केवल 'स्वधा' का प्रयोग चलता है। परंतु

पारस्करगृह्यसूत्रके हरिहरभाष्यमें तर्पण-प्रयोग-निरूपणके अन्तर्गत 'स्वधा नमः' प्रयोग दिया गया है, जिसके अनुसार यहाँ तर्पणमें 'स्वधा नमः' का प्रयोग ही उचित है।

*** यमाय धर्मराजाय मृत्यवे चान्तकाय च ।**
वैवस्वताय कालाय सर्वभूतक्षयाय च ।।
औदुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय वै नमः ।।

(मत्स्यपु० १०२।२३-२४, कात्यायनपरिशिष्ट)

* पारस्कर गृह्यसूत्रके हरिहरभाष्यमें तर्पण-प्रकरणके अनुसार इन नौ मन्त्रोंको पढ़ते हुए जलधारा छोड़नेका विधान है।

* (क) पारस्कर-गृह्यसूत्र, हरिहरभाष्य तर्पण-प्रयोग (परिशिष्ट कण्डिका ३) में यही प्रयोग मिलता है।

(ख) ....येऽप्यन्ये गोत्रिणो ज्ञातिवर्जिताः ।
तानेकाञ्जलिदानेन प्रत्येकं च पृथक् पृथक् ।।

(व्यासस्मृति ३।२२)

सपत्नीक पित्रादित्रय, सपत्नीक मातामहादित्रयसे अतिरिक्त सभी स्त्री-पुरुषोंको एक-एक अञ्जलि देनी चाहिये।

* पारस्कर-गृह्यसूत्र, तर्पण-प्रयोगमें अपसव्य होकर तर्पणका विधान है।

* पारस्कर-गृह्यसूत्र-तर्पणसूत्रकण्डिका हरिहरभाष्य ।

सूर्यके बारह नमस्कार

सूर्यकी पूजा एवं वन्दना भी नित्यकर्ममें आती है[१]। शास्त्रमें इसका बहुत महत्त्व बतलाया गया है। दूध देनेवाली एक लाख गायोंके दानका जो फल होता है, उससे भी बढ़कर फल एक दिनकी सूर्यपूजासे होता है[२]। पूजाकी तरह सूर्यके नमस्कारोंका भी महत्त्व है[३]। सूर्यके बारह नामोंके द्वारा होनेवाले बारह नमस्कारोंकी विधि यहाँ दी जाती है। प्रणामोंमें साष्टाङ्ग प्रणामका अधिक महत्त्व माना गया है। यह अधिक उपयोगी है। इससे शारीरिक व्यायाम भी हो जाता है। भगवान् सूर्यके एक नामका उच्चारण कर दण्डवत् करे। फिर उठकर दूसरा नाम बोलकर दूसरा दण्डवत् करे। इस तरह बारह साष्टाङ्ग प्रणाम हो जाते हैं। शीघ्रता न करे, भक्तिभावसे करे।

एतदर्थ प्रथम सूर्यमण्डलमें सौन्दर्यराशि भगवान् नारायणका ध्यान करना चाहिये। भावनासे दोनों हाथ भगवान्के सुकोमल चरणोंका स्पर्श करते हों, ललाट भी उसी सुखस्पर्शमें केन्द्रित हो और आँखें उनके सौन्दर्य-पानमें मत्त हों।

संकल्प—ॐ विष्णुर्विष्णुर्विष्णुः अद्य....अहं श्रीपरमात्म-प्रीत्यर्थमादित्यस्य द्वादशनमस्काराख्यं कर्म करिष्ये ।

संकल्पके बाद अञ्जलिमें या ताम्रपात्रमें लाल चन्दन, अक्षत, फूल डालकर हाथोंको हृदयके पास लाकर निम्नलिखित मन्त्रसे सूर्यको अर्घ्य दे—

एहि सूर्य! सहस्रांशो! तेजोराशे! जगत्पते!
अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर!

अब सूर्यमण्डलमें स्थित भगवान् नारायणका ध्यान करे—

ध्येयः सदा सवितृमण्डलमध्यवर्ती ।
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ।।

अब उपर्युक्त विधिसे ध्यान करते हुए निम्नलिखित नाम-मन्त्रोंसे भगवान् सूर्यको साष्टाङ्ग प्रणाम करे—

(१) ॐ मित्राय नमः । (२) ॐ रवये नमः । (३) ॐ सूर्याय नमः । (४) ॐ भानवे नमः । (५) ॐ खगाय नमः । (६) ॐ पूष्णे नमः । (७) ॐ हिरण्यगर्भाय नमः । (८) ॐ मरीचये नमः । (९) ॐ आदित्याय नमः । (१०) ॐ सवित्रे नमः । (११) ॐ अर्काय नमः । (१२) ॐ भास्कराय नमो नमः ।

इसके बाद सूर्यके सारथि अरुणको अर्घ्य दे—

विनतातनयो देवः कर्मसाक्षी सुरेश्वरः ।
सप्ताश्वः सप्तरज्जुश्च अरुणो मे प्रसीदतु ।।
ॐ कर्मसाक्षिणे अरुणाय नमः ।
आदित्यस्य नमस्कारं ये कुर्वन्ति दिने दिने ।
जन्मान्तरसहस्रेषु दारिद्रयं, नोपजायते ।।

—इसके बाद सूर्यार्घ्यका जल मस्तक और आँखोंमें लगाये तथा कुछ चरणामृत निम्नलिखित मन्त्रसे पी ले—

अकालमृत्युहरणं सर्वव्याधिविनाशनम् ।
सूर्यपादोदकं तीर्थं जठरे धारयाम्यहम् ।।

ॐ तत्सत् कृतमिदं कर्म ब्रह्मार्पणमस्तु । विष्णवे नमः, विष्णवे नमः, विष्णवे नमः ।

१-**प्रातःसंध्यावसाने तु नित्यं सूर्यं समर्चयेत् ।** (पारिजात)

२-**प्रदद्याद् वै गवां लक्षं दोग्ध्रीणां वेदपारगे ।**
एकाहमर्चयेद् भानुं तस्य पुण्यं ततोऽधिकम् ।। (भविष्यपुराण)

३-**यः सूर्यं पूजयेन्नित्यं प्रणमेद् वापि भक्तितः ।**
तस्य योगं च मोक्षं च ब्रध्नस्तुष्टः प्रयच्छति ।। (भविष्यपुराण)

नित्य-दान

नित्यकर्ममें दान भी आता है। वेदने आदेश दिया है कि दान बहुत ही श्रद्धाके साथ करना चाहिये। अपनी जैसी सम्पत्ति हो, उसके अनुसार दान करना चाहिये। देते समय अभिमान न हो, लज्जासे विनम्र होकर दान करे। भय मान कर दे[१]। यह दान सुपात्रको करना चाहिये और प्रतिदिन करना चाहिये[२]। यह आवश्यक नहीं है कि दानकी मात्रा अधिक ही हो। शास्त्रका आदेश है कि यदि स्थिति विपन्न हो तो जो कुछ भोजनके लिये मिले, उसमेंसे आधा ग्रास ही दान कर दे[३]। महाभारतमें कहा गया है कि यदि एक दिन भी दानके बिना बीत जाय, तो उस दिन इस तरहका शोक प्रकट करना चाहिये, जिस तरह लुटेरोंसे लुट जानेपर मनुष्य करता है[४]। दाता पूरबकी ओर मुख करके दे और ग्रहीता उत्तरकी ओर मुख करके ले। इससे दोनोंका हित होता है[५]। माता, पिता और गुरुको अपने पुण्यका भी दान किया जाता है[६]।

दान देनेसे पहले दान लेनेवाले ब्राह्मणकी चन्दनादिसे पूजा कर ले। देय वस्तुकी भी शुद्धि तथा फूलसे पूजा कर ले तथा देय वस्तुका इस प्रकार संकल्प करे।

(क) निष्काम संकल्प—'ॐ विष्णुर्विष्णुर्विष्णुः, अद्य....श्रीपरमात्मप्रीत्यर्थमिदं वस्तु अमुकशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे ।'

(ख) सकाम संकल्प—'श्रीपरमात्मप्रीत्यर्थम्' के बाद **'ममैतच्छरीरावच्छिन्नसमस्तपापक्षयसर्वग्रहपीडाशान्तिशरीरोत्थार्तिनाशमनः-प्रसादायुरारोग्यादिसर्वसौख्यसम्पत्त्यर्थं....इदं वस्तु अमुकशर्मणे ब्राह्मणाय तुभ्यं सम्प्रददे ।'**

१-**श्रद्धया देयम् । अश्रद्धयाऽदेयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् ।**

(तैत्तिरीयोप० ११।३)

२-**दातव्यं प्रत्यहं पात्रे स्वस्थः शक्त्यनुसारतः।** (स्मृतिरत्नावली)

३-**ग्रासादर्धतरो ग्रासो ह्यर्थिभ्यः किं न दीयते ।**
इच्छानुरूपो विभवः कदा कस्य भविष्यति ।।

(स्मृतिरत्नावली)

४-**एकस्मिन्नप्यतिक्रान्ते दिने दानविवर्जिते ।**
दस्युभिर्मुषितस्येव युक्तमाक्रन्दितुं भृशम् ।। (महाभारत)

५-**दद्यात् पूर्वमुखो दानं गृह्णीयादुत्तरामुखः ।**
आयुर्विवर्धते दातुर्ग्रहीतुः क्षीयते न तत् ।। (योगचिन्तामणि)

६-**देवतानां गुरूणां च मातापित्रोस्तथैव च ।**
पुण्यं देयं प्रयत्नेन नापुण्यं नोदितं क्वचित् ।।

देवपूजा-प्रकरण

[देवयज्ञ]

[पूजन-सम्बन्धी जाननेयोग्य कुछ आवश्यक बातें]

यहाँ सर्वप्रथम पूजन-सम्बन्धी कुछ ज्ञातव्य बातोंका निर्देश किया जा रहा है—

पञ्चदेव—

आदित्यं गणनाथं च देवीं रुद्रं च केशवम् ।
पञ्चदैवत्यमित्युक्तं सर्वकर्मसु पूजयेत् ।।

(मत्स्यपुराण)

सूर्य, गणेश, दुर्गा, शिव, विष्णु—ये पंचदेव कहे गये हैं। इनकी पूजा सभी कार्योंमें करनी चाहिये।

अनेक देवमूर्ति-पूजाप्रतिष्ठा-विचार—

एका मूर्तिर्न सम्पूज्या गृहिणा स्वेष्टमिच्छता ।
अनेकमूर्तिसम्पन्नः सर्वान् कामानवाप्नुयात् ।।

कल्याण चाहनेवाले गृहस्थ एक मूर्तिकी ही पूजा न करें, किंतु अनेक देवमूर्तिकी पूजा करें, इससे कामना पूरी होती है।

किंतु—

गृहे लिङ्गद्वयं नार्च्यं गणेशत्रितयं तथा ।
शङ्खद्वयं तथा सूर्यो नार्च्यौ शक्तित्रयं तथा ।।
द्वे चक्रे द्वारकायास्तु शालग्रामशिलाद्वयम् ।
तेषां तु पूजनेनैव उद्वेगं प्राप्नुयाद् गृही ।।

(आचारप्रकाश, आचारेन्दु)

घरमें दो शिवलिङ्ग, तीन गणेश, दो शंख, दो सूर्य, तीन दुर्गामूर्ति, दो गोमतीचक्र और दो शालग्रामकी पूजा करनेसे गृहस्थ मनुष्यको अशान्ति होती है।

शालग्रामशिलायास्तु प्रतिष्ठा नैव विद्यते ।

(स्कन्दपुराण)

शालग्रामकी प्राणप्रतिष्ठा नहीं होती।

बाणलिङ्गानि राजेन्द्र ख्यातानि भुवनत्रये ।
न प्रतिष्ठा न संस्कारस्तेषां नावाहनं तथा ।।

(भविष्यपुराण)

बाणलिङ्ग तीनों लोकोंमें विख्यात हैं, उनकी प्राणप्रतिष्ठा, संस्कार या आवाहन कुछ भी नहीं होता।

शैलीं दारुमयीं हैमीं धात्वाद्याकारसम्भवाम् ।
प्रतिष्ठां वै प्रकुर्वीत प्रासादे वा गृहे नृप ।।

(वृद्धपाराशर)

पत्थर, काष्ठ, सोना या अन्य धातुओंकी मूर्तियोंकी प्रतिष्ठा घर या मन्दिरमें करनी चाहिये।

गृहे चलार्चा विज्ञेया प्रासादे स्थिरसंज्ञिका ।
इत्येते कथिता मार्गा मुनिभिः कर्मवादिभिः ।।

(लौगाक्षिभास्कर)

घरमें चल प्रतिष्ठा और मन्दिरमें अचल प्रतिष्ठा करनी चाहिये। यह कर्मज्ञानी मुनियोंका मत है।

गङ्गाप्रवाहे शालग्रामशिलायां च सुरार्चने ।
द्विजपुङ्गव! नापेक्ष्ये आवाहनविसर्जने ।।
शिवलिङ्गेऽपि सर्वेषां देवानां पूजनं भवेत् ।
सर्वलोकमये यस्माच्छिवशक्तिर्विभुः प्रभुः ।।

(बृहद्धर्मपुराण अ० ५७)

गङ्गाजीमें, शालग्रामशिलामें तथा शिवलिङ्गमें सभी देवताओंका पूजन बिना आवाहन-विसर्जन किया जा सकता है।

पाँच उपचार—१-गन्ध, २-पुष्प, ३-धूप, ४-दीप और ५-नैवेद्य।

दस उपचार—१-पाद्य, २-अर्घ्य, ३-आचमन, ४-स्नान, ५-वस्त्र-निवेदन, ६-गन्ध, ७-पुष्प, ८-धूप, ९-दीप और १०-नैवेद्य।

सोलह उपचार—१-पाद्य, २-अर्घ्य, ३-आचमन, ४-स्नान, ५-वस्त्र, ६-आभूषण, ७-गन्ध, ८-पुष्प, ९-धूप, १०-दीप, ११-नैवेद्य, १२-आचमन, १३-ताम्बूल, १४-स्तवपाठ, १५-तर्पण और १६-नमस्कार[१]।

फूल तोड़नेका मन्त्र—प्रातःकालिक स्नानादि[२] कृत्योंके बाद देव—पूजाका विधान है। एतदर्थ स्नानके बाद तुलसी, बिल्वपत्र और फूल तोड़ने चाहिये। तोड़नेसे पहले हाथ-पैर धोकर आचमन कर ले। पूरबकी ओर मुँहकर हाथ जोड़कर मन्त्र बोले—

मा नु शोकं कुरुष्व त्वं स्थानत्यागं च मा कुरु ।

देवतापूजनार्थाय प्रार्थयामि वनस्पते ।।

पहला फूल तोड़ते समय **'ॐ वरुणाय नमः'**, दूसरा फूल तोड़ते समय **'ॐ व्योमाय[१] नमः'** और तीसरा फूल तोड़ते समय **'ॐ पृथिव्यै नमः'** बोले[२]।

तुलसीदल-चयन—स्कन्दपुराणका वचन है कि जो हाथ पूजार्थ तुलसी चुनते हैं, वे धन्य हैं—

तुलसीं ये विचिन्वन्ति धन्यास्ते करपल्लवाः ।

तुलसीका एक-एक पत्ता न तोड़कर पत्तियोंके साथ अग्रभागको तोड़ना चाहिये। तुलसीकी मञ्जरी सब फूलोंसे बढ़कर मानी जाती है। मञ्जरी तोड़ते समय उसमें पत्तियोंका रहना भी आवश्यक माना गया है[३]। निम्नलिखित मन्त्र पढ़कर पूज्यभावसे पौधेको हिलाये बिना तुलसीके अग्रभागको तोड़े। इससे पूजाका फल लाख गुना बढ़ जाता है[४]।

तुलसीदल तोड़नेके मन्त्र—

तुलस्यमृतजन्मासि सदा त्वं केशवप्रिया ।
चिनोमि केशवस्यार्थे वरदा भव शोभने ।।
त्वदङ्गसम्भवैः पत्रैः पूजयामि यथा हरिम् ।
तथा कुरु पवित्राङ्गि! कलौ मलविनाशिनि ।।

(आह्निकसूत्रावली)

तुलसीदल-चयनमें निषिद्ध समय—वैधृति और व्यतीपात—इन दो योगोंमें, मंगल, शुक्र और रवि—इन तीन वारोंमें, द्वादशी, अमावास्या एवं पूर्णिमा—इन तीन तिथियोंमें, संक्रान्ति और जननाशौच तथा मरणाशौचमें तुलसीदल तोड़ना मना है[१]। संक्रान्ति, अमावास्या, द्वादशी, रात्रि और दोनों संध्यायोंमें भी तुलसीदल न तोड़े[२], किंतु तुलसीके बिना भगवान्‌की पूजा पूर्ण नहीं मानी जाती, अतः निषिद्ध समयमें तुलसीवृक्षसे स्वयं गिरी हुई पत्तीसे पूजा करे[३], (पहले दिनके पवित्र स्थानपर रखे हुए तुलसीदलसे भी भगवान्‌की पूजा की जा सकती है)। शालग्रामकी पूजाके लिये निषिद्ध तिथियोंमें भी तुलसी तोड़ी जा सकती है[४]। बिना स्नानके और जूता पहनकर भी तुलसी न तोड़े[१]।

बिल्वपत्र तोड़नेका मन्त्र—

अमृतोद्भव! श्रीवृक्ष! महादेवप्रियः सदा ।
गृह्णामि तव पत्राणि शिवपूजार्थमादरात् ।।

(आचारेन्दु)

बिल्वपत्र तोड़नेका निषिद्ध काल—चतुर्थी, अष्टमी, नवमी, चतुर्दशी और अमावास्या तिथियोंको, संक्रान्तिके समय और सोमवारको बिल्वपत्र न तोड़े[२]। किंतु बिल्वपत्र शंकरजीको बहुत प्रिय है, अतः निषिद्ध समयमें पहले दिनका रखा बिल्वपत्र चढ़ाना चाहिये।

शास्त्रने तो यहाँतक कहा है कि यदि नूतन बिल्वपत्र न मिल सके तो चढ़ाये हुए बिल्वपत्रको ही धोकर बार-बार चढ़ाता रहे[३]।

बासी जल, फूलका निषेध—जो फूल, पत्ते और जल बासी हो गये हों, उन्हें देवताओंपर न चढ़ाये। किंतु तुलसीदल और गंगाजल बासी नहीं होते। तीर्थोंका जल भी बासी नहीं होता[४]। वस्त्र, यज्ञोपवीत और आभूषणमें भी निर्माल्यका दोष नहीं आता[१]।

मालीके घरमें रखे हुए फूलोंमें बासी दोष नहीं आता[२]। दौना तुलसीकी ही तरह एक पौधा होता है। भगवान् विष्णुको यह बहुत प्रिय है। स्कन्दपुराणमें आया है कि दौनाकी माला भगवान्‌को इतनी प्रिय है कि वे इसे सूख जानेपर भी स्वीकार कर लेते हैं[३]। मणि, रत्न, सुवर्ण, वस्त्र आदिसे बनाये गये फूल बासी नहीं होते[४]। इन्हें प्रोक्षण कर चढ़ाना चाहिये[५]।

नारदजीने 'मानस' (मनके द्वारा भावित) फूलको सबसे श्रेष्ठ फूल माना है[६]। उन्होंने देवराज इन्द्रको बतलाया है कि हजारों-करोड़ों बाह्य फूलोंको चढ़ाकर जो फल प्राप्त किया जा सकता है, वह केवल एक मानस-फूल चढ़ानेसे प्राप्त हो जाता है[७]। इससे मानस-पुष्प ही उत्तम पुष्प है। बाह्य पुष्प तो निर्माल्य भी होते हैं। मानस-पुष्पमें बासी आदि कोई दोष नहीं होता। इसलिये पूजा करते समय मनसे गढ़कर फूल चढ़ानेका अद्भुत आनन्द अवश्य प्राप्त करना चाहिये।

सामान्यतया निषिद्ध फूल—यहाँ उन निषेधोंको दिया जा रहा है जो सामान्यतया सब पूजामें सब फूलोंपर लागू होते हैं। भगवान्‌पर चढ़ाया हुआ फूल 'निर्माल्य' कहलाता है, सूँघा हुआ या अंगमें लगाया हुआ फूल भी इसी कोटिमें आता है। इन्हें न चढ़ाये[१]। भौंरेके सूँघनेसे फूल दूषित नहीं होता[२]। जो फूल अपवित्र बर्तनमें रख दिया गया हो, अपवित्र स्थानमें उत्पन्न हो, आगसे झुलस गया हो, कीड़ोंसे विद्ध हो, सुन्दर न हो[३], जिसकी पंखुड़ियाँ बिखर गयी हों, जो पृथ्वीपर गिर पड़ा हो, जो पूर्णतः खिला न हो, जिसमें खट्टी गंध या सड़ाँध आती हो, निर्गन्ध हो या उग्र गन्धवाला हो, ऐसे पुष्पोंको नहीं चढ़ाना चाहिये[४]। जो फूल बायें हाथ, पहननेवाले अधोवस्त्र, आक और रेंड़के पत्तेमें रखकर लाये गये हों, वे फूल त्याज्य हैं[५]। कलियोंको चढ़ाना मना है, किंतु यह निषेध कमलपर लागू नहीं है[६]। फूलको जलमें डुबाकर धोना मना है। केवल जलसे इसका प्रोक्षण कर देना चाहिये[१]।

पुष्पादि चढ़ानेकी विधि—फूल, फल और पत्ते जैसे उगते हैं, वैसे ही इन्हें चढ़ाना चाहिये[२]। उत्पन्न होते समय इनका मुख ऊपरकी ओर होता है, अतः चढ़ाते समय इनका मुख ऊपरकी ओर ही रखना चाहिये। इनका मुख नीचेकी ओर न करे[३]। दूर्वा एवं तुलसीदलको अपनी ओर और बिल्वपत्र नीचे मुखकर चढ़ाना चाहिये[४]। इनसे भिन्न पत्तोंको ऊपर मुखकर या नीचे मुखकर दोनों ही प्रकारसे चढ़ाया जा सकता है[५]। दाहिने हाथके करतलको उत्तान कर मध्यमा, अनामिका और अँगूठेकी सहायतासे फूल चढ़ाना चाहिये[६]।

उतारनेकी विधि—चढ़े हुए फूलको अँगूठे और तर्जनीकी सहायतासे उतारे[७]।

पञ्चदेव-पूजा (आगमोक्त-पद्धति)

प्रतिदिन पञ्चदेव-पूजा अवश्य करनी चाहिये। यदि वेदके मन्त्र अभ्यस्त न हों तो आगमोक्त मन्त्रसे, यदि वे भी अभ्यस्त न हों तो नाम-मन्त्रसे और यदि यह भी सम्भव न हो तो बिना मन्त्रके ही जल, चन्दन आदि चढ़ाकर पूजा करनी चाहिये[८]।

यहाँ सामान्यरूपसे पूजाकी विधि दी जा रही है। साथ-साथ नाम-मन्त्र भी हैं। जो श्लोकोंका उच्चारण न कर सकें, वे नाम-मन्त्रसे षोडशोपचार पूजन करें।

गृह-मन्दिरमें स्थित पञ्चदेव-पूजा—

यदि गृहका मन्दिर हो तो पूजागृहमें प्रवेश करनेसे पहले बाहर दरवाजेपर ही पूर्वोक्त प्रकारसे आचमन कर ले और तीन तालियाँ बजाये और विनम्रताके साथ मन्दिरमें प्रवेश करे। ताली बजानेके पहले निम्नलिखित विनियोगसहित मन्त्र पढ़ ले—

विनियोग—अपसर्पन्त्विति मन्त्रस्य वामदेव ऋषिः, शिवो देवता, अनुष्टुप् छन्दः, भूतादिविघ्नोत्सादने विनियोगः ।

भूतोत्सादन-मन्त्र—

ॐ अपसर्पन्तु ते भूता ये भूता भूतले स्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ।।

पश्चात् देवताओंका ध्यान करे, साष्टांग प्रणाम करे। बादमें निम्नलिखित विनियोग और मन्त्र पढ़कर आसनपर बैठकर उसको जलसे पवित्र करे।

आसन पवित्र करनेका विनियोग एवं मन्त्र—

ॐ पृथ्वीति मन्त्रस्य मेरुपृष्ठ ऋषिः, सुतलं छन्दः, कूर्मो देवता, आसनपवित्रकरणे विनियोगः ।

ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ।।

पूजाकी बाहरी तैयारी

बैठनेके पूर्व पूजाकी आवश्यक तैयारी कर ले। ताजे[*] जलको कपड़ेसे छानकर कलशमें भरे। आचमनीसे शङ्खमें भी जल डालकर पीठपर रख दे। शङ्खको जलमें डुबाना[१] मना है। इसी तरह शङ्खको पृथ्वीपर[२] रखना भी मना है। शङ्खमें चन्दन और फूल छोड़ दे। उदकुम्भ (कलश)-के जलको भी सुवासित करनेके लिये कपूर और केसरके साथ चन्दन घिसकर मिला दे या पवित्र इत्र डाल दे। अक्षतको केसर या रोलीसे हलका रँग ले।

पूजा-सामग्रीके रखनेका प्रकार

पूजनकी किस वस्तुको किधर रखना चाहिये, इस बातका भी शास्त्रने निर्देश दिया है। इसके अनुसार वस्तुओंको यथास्थान सजा देना चाहिये।

बायीं ओर—(१) सुवासित जलसे भरा उदकुम्भ (जलपात्र[३]), (२) घंटा[४] और (३) धूपदानी[५]। (४) तेलका दीपक भी बायीं ओर रखे[६]।

दायीं ओर—(१) घृतका दीपक और (२) सुवासित जलसे भरा शङ्ख[७]।

सामने—(१) कुङ्कुम (केसर) और कपूरके साथ घिसा गाढ़ा चन्दन[१], (२) पुष्प आदि हाथमें तथा चन्दन ताम्रपात्रमें न रखे[२]।

भगवान्‌के आगे—चौकोर जलका घेरा डालकर नैवेद्यकी वस्तु रखे।

पूजाकी भीतरी तैयारी

शास्त्रोंमें पूजाको हजारगुना अधिक महत्त्वपूर्ण बनानेके लिये एक उपाय बतलाया गया है। वह उपाय है, मानसपूजा। जिसे पूजासे पहले करके फिर बाह्य वस्तुओंसे पूजन करे[३]।

पहले पुष्प-प्रकरणमें शास्त्रका एक वचन उद्‌धृत किया गया है, जिसमें बतलाया गया है कि मनःकल्पित यदि एक फूल भी चढ़ा दिया जाय तो करोड़ों बाहरी फूल चढ़ानेके बराबर होता है। इसी प्रकार मानस चन्दन, धूप, दीप, नैवेद्य भी भगवान्‌को करोड़गुना अधिक संतोष दे सकेंगे। अतः मानसपूजा बहुत अपेक्षित है।

मानसपूजा

वस्तुतः भगवान्‌को किसी वस्तुकी आवश्यकता नहीं, वे तो भावके भूखे हैं। संसारमें ऐसे दिव्य पदार्थ उपलब्ध नहीं हैं, जिनसे परमेश्वरकी पूजा की जा सके। इसलिये पुराणोंमें मानसपूजाका विशेष महत्त्व माना गया है। मानसपूजामें भक्त अपने इष्टदेवको मुक्तामणियोंसे मण्डितकर स्वर्ण-सिंहासनपर विराजमान कराता है। स्वर्गलोककी मन्दाकिनी गङ्गाके जलसे अपने आराध्यको स्नान कराता है, कामधेनु गौके दुग्धसे पञ्चामृतका निर्माण करता है। वस्त्राभूषण भी दिव्य अलौकिक होते हैं। पृथ्वीरूपी गन्धका अनुलेपन करता है। अपने आराध्यके लिये कुबेरकी पुष्पवाटिकासे स्वर्णकमलपुष्पोंका चयन करता है। भावनासे वायुरूपी धूप, अग्निरूपी दीपक तथा अमृतरूपी नैवेद्य भगवान्‌को अर्पण करनेकी विधि है। इसके साथ ही त्रिलोककी सम्पूर्ण वस्तु सभी उपचार सच्चिदानन्दघन परमात्म-प्रभुके चरणोंमें भावनासे भक्त अर्पण करता है। यह है मानसपूजाका स्वरूप। इसकी एक संक्षिप्त विधि भी पुराणोंमें वर्णित है। जो नीचे लिखी जा रही है—

१-ॐ लं पृथिव्यात्मकं गन्धं परिकल्पयामि ।
(प्रभो! मैं पृथ्वीरूप गन्ध (चन्दन) आपको अर्पित करता हूँ।)
२-ॐ हं आकाशात्मकं पुष्पं परिकल्पयामि ।

(प्रभो! मैं आकाशरूप पुष्प आपको अर्पित करता हूँ।)

३-ॐ यं वाय्वात्मकं धूपं परिकल्पयामि ।

(प्रभो! मैं वायुदेवके रूपमें धूप आपको प्रदान करता हूँ।)

४-ॐ रं वह्न्यात्मकं दीपं दर्शयामि ।

(प्रभो! मैं अग्निदेवके रूपमें दीपक आपको प्रदान करता हूँ।)

५-ॐ वं अमृतात्मकं नैवेद्यं निवेदयामि ।

(प्रभो! मैं अमृतके समान नैवेद्य आपको निवेदन करता हूँ।)

६-ॐ सौं सर्वात्मकं सर्वोपचारं समर्पयामि ।

(प्रभो! मैं सर्वात्माके रूपमें संसारके सभी उपचारोंको आपके चरणोंमें समर्पित करता हूँ।) इन मन्त्रोंसे भावनापूर्वक मानसपूजा की जा सकती है।

मानसपूजासे चित्त एकाग्र और सरस हो जाता है, इससे बाह्य पूजामें भी रस मिलने लगता है। यद्यपि इसका प्रचार कम है, तथापि इसे अवश्य अपनाना चाहिये*।

१-पूजनके अन्तमें साङ्गता-सिद्धिके लिये दक्षिणा भी चढ़ानी चाहिये।

२-हारीतका वचन है—

स्नानं कृत्वा तु ये केचित् पुष्पं चिन्वन्ति मानवाः ।
देवतास्तन्न गृह्णन्ति भस्मीभवति दारुवत् ।।

स्नान कर फूल न तोड़े, क्योंकि ऐसा करनेसे देवता इसे स्वीकार नहीं करते। इस शब्दार्थसे आपाततः प्रतीत होने लगता है कि सबेरे उठकर स्नान करनेके पहले ही फूल तोड़ ले। किंतु इस श्लोकका यह तात्पर्य नहीं है। निबन्धकारोंने निर्णय दिया है कि यहाँ 'स्नान' का तात्पर्य 'मध्याह्न-स्नान' है। फलितार्थ होता है कि मध्याह्न-स्नानके बाद फूल तोड़ना मना है, इसके पहले ही प्रातः-स्नानके बाद तोड़ ले—

(क) स्नानम्, प्रातःस्नानातिरिक्तम्, स्नानोत्तरं प्रातः पुष्पाहरणादिविधानात् ।

(वीरमित्रोदय, पूजाप्रकाश, पृ० ५८)

(ख) तन्मध्याह्नस्नानपरम् । (आचारेन्दु, पृ० १५०)

(ग) रुद्रधरका मत है—

अस्नात्वा तुलसीं छित्त्वा देवतापितृकर्मणि ।
तत्सर्वं निष्फलं याति पञ्चगव्येन शुद्ध्यति ।।

इस पद्मपुराणके वचनमें 'तुलसी' पद पुष्प आदिका उपलक्षक है। अतः इस वचनसे सिद्ध होता है कि स्नान किये बिना ही यदि तुलसीदल, फूल आदि तोड़ लिये जायँ तो पाप लगता है, जिसकी शुद्धि पञ्चगव्यसे हो सकती है—**'अत्र तुलसीपदं पुष्पमात्रपरम् । शिष्टाचारानुरोधादिति रुद्रधरः ।'** (आचारेन्दु, पृ० १५०)

(घ) दक्षने समिधा, फूल आदिका समय संध्याके बाद दिनका दूसरा भाग माना है। दिनको आठ भागोंमें बाँटा गया है—**'समित्पुष्पकुशादीनां स कालः परिकीर्तितः ।'**

१-यह आर्ष प्रयोग है—**व्योमायेतिच्छान्दसम् ।** (वी० मि० पू० प्र०)

२-**प्रक्षाल्य पाणिपादौ च आचम्य च कृताञ्जलिः ।**
पादपाभिमुखो भूत्वा प्रणवादिनमोऽन्तकम् ।
विसृज्य पुष्पमेकं तु वाचा वरुणमुच्चरेत् ।
व्योमाय च पृथिव्यै च द्वित्रिपुष्पं यथाक्रमम् ।।

(आचारेन्दु)

३-**(क) मञ्जर्यां पत्रसाहित्यमपेक्षितम् ।** (वीरमित्रोदय, पू० प्र०)
(ख) अभिन्नपत्रां हरितां हृद्यमञ्जरिसंयुताम् ।
क्षीरोदार्णवसम्भूतां तुलसीं दापयेद्धरिम् ।।

(ब्रह्मपुराण)

४-**मन्त्रेणानेन यः कुर्याद् गृहीत्वा तुलसीदलम् ।**
पूजनं वासुदेवस्य लक्षपूजाफलं लभेत् ।।

(पद्मपुराण)

१-**वैधृतौ च व्यतीपाते भौमभार्गवभानुषु ।**
पर्वद्वये च संक्रान्तौ द्वादश्यां सूतके द्वयोः ।।

(निर्णयसिन्धु, परिच्छेद ३, स्मृतिसारो०)

२-**संक्रान्तौ कृष्णपक्षान्ते द्वादश्यां निशि संध्ययोः ।**
नच्छिन्द्यात् .... ।।

(विष्णुधर्मोत्तर)

३-**निषिद्धे दिवसे प्राप्ते गृह्णीयाद् गलितं दलम् ।**
तेनैव पूजां कुर्वीत न पूजा तुलसीं विना ।।

(वाराहपुराण)

४-**शालग्रामशिलार्चार्थं प्रत्यहं तुलसीक्षितौ ।**
तुलसीं ये विचिन्वन्ति धन्यास्ते करपल्लवाः ।।
सङ्क्रान्त्यादौ निषिद्धेऽपि तुलस्यवचयः स्मृतः ।

(आह्निकसूत्रावली)

१-**अस्नात्वा तुलसीं छित्वा सोपानत्कस्तथैव च ।**
स याति नरकं घोरं यावदाभूतसम्प्लवम् ।।

(पद्मपुराण)

२-**अमारिक्तासु संक्रान्त्यामष्टम्यामिन्दुवासरे ।**
बिल्वपत्रं न च छिन्द्याच्छिन्द्याच्चेन्नरकं व्रजेत् ।।

(लिङ्गपुराण)

३-**अर्पितान्यपि बिल्वानि प्रक्षाल्यापि पुनः पुनः ।**
शंकरायार्पणीयानि न नवानि यदि क्वचित् ।।

(स्कन्दपु ०, आचारेन्दु, पृ० १६५)

४-(क) **वर्ज्यं पर्युषितं पुष्पं वर्ज्यं पर्युषितं जलम् ।**
न वर्ज्यं तुलसीपत्रं न वर्ज्यं जाह्नवीजलम् ।।

(बृहन्नारदीय)

(ख) **न पर्युषितदोषोऽस्ति तीर्थतोयस्य चैव हि ।**

(स्मृतिसारावली)

१-**न निर्माल्यं भवेद् वस्त्रं स्वर्णरत्नादिभूषणम् ।** (आचाररत्न)
२-**न पर्युषितदोषोऽस्ति मालाकारगृहेषु च ।** (आचारेन्दु, पृ० १६३)
३-**तस्य माला भगवतः परमप्रीतिकारिणी ।**
शुष्का पर्युषिता वापि न दुष्टा भवति क्वचित् ।।
४-**मणिरत्नसुवर्णादिनिर्मितं कुसुमोत्तमम् ।**
तत्परं कुसुमं प्रोक्तमपरं चित्रवस्त्रजम् ।।
पराणामपराणां च निर्माल्यत्वं न विद्यते ।

(तत्त्वसागरसंहिता)

५-**वस्त्रमभ्युक्षणाच्छुध्येत् ।** (तत्त्वसागरसंहिता)
६-**तस्मान्मानसमेवातः शस्तं पुष्पं मनीषिणाम् ।** (तत्त्वसागरसंहिता)
७-**बाह्यपुष्पसहस्राणां सहस्रायुतकोटिभिः ।**
पूजिते यत्फलं पुंसां तत्फलं त्रिदशाधिप!
मानसेनैकेन पुष्पेण विद्वानाप्नोत्यसंशयम् ।।

(तत्त्वसागरसं०, वीर०, पूजा० पृ० ५७)

१-(क) **निर्माल्यं द्विविधं प्रोक्तमुत्सृष्टं घ्रातमेव च ।**
न क्रियान्तरयोग्यं तत् सर्वथा त्याज्यमेव हि ।।

(तत्त्वसागरसंहिता)

(ख) **आघ्रातैरङ्गसंसृष्टैः ।** (विष्णुधर्मोत्तर)
२-**मुक्त्वा भ्रमरमेकं तु ।** (विष्णुधर्मोत्तर)
३-**कुपात्रान्तरसंस्थानि कुत्सितस्थानजानि च ।**
वह्निकीटापविद्धानि विशोभान्यशुभानि वै ।
एवंविधानि पुष्पाणि त्याज्यान्येव विचक्षणैः ।।
४-**.. महींगतैः ।**
न विकीर्णदलैः स्पृष्टैर्नाशुभैरविकासिभिः ।
पूतिगन्धान्यगन्धान्यम्लगन्धीनि वर्जयेत् ।। (विष्णुधर्मोत्तर)
५-**करानीतं पटानीतमानीतं चार्कपत्रके ।**
एरण्डपत्रेऽप्यानीतं तत् पुष्पं सकलं त्यजेत् ।।
(करोऽयं वामः, पटः अधोवस्त्रम्) (वीर० मि० पू० प्र० पृ० ६०)
६-**मुकुलैर्नार्चयेद्देवं पङ्कजैर्जलजैर्विना ।**

(स्मृतिसारावली)

१-**गन्धोदकेन चैतानि त्रिः प्रोक्ष्यैव प्रपूजयेत् ।** (तत्त्वसारसंहिता)
२-**'यथोत्पन्नं तथार्पणम् ।'** (तृचभास्कर)
३-**पत्रं वा यदि वा पुष्पं फलं नेष्टमधोमुखम् ।**
४-(क) **दूर्वाः स्वाभिमुखाग्राः स्युर्बिल्वपत्रमधोमुखम् ।।** (तृचभास्कर)
(ख) **तुलस्यादिपत्रम् आत्माभिमुखं न्युब्जमेव समर्पणीयम् ।** (प्रतिष्ठासारदीपिका)
५-**इतरपत्राणामप्यूर्ध्वमुखाधोमुखमनयोर्विकल्पः ।** (आचारेन्दु)
६-**मध्यमानामिकाङ्गुष्ठैः पुष्पं संगृह्य पूजयेत् ।** (चिन्तामणि)
७-**अङ्गुष्ठतर्जनीभ्यां तु निर्माल्यमपनोदयेत् ।** (कालिकापुराण)
८-**अयं विनैव मन्त्रेण पुण्यराशिः प्रकीर्तितः ।**
स्यादयं मन्त्रयुक्तश्चेत् पुण्यं शतगुणोत्तरम् ।।

(पूजाप्रकाश)

* बासी जलका निषेध है—**'जलं पर्युषितं त्याज्यम् ।'** (शिवरहस्य)
अपवाद—किंतु गङ्गाजल या तीर्थजलमें बासीका दोष नहीं होता—**'गाङ्गं वारि न दुष्यति ।'** (शिवरहस्य)

१-शङ्खका पृष्ठभाग शुद्ध नहीं माना गया है। इसलिये शङ्खको जलमें न डुबाये, आचमनीसे उसमें जल भरे—

उद्धरिण्या जलं ग्राह्यं जले शङ्खं न मज्जयेत् ।
शङ्खस्य पृष्ठसंलग्नं जलं पापकरं ध्रुवम् ।।

२-**यः शङ्खं भुवि संस्थाप्य पूजयेत् पुरुषोत्तमम् ।**
तस्य पूजां न गृह्णाति तस्मात् पीठं प्रकल्पयेत् ।।

३-**सुवासितजलैः पूर्णं सव्ये कुम्भं प्रपूजयेत् ।** (पूजाप्रकाश)

४-**घण्टां वामदिशि स्थिताम् ।** (गौतम, आ० सू०)

५-**वामतस्तु तथा धूपमग्रे नापि न दक्षिणे ।** (यामल)

६-**घृतदीपो दक्षिणतस्तैलदीपस्तु वामतः ।** (महोदधि)

७-**शङ्खमद्भिः पूरयित्वा प्रणवेन च दक्षिणे ।**

१-पतला चन्दन चढ़ाना निषिद्ध है—

द्रवीभूतं घृतं चैव द्रवीभूतं च चन्दनम् ।
नार्पयेन्मम तुष्ट्यर्थं घनीभूतं तदर्पयेत् ।।

(वराहपुराण)

२-**हस्ते धृतानि पुष्पाणि ताम्रपात्रे च चन्दनम् ।**
गङ्गोदकं चर्मपात्रे निषिद्धं सर्वकर्मसु ।।

(आचारेन्दु)

३-**कृत्वादौ मानसीं पूजां ततः पूजां समाचरेत् ।**

(मुद्गलपु०)

* मानसपूजामें आराधकका जितना समय लगता है, उतना भगवान्के सम्पर्कमें बीतता है और तबतक संसार उससे दूर हटा रहता है। अपने आराध्यदेवके लिये बढ़िया-से-बढ़िया रत्नजटित आसन, सुगन्धके बौछार करते दिव्य फूलकी वह कल्पना करता है और उसका मन वहाँसे दौड़कर उन्हें जुटाता है। इस तरह मनको दौड़नेकी और कल्पनाओंकी उड़ान भरनेकी इस पद्धतिमें पूरी छूट मिल जाती है। इसके दौड़नेके लिये क्षेत्र भी बहुत विस्तृत है। इस दायरेमें अनन्त ब्रह्माण्ड ही नहीं, अपितु इसकी पहुँचके परे गोलोक, साकेतलोक, सदाशिवलोक भी आ जाते हैं। अपने आराध्यदेवको इसे आसन देना है, वस्त्र और आभूषण पहनाना है, चन्दन लगाना है, मालाएँ पहनानी हैं, धूप-दीप दिखलाना है और नैवेद्य निवेदित करना है। इन्हें जुटानेके लिये उसे इन्द्रलोकसे ब्रह्मलोकतक दौड़ लगाना है। पहुँचे या न पहुँचे, किंतु अप्राकृतिक लोकोंके चक्कर लगानेसे भी वह नहीं चूकता, ताकि उत्तम साधन जुट जायँ और भगवान्की अद्भुत सेवा हो जाय।

इतनी दौड़-धूपसे लायी गयी वस्तुओंको आराधक जब अपने भगवान्‌के सामने रखता है, तब उसे कितना संतोष मिलता होगा? उसका मन तो निहाल ही हो जाता होगा।

इस तरह पूजा-सामग्रियोंके जुटानेमें और भगवान्‌के लिये उनका उपयोग करनेमें साधक जितना भी समय लगा पाता है, उतना समय वह अन्तर्जगत्‌में बिताता है। इस तरह मानसपूजा साधकको समाधिकी ओर अग्रसर करती रहती है और उसके रसास्वादका आभास भी कराती रहती है। जैसे कोई प्रेमी साधक कान्ताभावसे अपने इष्टदेवकी मानसी सेवा कर रहा है। चाह रहा है कि अपने पूज्य प्रियतमको जूही, चमेली, चम्पा-गुलाब और बेलाकी तुरंतकी गुँथी, गमगमाती हुई बढ़िया-से-बढ़िया माला पहनायें। बाहरी पूजामें इसके लिये बहुत ही भाग-दौड़ करनी पड़ेगी। आर्थिक कठिनाई मुँह बाकर अलग खड़ी हो जाती है। तबतक भगवान्‌से बना यह मधुर सम्बन्ध भी टूट जाता है। पर मानसपूजामें यह अड़चन नहीं आती। इसलिये बना हुआ वह सम्पर्क और गाढ़-से-गाढ़तर होता जाता है। मनकी कोमल भावनाओंसे उत्पन्न की गयी वे वनमालाएँ तुरंत तैयार मिलती हैं। पहनाते समय पूज्य प्रियतमकी सुरभित साँसोंसे जब इसकी सुगन्ध टकराती है, तब नस-नसमें मादकता व्याप्त हो जाती है। पूज्य प्रियतमका स्पर्श पाकर वह उद्वेलित हो उठती है और साधकको समरस कर देती है। अब न आराधक है, न आराध्य है और न आराधना ही है। आगेकी पूजा कौन करे? धन्य हैं वे, जिनकी पूजा इस तरह अधूरी रह जाती है। मानसपूजासे यह स्थिति शीघ्र आ सकती है।

पञ्चदेव-पूजन-विधि

गणेश-स्मरण

हाथमें पुष्प-अक्षत आदि लेकर प्रारम्भमें भगवान् गणेशजीका स्मरण करना चाहिये—

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः ।।
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ।।
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे संकटे चैव विघ्नस्तस्य न जायते ।।

श्रीमन्महागणाधिपतये नमः । लक्ष्मीनारायणाभ्यां नमः । उमामहेश्वराभ्यां नमः । वाणीहिरण्यगर्भाभ्यां नमः । शचीपुरन्दराभ्यां नमः । मातापितृचरण-कमलेभ्यो नमः । इष्टदेवताभ्यो नमः । कुलदेवताभ्यो नमः । ग्रामदेवताभ्यो नमः । वास्तुदेवताभ्यो नमः । स्थानदेवताभ्यो नमः । एतत्कर्म-प्रधानदेवताभ्यो नमः । सर्वेभ्यो देवेभ्यो नमः । सर्वेभ्यो ब्राह्मणेभ्यो नमः ।

पूजनका संकल्प

भगवान्को अर्पण

श्राद्धका अन्न ब्राह्मणको दे या जलमें डाल दे। इसके बाद हाथ जोड़कर इस श्राद्ध-कर्मको आगेका वाक्य पढ़कर भगवान्को अर्पण कर दे—

अनेन कृतेन नित्यश्राद्धकर्मणा भगवान् गदाधरः प्रीयतां न मम, ॐ तत्सद् ब्रह्मार्पणमस्तु ।

विष्णवे नमः, विष्णवे नमः, विष्णवे नमः ।

१-**अतिथिमेवाग्रे भोजयेत् ।** (धर्मप्रश्न)
२-**वैश्वदेवादूर्ध्वं हन्तकारान्नव्यतिरिक्तमन्नमतिथिभ्यो वरेभ्यो ब्राह्मणेभ्यो यद् दीयते स मनुष्ययज्ञस्तावतैव समाप्यते ।**
३-**ये च नित्या भृत्यास्तेषामनुपरोधेन संविभागो विहितः ।** (धर्मप्रश्न)
४-**ज्योतिष्टोमादिभ्योऽपि दुष्करम् ।** (धर्मप्रश्न)

५-**दिनेऽतिथौ तु विमुखे गते यत् पातकं भवेत् ।**
तदेवाष्टगुणं प्रोक्तं सूर्योढे विमुखे गते ।।

(याज्ञवल्क्य)

६-**अप्रणोद्योऽतिथिः सायं सूर्योढो गृहमेधिना ।**
काले प्राप्तस्त्वकाले वा नास्यानश्नन् गृहे वसेत् ।।

(मनु० ३।१०५)

१-**न परीक्षेत चरितं न विद्यां न कुलं तथा ।**
न शीलं न च देशादीनतिथेरागतस्य हि ।।
कुरूपं वा सुरूपं वा कुचैलं वा सुवाससम् ।
विद्यावन्तमविद्यं वा सगुणं वाऽथ निर्गुणम् ।।
मन्येत विष्णुमेवैतं साक्षान्नारायणं हरिम् ।
अतिथिं समनुप्राप्तं विचिकित्सेन्न कर्हिचित् ।।

(नृसिंहपुराण)

२-**परान्नेनोदरस्थेन यः करोति शुभाशुभम् ।**
अन्नदस्य त्रयो भागाः कर्ता भागेन लिप्यते ।।
३-(क) **दयामुद्दिश्य यद्दानमपात्रेभ्योऽपि दीयते ।**
दीनान्धकृपणेभ्यश्च तदानन्त्याय कल्पते ।।

(व्यास)

(ख) **भर्तव्यास्ते महाराज न तु देयः प्रतिग्रहः ।।** (महाभा०)

वार्षिक तिथिपर श्राद्धके निमित्त ब्राह्मण-भोजनका संकल्प

पिता, पितामह, प्रपितामह आदिकी वार्षिक तिथिपर समयाभाव अथवा किसी कारणवश वार्षिक एकोद्दिष्ट श्राद्ध न हो सके तो पूर्वाभिमुख होकर निम्नलिखित संकल्प करे—

ॐ अद्य विक्रमसंवत्सरे (अमुक) संख्यके (अमुक) मासे (अमुक) पक्षे (अमुक) तिथौ (अमुक) वासरे (अमुक) गोत्रस्य अस्मत्पितुः* (अमुक) सांकल्पिकश्राद्धं बलिवैश्वदेवाख्यं पञ्चबलिकर्म च करिष्ये ।

(बलिवैश्वदेव पृ०-सं० १६६ तथा पंचबलि पृ०-सं० १६९ के अनुसार करे)

तत्पश्चात् दक्षिणाभिमुख हो अपसव्य होकर मोटक-तिल-जल लेकर निम्नलिखित संकल्प करे—

ॐ अद्य (अमुक) गोत्राय पित्रे (अमुक) शर्मणे (वर्मणे/गुप्ताय) सांकल्पिकश्राद्धे इदमन्नं परिविष्टं परिवेष्यमाणं ब्राह्मणभोजनतृप्तिपर्यन्तं सोपस्करं ते स्वधा । सव्य तथा पूर्वाभिमुख होकर आशीर्वादके लिये निम्नलिखित प्रार्थना करे—

ॐ गोत्रं नो वर्धतां दातारो नोऽभिवर्धन्ताम् । वेदाः सन्ततिरेव च । श्रद्धा च नो मा व्यगमद् बहुदेयं च नोऽस्तु । अन्नं च नो बहु भवेदतिथींश्च लभेमहि । याचितारश्च नः सन्तु मा च याचिष्म कञ्चन । एताः सत्या आशिषः सन्तु ।। फिर दक्षिणाका संकल्प इस प्रकार करे—

कृतैतच्छ्राद्धप्रतिष्ठार्थं दक्षिणाद्रव्यं यथानामगोत्राय ब्राह्मणाय दातुमहमुत्सृज्ये । तदनन्तर निम्न प्रार्थना करे—

अन्नहीनं क्रियाहीनं विधिहीनं च यद् भवेत् ।
तत्सर्वमच्छिद्रमस्तु पित्रादीनां प्रसादतः ।।
प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ।।

---

* 'पितुः' की जगह दादाको 'पितामहस्य' तथा परदादाको 'प्रपितामहस्य' कहे।

भोजनादि शयनान्तविधि

भोजन-विधि—भोजनालयमें प्रवेश करनेके पहले हाथ-पाँव धोकर दाँतोंको रगड़कर साफ कर ले। फिर कुल्ले कर **'ॐ भूर्भुवः स्वः'** इस मन्त्रसे दो बार आचमन करे। फिर विहित पीढ़ेपर पूरब या उत्तरकी ओर मुँह कर बैठ जाय। थाल रखनेकी जगहपर थालके बराबर, जलसे दाहिनी ओरसे प्रारम्भ कर चौकोर घेरा बनाये। भगवान्‌के भोग लगाये अन्नको पात्रमें परोसवाकर (यदि भोग न लगा हो तो भगवान्‌को निवेदन कर) हाथ जोड़कर प्रणाम करे और **'ॐ अस्माकं नित्यमस्त्वेतत्'** कहकर प्रार्थना करे। फिर हाथमें जल लेकर (दिनमें) **'सत्यं त्वर्तेन त्वा परिषिञ्चामि'** और (रातमें) **'ऋतं त्वा सत्येन परिषिञ्चामि'** कहकर प्रोक्षण करे।

अब पात्रसे दस या पाँच अंगुल हटकर दाहिनी ओर पृथ्वीपर जलका आसन देकर निम्नलिखित मन्त्र पढ़कर तीन ग्रास निकाले—

१-**ॐ भूपतये स्वाहा ।**

२-**ॐ भुवनपतये स्वाहा ।**

३-**ॐ भूतानां पतये स्वाहा ।**

इन मन्त्रोंद्वारा पृथ्वी, चौदह भुवनों तथा सम्पूर्ण प्राणियोंके स्वामी परमात्माकी तृप्ति की जाती है, जिससे सबकी तृप्ति स्वतः हो जाती है।

पञ्च प्राणाहुति—इसके बाद दाहिने हाथमें किंचित् जल लेकर **'ॐ अमृतोपस्तरणमसि स्वाहा'** इस मन्त्रसे आचमन करे (अर्थात् भोजनसे पूर्व अमृतरूपी जलका आसन प्रदान करे)। आवाज न हो। इसके बाद मौन होकर बेरके बराबर पाँच ग्रासद्वारा निम्नलिखित मन्त्रोंसे प्राणाहुतियाँ दे।

१-**ॐ प्राणाय स्वाहा ।**

२-**ॐ अपानाय स्वाहा ।**

३-**ॐ व्यानाय स्वाहा ।**

४-**ॐ उदानाय स्वाहा ।**

५-**ॐ समानाय स्वाहा ।**

फिर हाथ धोकर प्रसाद पाये। भगवान्‌से उपभुक्त होनेके कारण इसके आस्वादनके समय अवश्य उनका प्रेम स्मरण होता रहेगा।

जिनके पिता या ज्येष्ठ भाई जीवित हों, उन्हें प्राणाहुतितक ही मौन रहना चाहिये। बचे हुए बेरके बराबर अन्नको दाहिने हाथमें रखकर थोड़ा जल भी रख ले। इसे निम्नलिखित मन्त्र पढ़कर बलिस्थानकी ओर रख दे—

अस्मत्कुले मृता ये च पितृलोकविवर्जिताः ।

भुञ्जन्तु मम चोच्छिष्टं पात्रादन्नं बहिःकृतम् ।।

इसके बाद दाहिने हाथमें जल लेकर निम्नलिखित मन्त्र पढ़ते हुए—**'ॐ अमृतापिधानमसि स्वाहा ।'** आधा जल पी ले और बचे हुए आधे जलको निम्न मन्त्र पढ़ते हुए उच्छिष्ट अन्नपर छोड़ दे—

रौरवेऽपुण्यनिलये पद्मार्बुदनिवासिनाम् ।
अर्थिनामुदकं दत्तमक्षय्यमुपतिष्ठतु ।।

(दे० भा० ११।२३।३)

अब सब बलि-अन्न लेकर आँगनमें आ जाय और उसे कौओंको दे दे। हाथ और मुँह धोकर बायीं ओर सोलह कुल्ले करे। थोड़ा जल लेकर हथेलीपर रखे और इसे दोनों हथेलियोंसे खूब घिसकर दोनों आँखोंमें अँगूठेकी सहायतासे डाल दे। उस समय निम्नलिखित मन्त्र पढ़ता रहे—

शर्यातिं च सुकन्यां च च्यवनं शक्रमश्विनौ ।
भोजनान्ते स्मरन्नक्ष्णोरङ्गुलाग्राम्बु निक्षिपेत् ।।

उचित परिपाकके लिये निम्नलिखित मन्त्र पढ़ते हुए उदरपर तीन बार हाथ फेरे —

अगस्त्यं वैनतेयं च शनिं च वडवानलम् ।
अन्नस्य परिणामार्थं स्मरेद् भीमं च पञ्चमम् ।।

भोजनके बाद भगवान्‌पर चढ़ी तुलसी, लौंग, इलायची आदि खाये[१]।

भोजनके बादके कृत्य

हलका विश्राम—भोजनके बाद हलका विश्राम अपेक्षित है। किंतु दिनमें सोना मना है[२]। भोजनके बाद लगभग सौ कदम चलकर आठ साँसतक चित्त, सोलह साँसतक दायीं करवट और बत्तीस साँसतक बायीं करवट लेट जाना चाहिये। इससे पाचनमें सुविधा होती है और आलस्य भी दूर हो जाता है।

पुराण आदिका अनुशीलन—विश्रामके बाद अपने कर्तव्य-कार्योंमें संलग्न हो जाना चाहिये। शास्त्रने कहा है कि भोजनके बाद इतिहास, पुराण और धर्मशास्त्र आदिके अनुशीलनमें तथा अपने जीविकोपार्जनमें समयका सदुपयोग करना चाहिये। व्यर्थ समय न खोये[३]।

लोकयात्रा[४] और संध्योपासन—सूर्यके अस्त होनेसे सवा घंटा पहले मन्दिरोंमें दर्शनके लिये निकले। तेजीसे चले ताकि भ्रमणका कार्य भी हो जाय। वैसे प्रातःभ्रमणका अत्यधिक महत्त्व है। सूर्यास्तसे २४ मिनट पहले संध्योपासनके लिये बैठ जाना चाहिये। इसके पहले पैर, हाथ, मुख धोकर धोती बदलकर आचमन कर लेना चाहिये। सायंकाल भी स्नान कर सकते हैं, पर आवश्यक नहीं है। संध्योपासनके बाद

नित्य एकाग्रतासे भगवत्स्मरण करे तथा अपने इष्टदेवका जप करे। कपड़ा धोकर भगवान्‌पर चढ़े चन्दन आदिको पोंछ देना चाहिये। भोग लगाकर आरती उतारनी चाहिये। शयन कराना चाहिये।

सांध्यदीप—सूर्यास्तके समय दीपक जला देना चाहिये। इससे लक्ष्मीकी प्राप्ति होती है। जलानेके बाद निम्नलिखित मन्त्रोंसे दीपकको प्रकाशरूप ब्रह्म समझकर प्रणाम करे—

दीपो ज्योतिः परं ब्रह्म दीपो ज्योतिर्जनार्दनः ।
दीपो हरतु मे पापं सांध्यदीप! नमोऽस्तु ते ।।
शुभं करोतु कल्याणमारोग्यं सुखसम्पदम् ।
शत्रुबुद्धिविनाशं च दीपज्योतिर्नमोऽस्तु ते ।।

दीपकको दीवट या अक्षत आदिपर रखना चाहिये। सीधे जमीनपर रखना मना है। सायंकालिक भोजन कर दिनभरके अपने कृत्योंका सिंहावलोकन करना चाहिये।

आत्मनिरीक्षण* **एवं प्रभुस्मरण—**रात्रिमें सोनेके पूर्व प्रत्येक व्यक्तिको कुछ समयके लिये आत्मनिरीक्षण करना चाहिये कि मेरे शरीर, वचन और मनसे शास्त्रके विपरीत कोई क्रिया तो नहीं हो गयी और यदि हो गयी हो तो उसके लिये भगवन्नामका जप और आगे न हो, इसके लिये मनमें संकल्प करे। दिनभर प्रत्येक कर्ममें भगवान्‌का स्मरण होता रहा है या नहीं? यदि नहीं तो कातरभावसे भगवान्‌से प्रार्थना करनी चाहिये कि उनका निरन्तर स्मरण बना रहे। सोनेसे पूर्व गुरुजनोंकी सेवा करनी चाहिये। तदनन्तर भगवान्‌की मानसिक सेवा करते हुए उन्हींके चरणोंमें सो जाय।

१-शास्त्रानुसार भोजन करनेकी पूर्ण विधि यहाँ लिखी गयी है। पर यदि मन्त्र स्मरण न हो तो भावानुसार केवल क्रियाद्वारा भी विधि पूरी की जा सकती है।

२-**दिवास्वापं न कुर्वीत ....** ।(दक्ष)

३-**इतिहासपुराणानि धर्मशास्त्राणि चाभ्यसेत् ।**
वृथाविनोदवाक्यानि परिवादांश्च वर्जयेत् ।।

(अत्रि)

४-**ग्रामे यान्यागाराणि देवतानां तदीक्षणात् ।**
लोकयात्रेति कथिता तां कुर्वन् पुण्यभाग्भवेत् ।।

* प्रत्यहं पर्यवेक्षेत नरश्चरितमात्मनः ।

विशिष्ट पूजा-प्रकरण

[किसी भी यज्ञादि महोत्सवों, पूजा-अनुष्ठानों अथवा नवरात्र-पूजन, शिवरात्रिमें शिव-पूजन, पार्थिव-पूजन, रुद्राभिषेक, सत्यनारायण-पूजन, दीपावली-पूजन आदि कर्मोंमें प्रारम्भमें स्वस्तिवाचन, पुण्याहवाचन, गणेश-कलश-नवग्रह तथा रक्षा-विधान आदि कर्म सम्पन्न किये जाते हैं, इसके अनन्तर प्रधान-पूजा की जाती है। अतः यहाँ भी वह पूजा-विधान दिया गया है। नान्दीमुख श्राद्ध तथा विशेष अनुष्ठानोंके प्रधान देवताका पूजन-विधान यहाँ नहीं दिया गया है, अन्य पद्धतियोंको देखकर करना चाहिये।]

देव-पूजनमें वेद-मन्त्र, फिर आगम-मन्त्र और बादमें नाम-मन्त्रका उच्चारण किया जाता है। यहाँ इसी क्रमका आधार लिया गया है। जिन्हें वेद-मन्त्र न आता हो, उन्हें आगम-मन्त्रोंका प्रयोग करना चाहिये और जो इनका भी शुद्ध उच्चारण न कर सकें, उनको नाम-मन्त्रोंसे पूजन करना चाहिये।

पूजासे पहले पात्रोंको क्रमसे यथास्थान (पृ० १३१) रखकर पूर्व दिशाकी ओर मुख करके आसनपर बैठकर तीन बार आचमन करना चाहिये—

ॐ केशवाय नमः । ॐ नारायणाय नमः । ॐ माधवाय नमः ।

आचमनके पश्चात् दाहिने हाथके अँगूठेके मूलभागसे **'ॐ हृषीकेशाय नमः, ॐ गोविन्दाय नमः'** कहकर ओठोंको पोंछकर हाथ धो लेना चाहिये। तत्पश्चात् निम्नलिखित मन्त्रसे पवित्री धारण करे—

'ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ।'

पवित्री धारण करनेके पश्चात् प्राणायाम (पृ० ७२-७५) करे। इसके बाद बायें हाथमें जल लेकर दाहिने हाथसे अपने ऊपर और पूजा-सामग्रीपर छिड़कना चाहिये—

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।।
ॐ पुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु ।

तदनन्तर पात्रमें अष्टदल-कमल बनाकर यदि गणेश-अम्बिकाकी मूर्ति न हो तो सुपारीमें मौली लपेटकर अक्षतपर स्थापित कर देनेके बाद हाथमें अक्षत और पुष्प लेकर स्वस्त्ययन पढ़ना चाहिये।

स्वस्त्ययन

ॐ आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः । देवा नो यथा सदमिद् वृधे असन्नप्रायुवो रक्षितारो दिवे दिवे ।। देवानां भद्रा सुमतिर्ऋजूयतां देवानाँ् रातिरभि नो निवर्तताम् । देवानाँ् सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे ।। तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् । अर्यमणं वरुणँ् सोममश्विना सरस्वती नः सुभगा मयस्करत् ।। तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः । तद् ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ।। तमीशानं जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे वयम् । पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ।। स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।। पृषदश्वा मरुतः पृश्निमातरः शुभं यावानो विदथेषु जग्मयः । अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसागमन्निह ।। भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाँ् सस्तनूभिर्व्यशेमहि देवहितं यदायुः ।। शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ।। अदितिर्द्यौ-रदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः । विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् ।। (शु० य० २५।१४-२३) **द्यौः शान्तिरन्तरिक्षँ्शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वँ्शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ।।** (शु० य० ३६।१७) **यतो यतः समीहसे ततो नो अभयं कुरु । शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ।। सुशान्तिर्भवतु ।।** (शु० य० ३६।२२)

श्रीमन्महागणाधिपतये नमः । लक्ष्मीनारायणाभ्यां नमः । उमा-महेश्वराभ्यां नमः । वाणीहिरण्यगर्भाभ्यां नमः । शचीपुरन्दराभ्यां नमः । मातापितृचरणकमलेभ्यो नमः । इष्टदेवताभ्यो नमः । कुलदेवताभ्यो नमः । ग्रामदेवताभ्यो नमः । वास्तुदेवताभ्यो नमः । स्थानदेवताभ्यो नमः । सर्वेभ्यो देवेभ्यो नमः । सर्वेभ्यो ब्राह्मणेभ्यो नमः । ॐ सिद्धि-बुद्धिसहिताय श्रीमन्महागणाधिपतये नमः ।

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः ।।
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ।।
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
सङ्ग्रामे संकटे चैव विघ्नस्तस्य न जायते ।।
शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ।

सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ।।
सर्वमङ्गलमाङ्गल्ये! शिवे! सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके! गौरि नारायणि नमोऽस्तु ते ।।
सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् ।
येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः ।।
तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्याबलं देवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ।।
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ।।
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ।।
अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ।।
स्मृतेः सकलकल्याणभाजनं यत्र जायते ।
पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् ।।
सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः ।
देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ।।
विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च भैरवम् ।
वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम् ।।
वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ।।

ॐ गणेशाम्बिकाभ्यां नमः ।।

हाथमें लिये अक्षत-पुष्पको गणेशाम्बिकापर चढ़ा दे। इसके बाद दाहिने हाथमें जल, अक्षत और द्रव्य लेकर संकल्प करे।

(क) निष्काम संकल्प

ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य ब्रह्मणो द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे वैवस्वत-मन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भारतवर्षे आर्यावर्तैकदेशे.....नगरे/ग्रामे/क्षेत्रे (अविमुक्तवाराणसी-क्षेत्रे आनन्दवने महाश्मशाने गौरीमुखे त्रिकण्टकविराजिते)......वैक्रमाब्दे...संवत्सरे...मासे... शुक्ल/कृष्णपक्षे...तिथौ...वासरे...प्रातः/सायंकाले....गोत्रः....शर्मा/वर्मा/गुप्तः अहं ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं....देवस्य पूजनं करिष्ये ।

(ख) सकाम संकल्प

यदि सकाम पूजा करनी हो तो कामना-विशेषका नाम लेना चाहिये—या निम्नलिखित संकल्प करना चाहिये—

........अहं श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं मम सकुटुम्बस्य सपरिवारस्य क्षेमस्थैर्यायुरारोग्यैश्वर्याभिवृद्ध्यर्थमाधिभौतिकाधि-दैविकाध्यात्मिकत्रिविधतापशमनार्थं धर्मार्थकाममोक्षफलप्राप्त्यर्थं नित्यकल्याणलाभाय भगवत्प्रीत्यर्थं....देवस्य पूजनं करिष्ये ।

न्यास

संकल्पके पश्चात् न्यास करे[१]। मन्त्र बोलते हुए दाहिने हाथसे कोष्ठमें निर्दिष्ट अंगोंका स्पर्श करे।

अङ्गन्यास[२]

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिँ्सर्वत स्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ।। (बायाँ हाथ)
पुरुष एवेद्ँसर्वं यद्भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ।। (दाहिना हाथ)
एतावानस्य महिमातो ज्यायाँश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।। (बायाँ पैर)
त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत् पुनः ।
ततो विष्वङ् व्यक्रामत्साशनानशने अभि ।। (दाहिना पैर)
ततो विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ।। (वाम जानु)
तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् ।
पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ।। (दक्षिण जानु)
तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दाँ्सि जज्ञिरे तस्माद्यजुस्तस्मादजायत ।। (वाम कटिभाग)
तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ।। (दक्षिण कटिभाग)
तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ।। (नाभि)
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्यासीत् किं बाहू किमूरू पादा उच्येते ।। (हृदय)

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्याँ्शूद्रो अजायत ।। (वाम बाहु)
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ।। (दक्षिण बाहु)
नाभ्या आसीदन्तरिक्षँ्शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ २ अकल्पयन् ।। (कण्ठ)
यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ।। (मुख)
सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ।। (आँख)
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ।। (मूर्धा)

पञ्चाङ्गन्यास

अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे ।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ।। (हृदय)
वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय ।। (सिर)
प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा वि जायते ।
तस्य योनिं परि पश्यन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा ।। (शिखा)
यो देवेभ्य आतपति यो देवानां पुरोहितः । (कवचाय हुम्, दोनों कंधोंका स्पर्श करे)
पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ।।
रुचं ब्राह्मं जनयन्तो देवा अग्रे तदब्रुवन् ।
यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन् वशे ।। (अस्त्राय फट्, बायीं हथेलीपर ताली बजाये)

करन्यास

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्याँ्शूद्रो अजायत ।। अङ्गुष्ठाभ्यां नमः । (दोनों अंगूठोंका स्पर्श करे)
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ।। तर्जनीभ्यां नमः । (दोनों

तर्जनियोंका ,,)

नाभ्यां आसीदन्तरिक्षँ शीर्ष्णो द्यौः समवर्तत ।

पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ २ अकल्पयन् ।। मध्यमाभ्यां नमः । (दोनों मध्यमाओंका,,)

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।

वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ।। अनामिकाभ्यां नमः । (दोनों अनामिकाओंका,,)

सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः ।

देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ।। कनिष्ठिकाभ्यां नमः । (दोनों कनिष्ठिकाओंका,,)

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।

ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ।।

करतलकरपृष्ठाभ्यां नमः । (दोनों करतल और करपृष्ठोंका स्पर्श करे)

गणपति और गौरीकी पूजा

(पूजामें जो वस्तु विद्यमान न हो उसके लिये **'मनसा परिकल्प्य समर्पयामि'** कहे। जैसे, आभूषणके लिये **'आभूषणं मनसा परिकल्प्य समर्पयामि'।**)

हाथमें अक्षत लेकर ध्यान करे—

भगवान् गणेशका ध्यान—

गजाननं भूतगणादिसेवितं कपित्थजम्बूफलचारुभक्षणम् ।
उमासुतं शोकविनाशकारकं नमामि विघ्नेश्वरपादपङ्कजम् ।।

भगवती गौरीका ध्यान—

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ।।
श्रीगणेशाम्बिकाभ्यां नमः, ध्यानं समर्पयामि ।

भगवान् गणेशका आवाहन—

ॐ गणानां त्वा गणपतिँहवामहे प्रियाणां त्वा प्रियपतिँहवामहे निधीनां त्वा निधिपतिँहवामहे वसो मम । आहमजानि गर्भधमा त्वमजासि गर्भधम् ।। (यजुर्वेद २३।१९)

एह्येहि हेरम्ब महेशपुत्र समस्तविघ्नौघविनाशदक्ष ।
माङ्गल्यपूजाप्रथमप्रधान गृहाण पूजां भगवन् नमस्ते ।।

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहिताय गणपतये नमः, गणपतिमावाहयामि, स्थापयामि, पूजयामि च ।

हाथके अक्षत गणेशजीपर चढ़ा दे। फिर अक्षत लेकर गणेशजीकी दाहिनी ओर गौरीजीका आवाहन करे।

भगवती गौरीका आवाहन—

ॐ अम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन ।
ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ।।

(शु० य० २३।१८)

हेमाद्रितनयां देवीं वरदां शङ्करप्रियाम् ।
लम्बोदरस्य जननीं गौरीमावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः गौर्यै नमः, गौरीमावाहयामि, स्थापयामि, पूजयामि च ।

प्रतिष्ठा—ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञँसमिमं दधातु । विश्वे देवास इह मादयन्तामो३ म्प्रतिष्ठ ।।

(यजुर्वेद २।१३)

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च ।
अस्यै देवत्वमर्चायै मामहेति च कश्चन ।।
गणेशाम्बिके! सुप्रतिष्ठिते वरदे भवेताम् ।

प्रतिष्ठापूर्वकम् आसनार्थे अक्षतान् समर्पयामि गणेशाम्बिकाभ्यां नमः । (आसनके लिये अक्षत समर्पित करे।)

पाद्य, अर्घ्य, आचमनीय, स्नानीय, पुनराचमनीय ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । (यजु० १।१०)

एतानि पाद्यार्घ्याचमनीयस्नानीयपुनराचमनीयानि समर्पयामि गणेशाम्बिकाभ्यां नमः । (इतना कहकर जल चढ़ा दे।)

दुग्धस्नान—ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः ।
पयस्वतीः प्रदिशः सन्तु मह्यम् ।।

(यजुर्वेद १८।३६)

कामधेनुसमुद्भूतं सर्वेषां जीवनं परम् ।
पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, पयःस्नानं समर्पयामि । (दूधसे स्नान कराये।)

दधिस्नान—ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत्प्र ण आयूँषि तारिषत् ।।

(यजु० २३।३२)

पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ।

दध्यानीतं मया देव स्नानार्थं प्रतिगृह्यताम् ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, दधिस्नानं समर्पयामि । (दधिसे स्नान कराये)।

घृतस्नान—ॐ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ।
अनुष्वधमा वह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ।।

(यजु० १७।८८)

नवनीतसमुत्पन्नं सर्वसंतोषकारकम् ।।
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, घृतस्नानं समर्पयामि । (घृतसे स्नान कराये)।

मधुस्नान—ॐ मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ।।
मधु नक्तमुतोषसो मधुमत्पार्थिवँ्रजः । मधु द्यौरस्तु नः पिता ।।

(यजु० १३।२७-२८)

पुष्परेणुसमुद्भूतं सुस्वादु मधुरं मधु ।
तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, मधुस्नानं समर्पयामि । (मधुसे स्नान कराये।)

शर्करास्नान—ॐ अपाँ् रसमुद्वयसँ् सूर्ये सन्तँ् समाहितम् । अपाँ् रसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ।। (यजु० ९।३)
इक्षुरससमुद्भूतां शर्करां पुष्टिदां शुभाम् ।
मलापहारिकां दिव्यां स्नानार्थं प्रतिगृह्यताम् ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, शर्करास्नानं समर्पयामि । (शर्करासे स्नान कराये।)

पञ्चामृतस्नान—ॐ पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः ।
सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ।।

(यजु० ३४।११)

पञ्चामृतं मयानीतं पयो दधि घृतं मधु ।
शर्करया समायुक्तं स्नानार्थं प्रतिगृह्यताम् ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, पञ्चामृतस्नानं समर्पयामि ।

(पञ्चामृतसे स्नान कराये।)

गन्धोदकस्नान—ॐ अँ्शुना ते अँ्शुः पृच्यतां परुषा परुः ।
गन्धस्ते सोममवतु मदाय रसो अच्युतः ।।

(यजु० २०।२७)

मलयाचलसम्भूतचन्दनेन विनिःसृतम् ।
इदं गन्धोदकस्नानं कुङ्कुमाक्तं च गृह्यताम् ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, गन्धोदकस्नानं समर्पयामि । (गन्धोदकसे स्नान कराये।)

शुद्धोदकस्नान—ॐ शुद्धवालः सर्वशुद्धवालो मणिवालस्त आश्विनाः
श्येतः श्येताक्षोऽरुणस्ते रुद्राय पशुपतये कर्णा
यामा अवलिप्ता रौद्रा नभोरूपाः पार्जन्याः ।।

(यजु० २४।३)

गङ्गा च यमुना चैव गोदावरी सरस्वती ।
नर्मदा सिन्धुकावेरी स्नानार्थं प्रतिगृह्यताम् ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, शुद्धोदकस्नानं समर्पयामि । (शुद्ध जलसे स्नान कराये।)

आचमन—शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि । (आचमनके लिये जल दे।)

वस्त्र—ॐ युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः ।
तं धीरासः कवय उन्नयन्ति स्वाध्यो३ मनसा देवयन्तः ।।

(ऋग्० ३।८।४)

शीतवातोष्णसंत्राणं लज्जाया रक्षणं परम् ।
देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, वस्त्रं समर्पयामि । (वस्त्र समर्पित करे।)

आचमन—वस्त्रान्ते आचमनीयं जलं समर्पयामि । (आचमनके लिये जल दे।)

उपवस्त्र—ॐ सुजातो ज्योतिषा सह शर्म वरूथमाऽसदत्स्वः ।
वासो अग्ने विश्वरूपँ् सं व्ययस्व विभावसो ।।

(यजु० ११।४०)

यस्याभावेन शास्त्रोक्तं कर्म किञ्चिन्न सिध्यति ।
उपवस्त्रं प्रयच्छामि सर्वकर्मोपकारकम् ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, उपवस्त्रं (उपवस्त्राभावे रक्तसूत्रम् समर्पयामि) । (उपवस्त्र समर्पित करे।)

आचमन—उपवस्त्रान्ते आचमनीयं जलं समर्पयामि । (आचमनके लिये जल दे।)

यज्ञोपवीत—ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ।।
यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि ।
नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् ।
उपवीतं मया दत्तं गृहाण परमेश्वर ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, यज्ञोपवीतं समर्पयामि । (यज्ञोपवीत समर्पित करे।)

आचमन—यज्ञोपवीतान्ते आचमनीयं जलं समर्पयामि । (आचमनके लिये जल दे।)

चन्दन—ॐ त्वां गन्धर्वा अखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः ।
त्वामोषधे सोमो राजा विद्वान् यक्ष्मादमुच्यत ।।

(यजु० १२।९८)

श्रीखण्डचन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।
विलेपनं सुरश्रेष्ठ! चन्दनं प्रतिगृह्यताम् ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, चन्दनानुलेपनं समर्पयामि । (चन्दन अर्पित करे।)

अक्षत—ॐ अक्षन्नमीमदन्त ह्यव प्रिया अधूषत ।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी ।।

(यजु० ३।५१)

अक्षताश्च सुरश्रेष्ठ कुङ्कुमाक्ताः सुशोभिताः ।
मया निवेदिता भक्त्या गृहाण परमेश्वर ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, अक्षतान् समर्पयामि । (अक्षत चढ़ाये।)

पुष्पमाला—ॐ ओषधीः प्रति मोदध्वं पुष्पवतीः प्रसूवरीः ।
अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ।।

(यजु० १२।७७)

माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।
मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, पुष्पमालां समर्पयामि । (पुष्पमाला समर्पित करे।)

दूर्वा—ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ।
एवा नो दूर्वे प्र तनु सहस्रेण शतेन च ।।

(यजु० १३।२०)

दूर्वाङ्कुरान् सुहरितानमृतान् मङ्गलप्रदान् ।
आनीतांस्तव पूजार्थं गृहाण गणनायक ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, दूर्वाङ्कुरान् समर्पयामि । (दूर्वाङ्कुर चढ़ाये।)

सिन्दूर—ॐ सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः ।
घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ।।

(यजु० १७।९५)

सिन्दूरं शोभनं रक्तं सौभाग्यं सुखवर्धनम् ।
शुभदं कामदं चैव सिन्दूरं प्रतिगृह्यताम् ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, सिन्दूरं समर्पयामि । (सिन्दूर अर्पित करे।)

अबीर-गुलाल आदि नाना परिमल द्रव्य

ॐ अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः । हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमाँ् सं परि पातु विश्वतः ।।

(यजु० २९।५१)

अबीरं च गुलालं च हरिद्रादिसमन्वितम् ।
नाना परिमलं द्रव्यं गृहाण परमेश्वर ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, नानापरिमलद्रव्याणि समर्पयामि । (अबीर आदि चढ़ाये।)

सुगन्धिद्रव्य— ॐ अहिरिव .... विश्वतः ।।
दिव्यगन्धसमायुक्तं महापरिमलाद्भुतम् ।
गन्धद्रव्यमिदं भक्त्या दत्तं वै परिगृह्यताम् ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, सुगन्धिद्रव्यं समर्पयामि । (सुगन्धित द्रव्य अर्पण करे।)

धूप—ॐ धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वामः ।
देवानामसि वह्नितमँ्सस्नितमं पप्रितमं जुष्टतमं देवहूतमम् ।।

(यजु० १।८)

वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, धूपमाघ्रापयामि । (धूप दिखाये।)

दीप—ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा ।
अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा ।।
ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा ।। (यजु० ३।९)

साज्यं च वर्तिसंयुक्तं वह्निा योजितं मया ।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ।।
भक्त्या दीपं प्रयच्छामि देवाय परमात्मने ।
त्राहि मां निरयाद् घोराद् दीपज्योतिर्नमोऽस्तु ते ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, दीपं दर्शयामि । (दीप दिखाये।)

हस्तप्रक्षालन—'ॐ हृषीकेशाय नमः' कहकर हाथ धो ले।

नैवेद्य—नैवेद्यको प्रोक्षित कर गन्ध-पुष्पसे आच्छादित करे। तदनन्तर जलसे चतुष्कोण घेरा लगाकर भगवान्के आगे रखे।

ॐ नाभ्या आसीदन्तरिक्षँ्शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ अकल्पयन् ।।

(यजु० ३१।१३)

शर्कराखण्डखाद्यानि दधिक्षीरघृतानि च ।
आहारं भक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम् ।।

ॐ अमृतोपस्तरणमसि स्वाहा ।

ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ समानाय स्वाहा ।

ॐ उदानाय स्वाहा । ॐ व्यानाय स्वाहा । ॐ अमृतापिधानमसि स्वाहा ।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, नैवेद्यं निवेदयामि । (नैवेद्य निवेदित करे।)

नैवेद्यान्ते आचमनीयं जलं समर्पयामि । मध्ये पानीयं जलं, उत्तरापोऽशनं समर्पयामि । (जल समर्पित करे।)

करोद्वर्तन—ॐ अँ्शुना ते अँ्शुः पृच्यतां परुषा परुः ।
गन्धस्ते सोममवतु मदाय रसो अच्युतः ।।

(यजु० २०।२७)

चन्दनं मलयोद्भूतं कस्तूर्यादिसमन्वितम् ।
करोद्वर्तनकं देव गृहाण परमेश्वर ॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, करोद्वर्तनकं चन्दनं समर्पयामि । (दोनों हाथोंकी अनामिका अंगुलिसे मलयचन्दन समर्पित करे।)

ऋतुफल—ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वँ् हसः ॥

(यजु० १२।८९)

इदं फलं मया देव स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, ऋतुफलानि समर्पयामि । (ऋतुफल अर्पित करे।)

ताम्बूल—ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥

(यजु० ३१।१४)

पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ।
एलादिचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, मुखवासार्थम् एलालवंगपूगीफलसहितं ताम्बूलं समर्पयामि । (इलायची, लौंग-सुपारीके साथ ताम्बूल अर्पित करे।)

दक्षिणा—ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥

(यजु० १३।४)

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, कृतायाः पूजायाः साद्गुण्यार्थे द्रव्यदक्षिणां समर्पयामि । (द्रव्य दक्षिणा समर्पित करे।)

आरती—ॐ इदँ् हविः प्रजननं मे अस्तु दशवीरँ् सर्वगणँ् स्वस्तये ।
आत्मसनि प्रजासनि पशुसनि लोकसन्यभयसनि ।
अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतो अस्मासु धत्त ॥

(यजु० १९।४८)

ॐ आ रात्रि पार्थिवँ् रजः पितुरप्रायि धामभिः ।
दिवः सदाँ् सि बृहती वि तिष्ठस आ त्वेषं वर्तते तमः ।।

(यजु० ३४।३२)

कदलीगर्भसम्भूतं कर्पूरं तु प्रदीपितम् ।
आरार्तिकमहं कुर्वे पश्य मे वरदो भव ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, आरार्तिकं समर्पयामि । (कर्पूरकी आरती करे, आरतीके बाद जल गिरा दे।)

पुष्पाञ्जलि—ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ।।

(यजु० ३१।१६)

ॐ गणानां त्वा............... ।। (पृ० १९०)
ॐ अम्बे अम्बिके.......... ।। (पृ० १९०)
नानासुगन्धिपुष्पाणि यथाकालोद्भवानि च ।
पुष्पाञ्जलिर्मया दत्तो गृहाण परमेश्वर ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, पुष्पाञ्जलिं समर्पयामि । (पुष्पाञ्जलि अर्पित करे।)

प्रदक्षिणा—ॐ ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः ।
तेषाँ् सहस्रयोजनेऽव धन्वानि तन्मसि ।।

(यजु० १६।६१)

यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, प्रदक्षिणां समर्पयामि । (प्रदक्षिणा करे।)

विशेषार्घ्य—ताम्रपात्रमें जल, चन्दन, अक्षत, फल, फूल, दूर्वा और दक्षिणा रखकर अर्घ्यपात्रको हाथमें लेकर निम्नलिखित मन्त्र पढ़े—

रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक ।
भक्तानामभयं कर्ता त्राता भव भवार्णवात् ।।
द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो ।
वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद ।।
अनेन सफलार्घ्येण वरदोऽस्तु सदा मम ।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, विशेषार्घ्यं समर्पयामि । (विशेषार्घ्य

दे।)

प्रार्थना—विघ्नेश्वराय वरदाय सुरप्रियाय
लम्बोदराय सकलाय जगद्धिताय ।
नागाननाय श्रुतियज्ञविभूषिताय
गौरीसुताय गणनाथ नमो नमस्ते ।।
भक्तार्तिनाशनपराय गणेश्वराय
सर्वेश्वराय शुभदाय सुरेश्वराय ।
विद्याधराय विकटाय च वामनाय
भक्तप्रसन्नवरदाय नमो नमस्ते ।।
नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः
नमस्ते रुद्ररूपाय करिरूपाय ते नमः ।
विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे
भक्तप्रियाय देवाय नमस्तुभ्यं विनायक ।।
त्वां विघ्नशत्रुदलनेति च सुन्दरेति
भक्तप्रियेति सुखदेति फलप्रदेति ।
विद्याप्रदेत्यघहरेति च ये स्तुवन्ति
तेभ्यो गणेश वरदो भव नित्यमेव ।।
त्वं वैष्णवी शक्तिरनन्तवीर्या
विश्वस्य बीजं परमासि माया ।
सम्मोहितं देवि समस्तमेतत्
त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ।।

ॐ भूर्भुवः स्वः गणेशाम्बिकाभ्यां नमः, प्रार्थनापूर्वकं नमस्कारान् समर्पयामि । (साष्टाङ्ग नमस्कार करे।)

गणेशपूजने कर्म यन्न्यूनमधिकं कृतम् ।
तेन सर्वेण सर्वात्मा प्रसन्नोऽस्तु सदा मम ।।
अनया पूजया गणेशाम्बिके प्रीयेताम्, न मम ।

(ऐसा कहकर समस्त पूजनकर्म भगवान्‌को समर्पित कर दे)* तथा पुनः नमस्कार करे।

१-**यथा देवे तथा देहे न्यासं कुर्याद् विधानतः ।** (बृहत्पाराशरस्मृति ४।१३५)

२-बृहत्पाराशरस्मृतिके अध्याय ४ में यह विधान श्लोक १२४ से १२८ तक है।

(पूजन आदिमें अंगन्यास, करन्यास आदि करनेका विशेष फल है, करना चाहिये। क्योंकि न्याससे मनुष्यमें देवत्वका आधान होता है।)

* अचल प्रतिमाका विसर्जन नहीं किया जाता, किंतु आवाहित एवं प्रतिष्ठित

देव-प्रतिमाओंका विसर्जन करना चाहिये।

कलश-स्थापन

कलशमें रोलीसे स्वस्तिकका चिह्न बनाकर गलेमें तीन धागावाली मौली लपेटे और कलशको एक ओर रख ले। कलश स्थापित किये जानेवाली भूमि अथवा पाटेपर कुङ्कुम या रोलीसे अष्टदलकमल बनाकर निम्न मन्त्रसे भूमिका स्पर्श करे—

**भूमिका स्पर्श—ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री।
पृथिवीं यच्छ पृथिवीं दृँ ह पृथिवीं मा हिँ सीः ।।**

निम्नलिखित मन्त्र पढ़कर पूजित भूमिपर सप्तधान्य[१] अथवा गेहूँ, चावल या जौ[२] रख दे—

धान्यप्रक्षेप—ॐ धान्यमसि धिनुहि देवान् प्राणाय त्वो दानाय त्वा व्यानाय त्वा । दीर्घामनु प्रसितिमायुषे धां देवो वः सविता हिरण्यपाणिः प्रति गृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोऽसि ।।

इस धान्यपर निम्नलिखित मन्त्र पढ़कर कलशकी स्थापना करे—

कलश-स्थापन—ॐ आ जिघ्र कलशं मह्या त्वा विशन्त्विन्दवः । पुनरूर्जा नि वर्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्मा विशताद्रयिः ।।

कलशमें जल—ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमा सीद ।।
(इस मन्त्रसे जल छोड़े।)

**कलशमें चन्दन—ॐ त्वां गन्धर्वा अखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः ।
त्वामोषधे सोमो राजा विद्वान् यक्ष्मादमुच्यत ।।**

(चन्दन छोड़े।)

**कलशमें सर्वौषधि[१]—ॐ या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ।
मनै नु बभ्रूणामहँ शतं धामानि सप्त च ।।**

(सर्वौषधि छोड़ दे।)

**कलशमें दूब—ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ।
एवा नो दूर्वे प्र तनु सहस्रेण शतेन च ।।**

(दूब छोड़े।)

कलशपर पञ्चपल्लव[२]—ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ।
गोभाज इत्किलासथ यत्सनवथ पूरुषम् ।।

(पञ्चपल्लव रख दे।)

कलशमें पवित्री— ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ।।

(कुश छोड़ दे।)

कलशमें सप्तमृत्तिका[३]—ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः । (सप्तमृत्तिका छोड़े।)

कलशमें सुपारी—ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वँहसः ।। (सुपारी छोड़े।)

कलशमें पञ्चरत्न[*]—ॐ परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे । (पञ्चरत्न छोड़े।)

कलशमें द्रव्य—ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ।। (द्रव्य छोड़े।)

निम्नलिखित मन्त्र पढ़कर कलशको वस्त्रसे अलंकृत करे—

कलशपर वस्त्र—ॐ सुजातो ज्योतिषा सह शर्म वरूथमाऽसदत्स्वः ।
वासो अग्ने विश्वरूपँ् सं व्ययस्व विभावसो ।।

कलशपर पूर्णपात्र—ॐ पूर्णा दर्वि परा पत सुपूर्णा पुनरा पत ।
वस्नेव विक्रीणावहा इषमूर्जँ् शतक्रतो ।।

चावलसे भरे पूर्णपात्रको कलशपर स्थापित करे और उसपर लाल कपड़ा लपेटे हुए नारियलको निम्न मन्त्र पढ़कर रखे—

कलशपर नारियल—ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वँ् हसः ।।

अब कलशमें देवी-देवताओंका आवाहन करना चाहिये। सबसे पहले हाथमें अक्षत और पुष्प लेकर निम्नलिखित मन्त्रसे वरुणका आवाहन करे—

कलशमें वरुणका ध्यान और आवाहन—

ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशँ् स मा न आयुः प्र मोषीः ।।
अस्मिन् कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकमावाहयामि ।

ॐ भूर्भुवः स्वः भो वरुण! इहागच्छ, इह तिष्ठ, स्थापयामि, पूजयामि, मम पूजां गृहाण । 'ॐ अपां पतये वरुणाय नमः' कहकर अक्षत-पुष्प कलशपर छोड़ दे।

फिर हाथमें अक्षत-पुष्प लेकर चारों वेद एवं अन्य देवी-देवताओंका आवाहन करे—

कलशमें देवी-देवताओंका आवाहन—

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ।।
कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ।।
अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः ।
अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा ।।
आयान्तु देवपूजार्थं दुरितक्षयकारकाः ।
गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धूकावेरि जलेऽस्मिन् सन्निधिं कुरु ।।
सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः ।।

इस तरह जलाधिपति वरुणदेव तथा वेदों, तीर्थों, नदों, नदियों, सागरों, देवियों एवं देवताओंके आवाहनके बाद हाथमें अक्षत-पुष्प लेकर निम्नलिखित मन्त्रसे कलशकी प्रतिष्ठा करे—

प्रतिष्ठा—ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञँ् समिमं दधातु । विश्वे देवास इह मादयन्तामो ३ म्प्रतिष्ठ ।।
कलशे वरुणाद्यावाहितदेवताः सुप्रतिष्ठिता वरदा भवन्तु ।
ॐ वरुणाद्यावाहितदेवताभ्यो नमः ।

—यह कहकर अक्षत-पुष्प कलशके पास छोड़ दे।

ध्यान—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, ध्यानार्थे पुष्पं समर्पयामि । (पुष्प समर्पित करे।)

आसन—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, आसनार्थे अक्षतान् समर्पयामि । (अक्षत रखे।)

पाद्य—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, पादयोः पाद्यं समर्पयामि । (जल चढ़ाये।)

अर्घ्य—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, हस्तयोरर्घ्यं समर्पयामि । (जल चढ़ाये।)

स्नानीय जल—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, स्नानीयं जलं समर्पयामि । (स्नानीय जल चढ़ाये।)

स्नानाङ्ग आचमन—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, स्नानान्ते आचमनीयं जलं समर्पयामि । (आचमनीय जल चढ़ाये।)

पञ्चामृतस्नान—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, पञ्चामृतस्नानं समर्पयामि । (पञ्चामृतसे स्नान कराये।)

गन्धोदकस्नान—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, गन्धोदकस्नानं समर्पयामि । (जलमें मलयचन्दन मिलाकर स्नान कराये।)

शुद्धोदकस्नान—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, स्नानान्ते शुद्धोदकस्नानं समर्पयामि । (शुद्ध जलसे स्नान कराये।)

आचमन—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि । (आचमनके लिये जल चढ़ाये।)

वस्त्र—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, वस्त्रं समर्पयामि । (वस्त्र चढ़ाये।)

आचमन—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, वस्त्रान्ते आचमनीयं जलं समर्पयामि । (आचमनके लिये जल चढ़ाये।)

यज्ञोपवीत—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, यज्ञोपवीतं समर्पयामि । (यज्ञोपवीत चढ़ाये।)

आचमन—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, यज्ञोपवीतान्ते आचमनीयं जलं समर्पयामि । (आचमनके लिये जल चढ़ाये।)

उपवस्त्र—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, उपवस्त्रं (उपवस्त्रार्थे रक्तसूत्रम्) समर्पयामि । (उपवस्त्र चढ़ाये।)

आचमन—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, उपवस्त्रान्ते आचमनीयं जलं समर्पयामि । (आचमनके लिये जल चढ़ाये।)

चन्दन—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, चन्दनं समर्पयामि । (चन्दन लगाये।)

अक्षत—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, अक्षतान् समर्पयामि । (अक्षत समर्पित करे।)

पुष्प (पुष्पमाला)—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, पुष्पं (पुष्पमालाम्) समर्पयामि । (पुष्प और पुष्पमाला चढ़ाये।)

नानापरिमल-द्रव्य—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, नानापरिमलद्रव्याणि समर्पयामि । (विविध परिमल द्रव्य समर्पित करे।)

सुगन्धित द्रव्य—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, सुगन्धितद्रव्यं समर्पयामि । (सुगन्धित द्रव्य (इत्र आदि) चढ़ाये।)

धूप—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, धूपमाघ्रापयामि । (धूप आघ्रापित कराये।)

दीप—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, दीपं दर्शयामि । (दीप दिखाये।)

हस्तप्रक्षालन—दीप दिखाकर हाथ धो ले।

नैवेद्य—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, सर्वविधं नैवेद्यं निवेदयामि । (नैवेद्य निवेदित करे।)

आचमन आदि—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, आचमनीयं जलम्, मध्ये पानीयं जलम्, उत्तरापोऽशने, मुख-प्रक्षालनार्थे, हस्तप्रक्षालनार्थे च जलं समर्पयामि । (आचमनीय एवं पानीय तथा मुख और हस्त-प्रक्षालनके लिये जल चढ़ाये।)

करोद्वर्तन—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, करोद्वर्तनं समर्पयामि । (करोद्वर्तनके लिये गन्ध समर्पित करे।)

ताम्बूल—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, ताम्बूलं समर्पयामि । (सुपारी, इलायची, लौंगसहित पान चढ़ाये।)

दक्षिणा—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, कृतायाः पूजायाः साद्‌गुण्यार्थे द्रव्यदक्षिणां समर्पयामि । (द्रव्य-दक्षिणा चढ़ाये।)

आरती—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, आरार्तिकं समर्पयामि । (आरती करे।)

पुष्पाञ्जलि—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, मन्त्रपुष्पाञ्जलिं समर्पयामि । (पुष्पाञ्जलि समर्पित करे।)

प्रदक्षिणा—ॐ वरुणाद्यावाहितदेवताभ्यो नमः, प्रदक्षिणां समर्पयामि । (प्रदक्षिणा करे।)

हाथमें पुष्प लेकर इस प्रकार प्रार्थना करे—

प्रार्थना—देवदानवसंवादे मथ्यमाने महोदधौ ।
उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ।।
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ।।
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ।
आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ।।
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ।
त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव ।
सांनिध्यं कुरु मे देव प्रसन्नो भव सर्वदा ।।
नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय ।
सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते ।।
'ॐ अपां पतये वरुणाय नमः ।'

नमस्कार— ॐ वरुणाद्यावाहितदेवताभ्यो नमः, प्रार्थनापूर्वकं नमस्कारान् समर्पयामि । (इस नाम-मन्त्रसे नमस्कारपूर्वक पुष्प समर्पित करे।)

अब हाथमें जल लेकर निम्नलिखित वाक्यका उच्चारण कर जल कलशके पास

छोड़ते हुए समस्त पूजन-कर्म भगवान् वरुणदेवको निवेदित करे—

समर्पण—कृतेन अनेन पूजनेन कलशे वरुणाद्यावाहितदेवताः प्रीयन्तां न मम ।

१-जौ, धान, तिल, कँगनी, मूँग, चना, साँवा—ये सप्तधान्य कहलाते हैं—

यवधान्यतिलाः कंगुः मुद्गचणकश्यामकाः । एतानि सप्तधान्यानि सर्वकार्येषु योजयेत् ।।

२-नवरात्र आदिमें स्थापित कलशको कई दिनोंतक सुरक्षित रखना पड़ता है, ऐसे अवसरोंपर शुद्ध मिट्टी बिछा दी जाती है और उसपर जौ बो दिया जाता है। नवरात्रमें इस उगे हुए जौको देवताओंपर चढ़ाया जाता है। ब्राह्मणलोग उसे आशीर्वादके रूपमें बाँटा करते हैं।

१-**मुरा माँसी वचा कुष्ठं शैलेयं रजनीद्वयम् ।**
सटी चम्पकमुस्ता च सर्वौषधिगणः स्मृतः ।। (अग्निपु० १७७।१७)

मुरा, जटामाँसी, वच, कुष्ठ, शिलाजीत, हल्दी और दारुहल्दी, सटी (कचूर), चम्पक, मुस्ता—ये सर्वोषधि कहलाती हैं।

२-**न्यग्रोधोदुम्बरोऽश्वत्थः चूतप्लक्षस्तथैव च ।**

बरगद, गूलर, पीपल, आम, पाकड़—ये पञ्चपल्लव हैं।

३-**अश्वस्थानाद्गजस्थानाद्वल्मीकात्सङ्गमाद्ध्रदात् ।**
राजद्वाराच्च गोष्ठाच्च मृदमानीय निक्षिपेत् ।।

घुड़साल, हाथीसाल, बाँबी, नदियोंके संगम, तालाब, राजाके द्वार और गोशाला—इन सात स्थानोंकी मिट्टीको सप्तमृत्तिका कहते हैं।

* **कनकं कुलिशं मुक्ता पद्मरागं च नीलकम् । एतानि पञ्चरत्नानि सर्वकार्येषु योजयेत् ।।**

सोना, हीरा, मोती, पद्मराग और नीलम—ये पञ्चरत्न कहे जाते हैं।

पुण्याहवाचन[१]

पुण्याहवाचनके दिन आरम्भमें वरुण-कलशके पास जलसे भरा एक पात्र (कलश) भी रख दे। वरुण-कलशके पूजनके साथ-साथ इसका भी पूजन कर लेना चाहिये। पुण्याहवाचनका कर्म इसीसे किया जाता है। सबसे पहले वरुणकी प्रार्थना करे[२]।

वरुण-प्रार्थना—ॐ पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायक ।
पुण्याहवाचनं यावत् तावत् त्वं सुस्थिरो भव ।।

यजमान अपनी दाहिनी ओर पुण्याहवाचन-कर्मके लिये वरण किये हुए युग्म ब्राह्मणोंको, जिनका मुख उत्तरकी ओर हो, बैठा ले। इसके बाद यजमान घुटने टेककर कमलकी कोंढ़ीकी तरह अञ्जलि बनाकर सिरसे लगाकर तीन बार प्रणाम करे। तब आचार्य अपने दाहिने हाथसे स्वर्णयुक्त उस जलपात्र (लोटे)-को यजमानकी अञ्जलिमें रख दे। यजमान उसे सिरसे लगाकर निम्नलिखित मन्त्र पढ़कर ब्राह्मणोंसे अपनी दीर्घ आयुका आशीर्वाद माँगे—

यजमान—ॐ दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च ।
तेनायुःप्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु ।।

यजमानकी इस प्रार्थनापर ब्राह्मण निम्नलिखित आशीर्वचन बोलें—**ब्राह्मण—अस्तु दीर्घमायुः ।**

अब यजमान ब्राह्मणोंसे फिर आशीर्वाद माँगे—

यजमान—

ॐ त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः । अतो धर्माणि धारयन् ।।

तेनायुःप्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु इति भवन्तो ब्रुवन्तु । ब्राह्मण—पुण्यं पुण्याहं दीर्घमायुरस्तु ।

यजमान और ब्राह्मणोंका यह संवाद इसी आनुपूर्वीसे दो बार और होना चाहिये। अर्थात् आशीर्वाद मिलनेके बाद यजमान कलशको सिरसे हटाकर कलशके स्थानपर रख दे। फिर इस कलशको सिरसे लगाकर—**'ॐ दीर्घा नागा नद्यो....रस्तु'** बोले। इसके बाद ब्राह्मण **'दीर्घमायुरस्तु'** बोलें। इसके बाद यजमान पहलेकी तरह कलशको कलश-स्थानपर रखकर फिर सिरसे लगाकर **'ॐ दीर्घा नाग....रस्तु'** कहकर आशीर्वाद माँगे और ब्राह्मण **'दीर्घमायुरस्तु'** यह कहकर आशीर्वाद दें।

यजमान—ॐ अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम् ।

ब्राह्मणानां करे न्यस्ताः शिवा आपो भवन्तु नः ।।

ॐ शिवा आपः सन्तु । ऐसा कहकर यजमान ब्राह्मणोंके हाथोंमें जल दे।

ब्राह्मण—सन्तु शिवा आपः ।

अब यजमान निम्नलिखित मन्त्र पढ़कर ब्राह्मणोंके हाथोंमें पुष्प दे—

यजमान—लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे ।
सा मे वसतु वै नित्यं सौमनस्यं सदास्तु मे ।। सौमनस्यमस्तु ।

ब्राह्मण—'अस्तु सौमनस्यम्' ऐसा कहकर ब्राह्मण पुष्पको स्वीकार करें। अब यजमान निम्नलिखित मन्त्र पढ़कर ब्राह्मणोंके हाथमें अक्षत दे—

यजमान—अक्षतं चास्तु मे पुण्यं दीर्घमायुर्यशोबलम् ।
यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ।। अक्षतं चारिष्टं चास्तु ।

ब्राह्मण—'अस्त्वक्षतमरिष्टं च' ।—ऐसा बोलकर ब्राह्मण अक्षतको स्वीकार करें। इसी प्रकार आगे यजमान ब्राह्मणोंके हाथोंमें चन्दन, अक्षत, पुष्प आदि देता जाय और ब्राह्मण इन्हें स्वीकार करते हुए यजमानकी मंगल-कामना करें।

यजमान—(चन्दन) **गन्धाः पान्तु ।**

ब्राह्मण—सौमङ्गल्यं चास्तु ।

यजमान—(अक्षत) **अक्षताः पान्तु ।**

ब्राह्मण—आयुष्यमस्तु ।

यजमान—(पुष्प) **पुष्पाणि पान्तु ।**

ब्राह्मण—सौश्रियमस्तु ।

यजमान—(सुपारी-पान) **सफलताम्बूलानि पान्तु ।**

ब्राह्मण—ऐश्वर्यमस्तु ।

यजमान—(दक्षिणा) **दक्षिणाः पान्तु ।**

ब्राह्मण—बहुदेयं चास्तु ।

यजमान—(जल) **आपः पान्तु ।**

ब्राह्मण—स्वर्चितमस्तु ।

यजमान—(हाथ जोड़कर) **दीर्घमायुः शान्तिः पुष्टिस्तुष्टिः श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं बहुधनं चायुष्यं चास्तु ।**

ब्राह्मण—'तथास्तु'—ऐसा कहकर ब्राह्मण यजमानके सिरपर कलशका जल छिड़ककर निम्नलिखित वचन बोलकर आशीर्वाद दें—

ॐ दीर्घमायुः शान्तिः पुष्टिस्तुष्टिश्चास्तु ।

यजमान—(अक्षत लेकर) **यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारम्भाः शुभाः शोभनाः प्रवर्तन्ते, तमहमोङ्कारमादिं कृत्वा यजुराशीर्वचनं**

बहुऋषिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये ।

ब्राह्मण—'वाच्यताम्'—ऐसा कहकर निम्न मन्त्रोंका पाठ करें—

ॐ द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत । नेष्ट्रादृतुभिरिष्यत ।। सविता त्वा सवानाँ् सुवतामग्निर्गृहपतीनाँ् सोमो वनस्पतीनाम् । बृहस्पतिर्वाच इन्द्रो ज्यैष्ठ्याय रुद्रः पशुभ्यो मित्रः सत्यो वरुणो धर्मपतीनाम् ।

न तद्रक्षाँ् सि न पिशाचास्तरन्ति देवानामोजः प्रथमजँ् ह्येतत् । यो बिभर्ति दाक्षायणँ् हिरण्यँ् स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ।

उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे । उग्रँ् शर्म महि श्रवः ।।

उपास्मै गायता नरः पवमानायेन्दवे । अभि देवाँ२ इयक्षते ।

यजमान—व्रतजपनियमतपःस्वाध्यायक्रतुशमदमदयादानविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम् ।

ब्राह्मण—समाहितमनसः स्मः ।

यजमान—प्रसीदन्तु भवन्तः ।

ब्राह्मण—प्रसन्नाः स्मः ।

इसके बाद यजमान पहलेसे रखे गये दो सकोरोंमेंसे पहले सकोरेमें आमके पल्लव या दूबसे थोड़ा-थोड़ा जल* कलशसे डाले और ब्राह्मण बोलते जायँ—

पहले पात्र (सकोरे) -में—ॐ शान्तिरस्तु । ॐ पुष्टिरस्तु । ॐ तुष्टिरस्तु । ॐ वृद्धिरस्तु । ॐ अविघ्नमस्तु । ॐ आयुष्यमस्तु । ॐ आरोग्यमस्तु । ॐ शिवमस्तु । ॐ शिवं कर्मास्तु । ॐ कर्मसमृद्धिरस्तु । ॐ धर्मसमृद्धिरस्तु । ॐ वेदसमृद्धिरस्तु । ॐ शास्त्रसमृद्धिरस्तु । ॐ धनधान्यसमृद्धिरस्तु । ॐ पुत्रपौत्रसमृद्धिरस्तु । ॐ इष्टसम्पदस्तु ।

दूसरे पात्र (सकोरे)-में—ॐ अरिष्टनिरसनमस्तु । ॐ यत्पापं रोगोऽशुभमकल्याणं तद् दूरे प्रतिहतमस्तु ।

पुनः पहले पात्रमें—ॐ यच्छ्रेयस्तदस्तु । ॐ उत्तरे कर्मणि निर्विघ्नमस्तु । ॐ उत्तरोत्तरमहरहरभिवृद्धिरस्तु । ॐ उत्तरोत्तराः क्रियाः शुभाः शोभनाः सम्पद्यन्ताम् । ॐ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नसम्पदस्तु । ॐ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयन्ताम् । ॐ तिथिकरणे समुहूर्ते सनक्षत्रे सग्रहे सलग्ने साधिदैवते प्रीयेताम् । ॐ दुर्गापाञ्चाल्यौ प्रीयेताम् । ॐ अग्निपुरोगा विश्वेदेवाः प्रीयन्ताम् । ॐ इन्द्रपुरोगा मरुद्गणाः प्रीयन्ताम् । ॐ वसिष्ठपुरोगा ऋषिगणाः प्रीयन्ताम् । ॐ माहेश्वरीपुरोगा उमामातरः प्रीयन्ताम् । ॐ अरुन्धतीपुरोगा एकपत्न्यः प्रीयन्ताम् । ॐ ब्रह्मपुरोगाः सर्वे वेदाः

प्रीयन्ताम् । ॐ विष्णुपुरोगाः सर्वे देवाः प्रीयन्ताम् । ॐ ऋषयश्छन्दांस्याचार्या वेदा देवा यज्ञाश्च प्रीयन्ताम् । ॐ ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम् । ॐ श्रीसरस्वत्यौ प्रीयेताम् । ॐ श्रद्धामेधे प्रीयेताम् । ॐ भगवती कात्यायनी प्रीयताम् । ॐ भगवती माहेश्वरी प्रीयताम् । ॐ भगवती ऋद्धिकरी प्रीयताम् । ॐ भगवती वृद्धिकरी प्रीयताम् । ॐ भगवती पुष्टिकरी प्रीयताम् । ॐ भगवती तुष्टिकरी प्रीयताम् । ॐ भगवन्तौ विघ्नविनायकौ प्रीयेताम् । ॐ सर्वाः कुलदेवताः प्रीयन्ताम् । ॐ सर्वा ग्रामदेवताः प्रीयन्ताम् । ॐ सर्वा इष्टदेवताः प्रीयन्ताम् ।

दूसरे पात्रमें— ॐ हताश्च ब्रह्मद्विषः । ॐ हताश्च परिपन्थिनः । ॐ हताश्च कर्मणो विघ्नकर्तारः । ॐ शत्रवः पराभवं यान्तु । ॐ शाम्यन्तु घोराणि । ॐ शाम्यन्तु पापानि । ॐ शाम्यन्त्वीतयः । ॐ शाम्यन्तूपद्रवाः ।।

पहले पात्रमें— ॐ शुभानि वर्धन्ताम् । ॐ शिवा आपः सन्तु । ॐ शिवा ऋतवः सन्तु । ॐ शिवा ओषधयः सन्तु । ॐ शिवा वनस्पतयः सन्तु । ॐ शिवा अतिथयः सन्तु । ॐ शिवा अग्नयः सन्तु । ॐ शिवा आहुतयः सन्तु । ॐ अहोरात्रे शिवे स्याताम् ।

ॐ निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ।। ॐ शुक्राङ्गारकबुधबृहस्पतिशनैश्चरराहुकेतुसोम-सहिता आदित्यपुरोगाः सर्वे ग्रहाः प्रीयन्ताम् । ॐ भगवान् नारायणः प्रीयताम् । ॐ भगवान् पर्जन्यः प्रीयताम् । ॐ भगवान् स्वामी महासेनः प्रीयताम् । ॐ पुरोऽनुवाक्यया यत्पुण्यं तदस्तु । ॐ याज्यया यत्पुण्यं तदस्तु । ॐ वषट्कारेण यत्पुण्यं तदस्तु । ॐ प्रातः सूर्योदये यत्पुण्यं तदस्तु ।

इसके बाद यजमान कलशको कलशके स्थानपर रखकर पहले पात्रमें गिराये गये जलसे मार्जन करे। परिवारके लोग भी मार्जन करें। इसके बाद इस जलको घरमें चारों तरफ छिड़क दे। द्वितीय पात्रमें जो जल गिराया गया है, उसको घरसे बाहर एकान्त स्थानमें गिरा दे।

अब यजमान हाथ जोड़कर ब्राह्मणोंसे प्रार्थना करे—

यजमान—ॐ एतत्कल्याणयुक्तं पुण्यं पुण्याहं वाचयिष्ये ।

ब्राह्मण—वाच्यताम् ।

इसके बाद यजमान फिरसे हाथ जोड़कर प्रार्थना करे—

यजमान—ॐ ब्राह्मं पुण्यमहर्यच्च सृष्ट्युत्पादनकारकम् ।

(पहली बार) **वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः ।।**

भो ब्राह्मणाः! मम सकुटुम्बस्य सपरिवारस्य गृहे करिष्यमाणस्य अमुककर्मणः पुण्याहं भवन्तो ब्रुवन्तु ।

ब्राह्मण—ॐ पुण्याहम् ।

यजमान—भो ब्राह्मणाः! मम ...करिष्यमाणस्य अमुककर्मणः (दूसरी बार) **पुण्याहं भवन्तो ब्रुवन्तु ।**

ब्राह्मण—ॐ पुण्याहम् ।

यजमान—भो ब्राह्मणाः! मम....करिष्यमाणस्य अमुककर्मणः (तीसरी बार) **पुण्याहं भवन्तो ब्रुवन्तु ।**

ब्राह्मण—ॐ पुण्याहम् ।

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ।।

यजमान—पृथिव्यामुद्धृतायां तु यत्कल्याणं पुरा कृतम् ।
(पहली बार) **ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः ।।**

भो ब्राह्मणाः! मम सकुटुम्बस्य सपरिवारस्य गृहे करिष्यमाणस्य अमुककर्मणः कल्याणं भवन्तो ब्रुवन्तु ।

ब्राह्मण—ॐ कल्याणम् ।

यजमान—भो ब्राह्मणाः! मम सकुटुम्बस्य सपरिवारस्य गृहे (दूसरी बार) **करिष्यमाणस्य अमुककर्मणः कल्याणं भवन्तो ब्रुवन्तु ।**

ब्राह्मण—ॐ कल्याणम् ।

यजमान—भो ब्राह्मणाः! मम सकुटुम्बस्य सपरिवारस्य गृहे (तीसरी बार) **करिष्यमाणस्य अमुककर्मणः कल्याणं भवन्तो ब्रुवन्तु ।**

ब्राह्मण—ॐ कल्याणम् ।

ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः । ब्रह्मराजन्याभ्याँ् शूद्राय चार्याय च स्वाय चारणाय च । प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृद्ध्यतामुप मादो नमतु ।

यजमान—ॐ सागरस्य तु या ऋद्धिर्महालक्ष्म्यादिभिः कृता ।
(पहली बार) **सम्पूर्णा सुप्रभावा च तामृद्धिं प्रब्रुवन्तु नः ।।**

भो ब्राह्मणाः! मम सकुटुम्बस्य सपरिवारस्य गृहे करिष्यमाणस्य अमुककर्मणः ऋद्धिं भवन्तो ब्रुवन्तु ।

ब्राह्मण—ॐ ऋद्ध्यताम् ।

यजमान—भो ब्राह्मणाः! मम सकुटुम्बस्य सपरिवारस्य गृहे (दूसरी बार) **करिष्यमाणस्य अमुककर्मणः ऋद्धिं भवन्तो ब्रुवन्तु ।**

ब्राह्मण—ॐ ऋद्ध्यताम् ।

यजमान—भो ब्राह्मणाः! मम सकुटुम्बस्य सपरिवारस्य गृहे करिष्य-(तीसरी बार) **माणस्य अमुककर्मणः ऋद्धिं भवन्तो ब्रुवन्तु ।**

ब्राह्मण—ॐ ऋद्ध्यताम् ।

ॐ सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृता अभूम । दिवं पृथिव्या अध्याऽरुहामाविदाम देवान्त्स्वर्ज्योतिः ।।

यजमान— ॐ स्वस्तिस्तु याऽविनाशाख्या पुण्यकल्याणवृद्धिदा ।

(पहली बार) **विनायकप्रिया नित्यं तां च स्वस्तिं ब्रुवन्तु नः ।।**

भो ब्राह्मणाः! मम सकुटुम्बस्य सपरिवारस्य गृहे करिष्यमाणाय अमुककर्मणे स्वस्ति भवन्तो ब्रुवन्तु ।

ब्राह्मण—ॐ आयुष्मते स्वस्ति ।

यजमान—भो ब्राह्मणाः! मम सकुटुम्बस्य सपरिवारस्य गृहे (दूसरी बार) **करिष्यमाणाय अमुककर्मणे स्वस्ति भवन्तो ब्रुवन्तु ।**

ब्राह्मण—ॐ आयुष्मते स्वस्ति ।

यजमान—भो ब्राह्मणाः! मम सकुटुम्बस्य सपरिवारस्य गृहे (तीसरी बार) **करिष्यमाणाय अमुककर्मणे स्वस्ति भवन्तो ब्रुवन्तु ।**

ब्राह्मण—ॐ आयुष्मते स्वस्ति ।

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।।

यजमान— ॐ समुद्रमथनाज्जाता जगदानन्दकारिका ।

(पहली बार) **हरिप्रिया च माङ्गल्या तां श्रियं च ब्रुवन्तु नः ।।**

भो ब्राह्मणाः! मम सकुटुम्बस्य सपरिवारस्य गृहे करिष्यमाणस्य अमुककर्मणः श्रीरस्तु इति भवन्तो ब्रुवन्तु ।

ब्राह्मण—ॐ अस्तु श्रीः ।

यजमान—भो ब्राह्मणाः! मम सकुटुम्बस्य सपरिवारस्य गृहे (दूसरी बार) **करिष्यमाणस्य अमुककर्मणः श्रीरस्तु इति भवन्तो ब्रुवन्तु ।**

ब्राह्मण—ॐ अस्तु श्रीः ।

यजमान—भो ब्राह्मणाः! मम सकुटुम्बस्य सपरिवारस्य गृहे (तीसरी बार) **करिष्यमाणस्य अमुककर्मणः श्रीरस्तु इति भवन्तो ब्रुवन्तु ।**

ब्राह्मण—ॐ अस्तु श्रीः ।

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाण ।।

यजमान—ॐ मृकण्डुसूनोरायुर्यद् ध्रुवलोमशयोस्तथा ।
आयुषा तेन संयुक्ता जीवेम शरदः शतम् ।।

ब्राह्मण—ॐ शतं जीवन्तु भवन्तः ।

ॐ शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ।।

यजमान—ॐ शिवगौरीविवाहे या या श्रीरामे नृपात्मजे ।
धनदस्य गृहे या श्रीरस्माकं सास्तु सद्मनि ।।

ब्राह्मण—ॐ अस्तु श्रीः ।

ॐ मनसः काममाकूतिं वाचः सत्यमशीय । पशूनाँ् रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा ।।

यजमान—प्रजापतिर्लोकपालो धाता ब्रह्मा च देवराट् ।
भगवाञ्छाश्वतो नित्यं नो वै रक्षतु सर्वतः ।।

ब्राह्मण—ॐ भगवान् प्रजापतिः प्रीयताम् ।

ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयँ् स्याम पतयो रयीणाम् ।।

यजमान—आयुष्मते स्वस्तिमते यजमानाय दाशुषे ।
श्रिये दत्ताशिषः सन्तु ऋत्विग्भिर्वेदपारगैः ।।
देवेन्द्रस्य यथा स्वस्ति यथा स्वस्ति गुरोर्गृहे ।
एकलिङ्गे यथा स्वस्ति तथा स्वस्ति सदा मम ।।

ब्राह्मण—ॐ आयुष्मते स्वस्ति ।

ॐ प्रति पन्थामपद्महि स्वस्तिगामनेहसम् ।
येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ।।
ॐ पुण्याहवाचनसमृद्धिरस्तु ।।

यजमान—अस्मिन् पुण्याहवाचने न्यूनातिरिक्तो यो विधिरुपविष्ट-ब्राह्मणानां वचनात् श्रीमहागणपतिप्रसादाच्च परिपूर्णोऽस्तु ।

दक्षिणाका संकल्प—कृतस्य पुण्याहवाचनकर्मणः समृद्ध्यर्थं पुण्याह-वाचकेभ्यो
ब्राह्मणेभ्य इमां दक्षिणां विभज्य अहं दास्ये ।

ब्राह्मण—ॐ स्वस्ति ।

अभिषेक

पुण्याहवाचनोपरान्त कलशके जलको पहले पात्रमें गिरा ले। अब अविधुर (जिनकी धर्मपत्नी जीवित हो) ब्राह्मण उत्तर या पश्चिम मुख होकर दूब और पल्लवके द्वारा इस जलसे यजमानका अभिषेक करे। अभिषेकके समय यजमान अपनी पत्नीको बायीं* तरफ कर ले। परिवार भी वहाँ बैठ जाय। अभिषेकके मन्त्र निम्नलिखित हैं—

ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः । पयस्वतीः प्रदिशः सन्तु मह्यम् ।।

ॐ पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः । सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ।।

ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमा सीद ।।

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ।।

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । सरस्वत्यै वाचो यन्तुर्यन्त्रिये दधामि बृहस्पतेष्ट्वा साम्राज्येनाभि-षिञ्चाम्यसौ । (शु० य० ९। ३०)

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामि ।।

(शु० य० १८।३७)

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभि षिञ्चामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभि षिञ्चामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभि षिञ्चामि ।। (शु० य० २०।३)

ॐ विश्वानि देव सवितर्दुरितानि परा सुव । यद्भद्रं तन्न आ सुव ।।
ॐ धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः ।
सचेतसो विश्वे देवा यज्ञं प्रावन्तु नः शुभे ।।

(शु० य० १८।७६)

ॐ त्वं यविष्ठ दाशुषो नॄँः पाहि शृणुधी गिरः । रक्षा तोकमुत त्मना ।

(शु० य० १८।७७)

ॐ अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः । प्र प्र दातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ।।

ॐ द्यौः शान्तिरन्तरिक्षँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वँ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ।।

यतो यतः समीहसे ततो नो अभयं कुरु ।
शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ।।
सुशान्तिर्भवतु ।

सरितः सागराः शैलास्तीर्थानि जलदा नदाः ।
एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ।।
शान्तिः पुष्टिस्तुष्टिश्चास्तु । अमृताभिषेकोऽस्तु ।।

दक्षिणादान— ॐ अद्य...कृतैतत्पुण्याहवाचनकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं च पुण्याहवाचकेभ्यो ब्राह्मणेभ्यो यथाशक्ति मनसोद्दिष्टां दक्षिणां विभज्य दातुमहमुत्सृज्ये ।

१-यहाँ पुण्याहवाचन विस्तारसे दिया गया है। बोधायनकी एक संक्षिप्त विधि भी है। जो लोग संक्षिप्त विधिसे पुण्याहवाचन करना चाहते हैं, वे पृष्ठ-संख्या ३७७ पर देख सकते हैं।

२-शास्त्रानुसार पुण्याहवाचनके लिये वरुण-कलशके अतिरिक्त शान्ति-कलशकी भी स्थापना करनेका विधान है, परंतु सामान्यतः केवल वरुण-कलशसे भी पुण्याहवाचनका कार्य सम्पन्न कर लेते हैं।

* कहींपर जल डाला जाता है और कहींपर चावल डाला जाता है।

*** आशीर्वादेऽभिषेके च पादप्रक्षालने तथा ।**
शयने भोजने चैव पत्नी तूत्तरतो भवेत् ।।

षोडशमातृका-पूजन

षोडशमातृकाओंकी स्थापनाके लिये पूजक दाहिनी ओर पाँच खड़ी पाइयों और पाँच पड़ी पाइयोंका चौकोर मण्डल बनाये। इस प्रकार सोलह कोष्ठक बन जायँगे। पश्चिमसे पूर्वकी ओर मातृकाओंका आवाहन और स्थापन करे। कोष्ठकोंमें रक्त चावल, गेहूँ या जौ रख दे। पहले कोष्ठकमें गौरीका आवाहन होता है, अतः गौरीके आवाहनके पूर्व गणेशका भी आवाहन पुष्पाक्षतोंद्वारा इसी कोष्ठकमें करे। इसी प्रकार अन्य कोष्ठकोंमें भी निम्नाङ्कित मन्त्र पढ़ते हुए आवाहन करे।

षोडशमातृका-चक्र

पूर्व

आत्मन:कुलदेवता १६	लोकमातर: १२	देवसेना ८	मेधा ४
तुष्टि: १५	मातर: ११	जया ७	शची ३
पुष्टि: १४	स्वाहा १०	विजया ६	पद्मा २
धृति: १३	स्वधा ९	सावित्री ५	गौरी १ गणेश

आवाहन एवं स्थापन—

१-ॐ गणपतये नमः, गणपतिमावाहयामि, स्थापयामि ।
ॐ गौर्यै नमः, गौरीमावाहयामि, स्थापयामि ।
२-ॐ पद्मायै नमः, पद्मामावाहयामि, स्थापयामि ।
३-ॐ शच्यै नमः, शचीमावाहयामि, स्थापयामि ।
४-ॐ मेधायै नमः, मेधामावाहयामि, स्थापयामि ।
५-ॐ सावित्र्यै नमः, सावित्रीमावाहयामि, स्थापयामि ।
६-ॐ विजयायै नमः, विजयामावाहयामि, स्थापयामि ।
७-ॐ जयायै नमः, जयामावाहयामि, स्थापयामि ।
८-ॐ देवसेनायै नमः, देवसेनामावाहयामि, स्थापयामि ।
९-ॐ स्वधायै नमः, स्वधामावाहयामि, स्थापयामि ।
१०-ॐ स्वाहायै नमः, स्वाहामावाहयामि, स्थापयामि ।
११-ॐ मातृभ्यो नमः, मातॄः आवाहयामि, स्थापयामि ।
१२-ॐ लोकमातृभ्यो नमः, लोकमातॄः आवाहयामि, स्थापयामि ।
१३-ॐ धृत्यै नमः, धृतिमावाहयामि, स्थापयामि ।
१४-ॐ पुष्ट्यै नमः, पुष्टिमावाहयामि, स्थापयामि ।
१५-ॐ तुष्ट्यै नमः, तुष्टिमावाहयामि, स्थापयामि ।
१६-ॐ आत्मनः कुलदेवतायै नमः, आत्मनः कुलदेवता-मावाहयामि, स्थापयामि ।

इस प्रकार षोडशमातृकाओंका आवाहन, स्थापनकर **'ॐ मनो जूति०'** इस मन्त्रसे अक्षत छोड़ते हुए मातृका-मण्डलकी प्रतिष्ठा करे, तत्पश्चात् निम्नलिखित नाम-मन्त्रसे गन्धादि उपचारोंद्वारा पूजन करे—

'ॐ गणेशसहितगौर्यादिषोडशमातृकाभ्यो नमः ।'

विशेष-१-मातृकाओंको यज्ञोपवीत न चढ़ाये। २-नैवेद्यके साथ-साथ घृत और गुड़का भी नैवेद्य लगाये। ३-विशेष अर्घ्य न दे।

फलका अर्पण—नारियल आदि फल अञ्जलिमें लेकर प्रार्थना करे—

ॐ आयुरारोग्यमैश्वर्यं ददध्वं मातरो मम ।
निर्विघ्नं सर्वकार्येषु कुरुध्वं सगणाधिपाः ।।

—इस तरह प्रार्थना करनेके बाद नारियल आदि फल चढ़ाकर हाथ जोड़कर बोले—**'गेहे वृद्धिशतानि भवन्तु, उत्तरे कर्मण्यविघ्नमस्तु ।'**

इसके बाद—

'अनया पूजया गणेशसहितगौर्यादिषोडशमातरः प्रीयन्ताम्, न मम ।'

इस वाक्यका उच्चारण कर मण्डलपर अक्षत छोड़कर नमस्कार करे—

गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ।।

धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता ।
गणेशेनाधिका ह्येता वरदाभयपाणयः ।।

सप्तघृतमातृका-पूजन

आग्नेयकोणमें किसी वेदी अथवा काष्ठपीठ (पाटा)-पर प्रादेशमात्र स्थानमें पहले रोली या सिन्दूरसे स्वस्तिक बनाकर **'श्रीः'** लिखे। इसके नीचे एक बिन्दु और इसके नीचे दो बिन्दु दक्षिणसे करके उत्तरकी ओर दे। इसी प्रकार सात बिन्दु क्रमसे चित्रानुसार बनाना चाहिये।

(वसोर्धारा)

इसके बाद नीचेवाले सात बिन्दुओंपर घी या दूधसे प्रादेशमात्र सात धाराएँ निम्नलिखित मन्त्रसे दे—

घृत-धाराकरण—

ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् ।
देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा ।।

इसके बाद गुड़के द्वारा बिन्दुओंकी रेखाओंको **'कामधुक्षः'** कहते हुए मिलाये। तदनन्तर निम्नलिखित वाक्योंका उच्चारण करते हुए प्रत्येक मातृकाका आवाहन और स्थापन करे—

आवाहन-स्थापन—

ॐ भूर्भुवः स्वः श्रियै नमः, श्रियमावाहयामि, स्थापयामि ।
ॐ भूर्भुवः स्वः लक्ष्म्यै नमः, लक्ष्मीमावाहयामि, स्थापयामि ।
ॐ भूर्भुवः स्वः धृत्यै नमः, धृतिमावाहयामि, स्थापयामि ।
ॐ भूर्भुवः स्वः मेधायै नमः, मेधामावाहयामि, स्थापयामि ।
ॐ भूर्भुवः स्वः पुष्ट्यै नमः, पुष्टिमावाहयामि, स्थापयामि ।
ॐ भूर्भुवः स्वः श्रद्धायै नमः, श्रद्धामावाहयामि, स्थापयामि ।
ॐ भूर्भुवः स्वः सरस्वत्यै नमः, सरस्वतीमावाहयामि, स्थापयामि ।

प्रतिष्ठा—इस प्रकार आवाहन-स्थापनके बाद **'एतं ते देव०'** इस मन्त्रसे प्रतिष्ठा करे, तत्पश्चात् **'ॐ भूर्भुवः स्वः सप्तघृतमातृकाभ्यो नमः'** इस नाम-मन्त्रसे यथालब्धोपचार-पूजन करे।

प्रार्थना—तदनन्तर हाथ जोड़कर निम्नलिखित मन्त्र पढ़कर प्रार्थना करे—

ॐ यदङ्गत्वेन भो देव्यः पूजिता विधिमार्गतः ।
कुर्वन्तु कार्यमखिलं निर्विघ्नेन क्रतूद्भवम् ।।

'अनया पूजया वसोर्धारादेवताः प्रीयन्ताम् न मम ।' ऐसा उच्चारण कर मण्डलपर अक्षत छोड़ दे।

पूजक अञ्जलिमें पुष्प ग्रहण करे तथा ब्राह्मण आयुष्य-मन्त्रका पाठ करें।

आयुष्यमन्त्र—ॐ आयुष्यं वर्चस्यँ् रायस्पोषमौद्भिदम् । इदँ् हिरण्यं वर्चस्वज्जैत्रायाविशतादु माम् ।। ॐ न तद्रक्षाँ् सि न पिशाचास्तरन्ति देवानामोजः प्रथमजँ् ह्येतत् ।
यो बिभर्ति दाक्षायणँ् हिरण्यँ् स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ।।

ॐ यदाबध्नन् दाक्षायणा हिरण्यँ्शतानीकाय सुमनस्यमानाः । तन्म आ बध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासम् ।।

यदायुष्यं चिरं देवाः सप्तकल्पान्तजीविषु ।
ददुस्तेनायुषा युक्ता जीवेम शरदः शतम् ।।
दीर्घा नागा नगा नद्योऽनन्ताः सप्तार्णवा दिशः ।
अनन्तेनायुषा तेन जीवेम शरदः शतम् ।।
सत्यानि पञ्चभूतानि विनाशरहितानि च ।
अविनाश्यायुषा तद्वज्जीवेम शरदः शतम् ।।
शतं जीवन्तु भवन्तः ।

पुष्पार्पण—आयुष्यमन्त्रके श्रवणके बाद अञ्जलिके पुष्पोंको सप्तघृत-मातृका-मण्डलपर अर्पण कर दे।

दक्षिणा-संकल्प—आयुष्यमन्त्रके पाठ करनेवाले ब्राह्मणोंको निम्न संकल्पपूर्वक दक्षिणा दे—

ॐ अद्य (पृ० ३५ के अनुसार) कृतैतदायुष्यवाचनकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफलप्राप्त्यर्थं चायुष्यवाचकेभ्यो ब्राह्मणेभ्यो यथाशक्ति मनसोद्दिष्टां दक्षिणां विभज्य दातुमहमुत्सृज्ये ।

नवग्रह-मण्डल-पूजन

ग्रहोंकी स्थापनाके लिये ईशानकोणमें चार खड़ी पाइयों और चार पड़ी पाइयोंका चौकोर मण्डल बनाये। इस प्रकार नौ कोष्ठक बन जायँगे। बीचवाले कोष्ठकमें सूर्य, अग्निकोणमें चन्द्र, दक्षिणमें मंगल, ईशानकोणमें बुध, उत्तरमें बृहस्पति, पूर्वमें शुक्र, पश्चिममें शनि, नैर्ऋत्यकोणमें राहु और वायव्यकोणमें केतुकी स्थापना करे।

अब बायें हाथमें अक्षत लेकर नीचे लिखे मन्त्र बोलते हुए उपरिलिखित क्रमसे दाहिने हाथसे अक्षत छोड़कर ग्रहोंका आवाहन एवं स्थापन करे।

१-सूर्य (मध्यमें गोलाकार, लाल)

सूर्यका आवाहन (लाल अक्षत-पुष्प लेकर)—

ॐ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ।।
जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम् ।
तमोऽरिं सर्वपापघ्नं सूर्यमावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः कलिङ्गदेशोद्भव काश्यपगोत्र रक्तवर्ण भो सूर्य! इहागच्छ, इह तिष्ठ ॐ सूर्याय नमः, श्रीसूर्यमावाहयामि, स्थापयामि ।

२-चन्द्र (अग्निकोणमें, अर्धचन्द्र, श्वेत)

चन्द्रका आवाहन (श्वेत अक्षत-पुष्पसे)—

ॐ इमं देवा असपत्नँ् सुवध्वं महते क्षत्राय
महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय ।
इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोऽमी
राजा सोमोऽस्माकं ब्राह्मणानाँ् राजा ।।
दधिशङ्खतुषाराभं क्षीरोदार्णवसम्भवम् ।
ज्योत्स्नापतिं निशानाथं सोममावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः यमुनातीरोद्भव आत्रेयगोत्र शुक्लवर्ण भो सोम! इहागच्छ, इह तिष्ठ ॐ सोमाय नमः, सोममावाहयामि, स्थापयामि ।

३-मंगल (दक्षिणमें, त्रिकोण, लाल)

मंगलका आवाहन (लाल फूल और अक्षत लेकर)—

ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपाँ् रेताँ् सि जिन्वति ।।
धरणीगर्भसम्भूतं विद्युत्तेजस्समप्रभम् ।
कुमारं शक्तिहस्तं च भौममावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः अवन्तिदेशोद्भव भारद्वाजगोत्र रक्तवर्ण भो भौम! इहागच्छ, इह तिष्ठ ॐ भौमाय नमः, भौममावाहयामि, स्थापयामि ।

४-बुध (ईशानकोणमें, हरा धनुष)

बुधका आवाहन (पीले, हरे अक्षत-पुष्प लेकर)—

ॐ उद्‌बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते सँ सृजेथामयं च ।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ।।
प्रियङ्गुकलिकाभासं रूपेणाप्रतिमं बुधम् ।
सौम्यं सौम्यगुणोपेतं बुधमावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः मगधदेशोद्भव आत्रेयगोत्र पीतवर्ण भो बुध! इहागच्छ, इह तिष्ठ ॐ बुधाय नमः, बुधमावाहयामि, स्थापयामि ।

५-बृहस्पति (उत्तरमें पीला, अष्टदल)

बृहस्पतिका आवाहन (पीले अक्षत-पुष्पसे)—

ॐ बृहस्पते अति यदर्यो अर्हाद् द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ।
उपयामगृहीतोऽसि बृहस्पतये त्वैष ते योनिर्बृहस्पतये त्वा ।।
देवानां च मुनीनां च गुरुं काञ्चनसंनिभम् ।
वन्द्यभूतं त्रिलोकानां गुरुमावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः सिन्धुदेशोद्भव आङ्गिरसगोत्र पीतवर्ण भो गुरो! इहागच्छ, इह तिष्ठ ॐ बृहस्पतये नमः, बृहस्पतिमावाहयामि, स्थापयामि ।

६-शुक्र (पूर्वमें श्वेत, चतुष्कोण)

शुक्रका आवाहन (श्वेत अक्षत-पुष्पसे)—

ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं विपानँ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ।।
हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम् ।
सर्वशास्त्रप्रवक्तारं शुक्रमावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः भोजकटदेशोद्भव भार्गवगोत्र शुक्लवर्ण भो शुक्र! इहागच्छ, इह तिष्ठ ॐ शुक्राय नमः, शुक्रमावाहयामि, स्थापयामि ।

७-शनि (पश्चिममें, काला मनुष्य)

शनिका आवाहन (काले अक्षत-पुष्पसे)—

ॐ शं नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभि स्रवन्तु नः ।।
नीलाम्बुजसमाभासं रविपुत्रं यमाग्रजम् ।
छायामार्तण्डसम्भूतं शनिमावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः सौराष्ट्रदेशोद्भव काश्यपगोत्र कृष्णवर्ण भो शनैश्चर! इहागच्छ, इह तिष्ठ ॐ शनैश्चराय नमः, शनैश्चरमावाहयामि, स्थापयामि ।

८-राहु (नैर्ऋत्यकोणमें, काला मकर)

राहुका आवाहन (काले अक्षत-पुष्पसे)—

ॐ कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता ।।
अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम् ।
सिंहिकागर्भसम्भूतं राहुमावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः राठिनपुरोद्भव पैठीनसगोत्र कृष्णवर्ण भो राहो! इहागच्छ, इह तिष्ठ ॐ राहवे नमः, राहुमावाहयामि, स्थापयामि ।

९-केतु (वायव्यकोणमें, कृष्ण खड्ग)

केतुका आवाहन (धूमिल अक्षत-पुष्प लेकर)—

ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः ।।
पलाशधूम्रसङ्काशं तारकाग्रहमस्तकम् ।
रौद्रं रौद्रात्मकं घोरं केतुमावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः अन्तर्वेदिसमुद्भव जैमिनिगोत्र धूम्रवर्ण भो केतो! इहागच्छ, इह तिष्ठ ॐ केतवे नमः, केतुमावाहयामि, स्थापयामि ।

नवग्रह-मण्डलकी प्रतिष्ठा—आवाहन और स्थापनके बाद हाथमें अक्षत लेकर **'ॐ मनो जूति*०'** इस मन्त्रसे नवग्रहमण्डलमें अक्षत छोड़े।

अस्मिन् नवग्रहमण्डले आवाहिताः सूर्यादिनवग्रहा देवाः सुप्रतिष्ठिता वरदा भवन्तु ।

नवग्रह-पूजन

नवग्रहोंका आवाहनकर इनकी पूजा (पृष्ठ १९१ से पृष्ठ २०० तक लिखे विधानके अनुसार) करे। नाम-मन्त्र निम्नलिखित है—

ॐ आवाहितसूर्यादिनवग्रहेभ्यो देवेभ्यो नमः ।

—इस नाम-मन्त्रसे पूजन करनेके बाद हाथ जोड़कर निम्नलिखित प्रार्थना करे—

प्रार्थना—

ॐ ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ।।
सूर्यः शौर्यमथेन्दुरुच्चपदवीं सन्मङ्गलं मङ्गलः
सद्बुद्धिं च बुधो गुरुश्च गुरुतां शुक्रः सुखं शं शनिः ।
राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिं
नित्यं प्रीतिकरा भवन्तु मम ते सर्वेऽनुकूला ग्रहाः ।।

इसके बाद निम्नलिखित वाक्यका उच्चारण करते हुए नवग्रहमण्डलपर अक्षत छोड़ दे और नमस्कार करे—

निवेदन और नमस्कार—‘अनया पूजया सूर्यादिनवग्रहाः प्रीयन्तां न मम’।

---

* ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञँ् समिमं दधातु । विश्वे देवास इह मादयन्तामो३ म्प्रतिष्ठ ।। (यजु० २।१३)

अधिदेवता और प्रत्यधिदेवताका स्थापन

उद्यापन, शतचण्डी, यज्ञानुष्ठान आदि विशेष अवसरोंपर नवग्रहोंके मण्डलमें नवग्रहोंके साथ अधिदेवता, प्रत्यधिदेवता आदिकी भी पूजा की जाती है। इनकी स्थापनाका विशेष नियम है, जिसका निर्देश यहाँ किया जाता है—

चित्रानुसार अधिदेवताओंको ग्रहोंके दाहिने भागमें और प्रत्यधि-देवताओंको बायें भागमें स्थापित करना चाहिये।

अधिदेवताओंकी* स्थापना

(हाथमें अक्षत-पुष्प लेकर निम्न मन्त्रोंको पढ़ते हुए चित्रानुसार नियत स्थानोंपर अधिदेवताओंके आवाहन-स्थापनपूर्वक अक्षत-पुष्पोंको छोड़ता जाय।)

१०-ईश्वर (सूर्यके दायें भागमें) आवाहन-स्थापन—

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ।।
एह्येहि विश्वेश्वर नस्त्रिशूलकपालखट्वाङ्गधरेण सार्धम् ।
लोकेश यक्षेश्वर यज्ञसिद्ध्यै गृहाण पूजां भगवन् नमस्ते ।।
ॐ भूर्भुवः स्वः ईश्वराय नमः, ईश्वरमावाहयामि, स्थापयामि ।

११-उमा (चन्द्रमाके दायें भागमें) आवाहन-स्थापन—

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाण ।
हेमाद्रितनयां देवीं वरदां शङ्करप्रियाम् ।
लम्बोदरस्य जननीमुमामावाहयाम्यहम् ।।
ॐ भूर्भुवः स्वः उमायै नमः, उमामावाहयामि, स्थापयामि ।

१२-स्कन्द (मंगलके दायें भागमें) आवाहन-स्थापन—

ॐ यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन् ।।
रुद्रतेजःसमुत्पन्नं देवसेनाग्रगं विभुम् ।
षण्मुखं कृत्तिकासूनुं स्कन्दमावाहयाम्यहम् ।।
ॐ भूर्भुवः स्वः स्कन्दाय नमः, स्कन्दमावाहयामि, स्थापयामि ।

१३-विष्णु (बुधके दायें भागमें) आवाहन-स्थापन—

ॐ विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि । वैष्णवमसि विष्णवे त्वा ।।

देवदेवं जगन्नाथं भक्तानुग्रहकारकम् ।
चतुर्भुजं रमानाथं विष्णुमावाहयाम्यहम् ।।
ॐ भूर्भुवः स्वः विष्णवे नमः, विष्णुमावाहयामि, स्थापयामि ।

१४-ब्रह्मा (बृहस्पतिके दायें भागमें) आवाहन-स्थापन—

ॐ आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ।।

कृष्णाजिनाम्बरधरं पद्मसंस्थं चतुर्मुखम् ।
वेदाधारं निरालम्बं विधिमावाहयाम्यहम् ।।
ॐ भूर्भुवः स्वः ब्रह्मणे नमः, ब्रह्माणमावाहयामि, स्थापयामि ।

१५-इन्द्र (शुक्रके दायें भागमें) आवाहन-स्थापन—

ॐ सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ।
जहि शत्रूँ२रप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ।
देवराजं गजारूढं शुनासीरं शतक्रतुम् ।
वज्रहस्तं महाबाहुमिन्द्रमावाहयाम्यहम् ।।
ॐ भूर्भुवः स्वः इन्द्राय नमः, इन्द्रमावाहयामि, स्थापयामि ।

१६-यम (शनिके दायें भागमें) आवाहन-स्थापन—

ॐ यमाय त्वाऽङ्गिरस्वते पितृमते स्वाहा ।
स्वाहा घर्माय स्वाहा घर्मः पित्रे ।।
धर्मराजं महावीर्यं दक्षिणादिक्पतिं प्रभुम् ।
रक्तेक्षणं महाबाहुं यममावाहयाम्यहम् ।।
ॐ भूर्भुवः स्वः यमाय नमः, यममावाहयामि, स्थापयामि ।

१७-काल (राहुके दायें भागमें) आवाहन-स्थापन—

ॐ कार्षिरसि समुद्रस्य त्वा क्षित्या उन्नयामि ।
समापो अद्भिरग्मत समोषधीभिरोषधीः ।।
अनाकारमनन्ताख्यं वर्तमानं दिने दिने ।
कलाकाष्ठादिरूपेण कालमावाहयाम्यहम् ।।
ॐ भूर्भुवः स्वः कालाय नमः, कालमावाहयामि, स्थापयामि ।

१८-चित्रगुप्त (केतुके दायें भागमें) आवाहन-स्थापन—

ॐ चित्रावसो स्वस्ति ते पारमशीय ।
धर्मराजसभासंस्थं कृताकृतविवेकिनम् ।

आवाहये चित्रगुप्तं लेखनीपत्रहस्तकम् ।।
ॐ भूर्भुवः स्वः चित्रगुप्ताय नमः, चित्रगुप्तमावाहयामि, स्थापयामि ।

प्रत्यधिदेवताओंका* स्थापन

बायें हाथमें अक्षत लेकर दाहिने हाथसे नवग्रहोंके बायें भागमें मन्त्रको उच्चारण करते हुए चित्रानुसार नियत स्थानोंपर अक्षत छोड़ते हुए एक-एक प्रत्यधिदेवताका आवाहन-स्थापन करे—

१९-अग्नि (सूर्यके बायें भागमें) आवाहन-स्थापन—

ॐ अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे । देवाँ२ आ सादयादिह ।।
रक्तमाल्याम्बरधरं रक्तपद्मासनस्थितम् ।
वरदाभयदं देवमग्निमावाहयाम्यहम् ।।
ॐ भूर्भुवः स्वः अग्नये नमः, अग्निमावाहयामि, स्थापयामि ।

२०-अप् (जल) (चन्द्रमाके बायें भागमें) आवाहन-स्थापन—

ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ।।
आदिदेवसमुद्भूतजगच्छुद्धिकराः शुभाः ।
ओषध्याप्यायनकरा अप आवाहयाम्यहम् ।।
ॐ भूर्भुवः स्वः अद्भ्यो नमः, अप आवाहयामि, स्थापयामि ।।

२१-पृथ्वी (मंगलके बायें भागमें) आवाहन-स्थापन—

ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः ।।
शुक्लवर्णां विशालाक्षीं कूर्मपृष्ठोपरिस्थिताम् ।
सर्वशस्याश्रयां देवीं धरामावाहयाम्यहम् ।।
ॐ भूर्भुवः स्वः पृथिव्यै नमः, पृथिवीमावाहयामि, स्थापयामि ।

२२-विष्णु (बुधके बायें भागमें) आवाहन-स्थापन—

ॐ इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् । समूढमस्य पाँ् सुरे स्वाहा ।।
शङ्खचक्रगदापद्महस्तं गरुडवाहनम् ।
किरीटकुण्डलधरं विष्णुमावाहयाम्यहम् ।।
ॐ भूर्भुवः स्वः विष्णवे नमः, विष्णुमावाहयामि, स्थापयामि ।

२३-इन्द्र (बृहस्पतिके बायें भागमें) आवाहन-स्थापन—

ॐ इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ।।
ऐरावतगजारूढं सहस्राक्षं शचीपतिम् ।
वज्रहस्तं सुराधीशमिन्द्रमावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः इन्द्राय नमः, इन्द्रमावाहयामि, स्थापयामि ।

२४-इन्द्राणी (शुक्रके बायें भागमें) आवाहन-स्थापन—

ॐ अदित्यै रास्नाऽसीन्द्राण्या उष्णीषः । पूषाऽसि घर्माय दीष्व ।।
प्रसन्नवदनां देवीं देवराजस्य वल्लभाम् ।
नानालङ्कारसंयुक्तां शचीमावाहयाम्यहम् ।।
ॐ भूर्भुवः स्वः इन्द्राण्यै नमः, इन्द्राणीमावाहयामि, स्थापयामि ।

२५-प्रजापति (शनिके बायें भागमें) आवाहन-स्थापन—

ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयँ स्याम पतयो रयीणाम् ।।
आवाहयाम्यहं देवदेवेशं च प्रजापतिम् ।
अनेकव्रतकर्तारं सर्वेषां च पितामहम् ।।
ॐ भूर्भुवः स्वः प्रजापतये नमः, प्रजापतिमावाहयामि, स्थापयामि ।

२६-सर्प (राहुके बायें भागमें) आवाहन-स्थापन—

ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु ।
ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ।।
अनन्ताद्यात् महाकायान् नानामणिविराजितान् ।
आवाहयाम्यहं सर्पान् फणासप्तकमण्डितान् ।।
ॐ भूर्भुवः स्वः सर्पेभ्यो नमः, सर्पानावाहयामि, स्थापयामि ।

२७-ब्रह्मा (केतुके बायें भागमें) आवाहन-स्थापन—

ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः ।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ।।
हंसपृष्ठसमारूढं देवतागणपूजितम् ।
आवाहयाम्यहं देवं ब्रह्माणं कमलासनम् ।।
ॐ भूर्भुवः स्वः ब्रह्मणे नमः, ब्रह्माणमावाहयामि, स्थापयामि ।

नवग्रहोंके समान ही अधिदेवता तथा प्रत्यधिदेवताओंका भी प्रतिष्ठापूर्वक पाद्यादि उपचारोंसे पूजन करना चाहिये।

---

* **शिवः शिवा गुहो विष्णुर्ब्रह्मेन्द्रयमकालकाः ।**
चित्रगुप्तोऽथ भान्वादेर्दक्षिणे चाधिदेवताः ।।

(स्कन्दपुराण)

'सूर्यादि ग्रहोंके दक्षिण पार्श्वमें क्रमशः शिव, पार्वती, स्कन्द, विष्णु, ब्रह्मा, इन्द्र, यम, काल और चित्रगुप्त—ये अधिदेवता अधिष्ठित किये जाते हैं।'

* **अग्निरापो धरा विष्णुः शक्रेन्द्राणी पितामहाः ।**
पन्नगाः कः क्रमाद्वामे ग्रहप्रत्यधिदेवताः ।।

सूर्यादि ग्रहोंके वामभागमें क्रमशः अग्नि, जल, पृथ्वी, विष्णु, इन्द्र, इन्द्राणी, प्रजापति, सर्प और ब्रह्मा—ये प्रत्यधिदेवता स्थापित किये जाते हैं।

पञ्चलोकपाल*-पूजा

नवग्रह-मण्डलमें ही चित्रानुसार निर्दिष्ट स्थानोंपर गणेशादि पञ्चलोकपालोंका बायें हाथमें अक्षत लेकर दाहिने हाथसे छोड़ते हुए आवाहन एवं स्थापन करे।

२८-गणेशजीका आवाहन और स्थापन—

ॐ गणानां त्वा गणपतिँ हवामहे प्रियाणां त्वा प्रियपतिँ हवामहे निधीनां त्वा निधिपतिँ हवामहे वसो मम । आहमजानि गर्भधमा त्वमजासि गर्भधम् ।।

लम्बोदरं महाकायं गजवक्त्रं चतुर्भुजम् ।
आवाहयाम्यहं देवं गणेशं सिद्धिदायकम् ।।

ॐ भूर्भुवः स्वः गणपते! इहागच्छ, इह तिष्ठ गणपतये नमः, गणपतिमावाहयामि, स्थापयामि ।

२९-देवी दुर्गाका आवाहन और स्थापन—

ॐ अम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन ।
ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ।।
पत्तने नगरे ग्रामे विपिने पर्वते गृहे ।
नानाजातिकुलेशानीं दुर्गामावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः दुर्गे! इहागच्छ, इह तिष्ठ दुर्गायै नमः, दुर्गामावाहयामि, स्थापयामि ।

३०-वायुका आवाहन और स्थापन—

ॐ आ नो नियुद्भिः शतिनीभिरध्वरँ् सहस्रिणीभिरुप याहि यज्ञम् ।
वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ।।
आवाहयाम्यहं वायुं भूतानां देहधारिणम् ।
सर्वाधारं महावेगं मृगवाहनमीश्वरम् ।।

ॐ भूर्भुवः स्वः वायो! इहागच्छ, इह तिष्ठ वायवे नमः, वायुमावाहयामि, स्थापयामि ।

३१-आकाशका आवाहन और स्थापन—

ॐ घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा । दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा ।।

अनाकारं शब्दगुणं द्यावाभूम्यन्तरस्थितम् ।
आवाहयाम्यहं देवमाकाशं सर्वगं शुभम् ।।

ॐ भूर्भुवः स्वः आकाश! इहागच्छ, इह तिष्ठ आकाशाय नमः,

आकाशमावाहयामि, स्थापयामि ।

३२-अश्विनीकुमारोंका आवाहन और स्थापन—

ॐ या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतम् ।
उपयामगृहीतोऽस्यश्विभ्यां त्वैष ते योनिर्माध्वीभ्यां त्वा ।।
देवतानां च भैषज्ये सुकुमारौ भिषग्वरौ ।
आवाहयाम्यहं देवावश्विनौ पुष्टिवर्द्धनौ ।।

ॐ भूर्भुवः स्वः अश्विनौ! इहागच्छतम्, इह तिष्ठतम्, अश्विभ्यां नमः, अश्विनावावाहयामि, स्थापयामि ।

प्रतिष्ठा— तदनन्तर **'ॐ मनो जूति०'** इस मन्त्रसे अक्षत छोड़ते हुए पञ्चलोकपालोंकी प्रतिष्ठा करे।

इसके बाद **'ॐ पञ्चलोकपालेभ्यो नमः'** इस नाम-मन्त्रसे गन्धादि उपचारोंद्वारा पूजनकर **'अनया पूजया पञ्चलोक-पालाः प्रीयन्ताम्, न मम'** ऐसा कहकर अक्षत छोड़ दे।

(यज्ञादि विशेष अनुष्ठानोंमें वास्तोष्पति एवं क्षेत्रपाल देवताका पृथक्-पृथक् चक्र बनाकर उनकी विशेष पूजा की जाती है। नवग्रह-मण्डलके देवगणोंमें भी इनकी पूजा करनेका विधान है, अतः संक्षेपमें उसे भी यहाँ दिया जा रहा है—)

३३-वास्तोष्पति—

ॐ वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः ।
यत् त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे ।।
वास्तोष्पतिं विदिक्कायं भूशय्याभिरतं प्रभुम् ।
आवाहयाम्यहं देवं सर्वकर्मफलप्रदम् ।।

ॐ भूर्भुवः स्वः वास्तोष्पते! इहागच्छ, इह तिष्ठ वास्तोष्पतये नमः, वास्तोष्पतिमावाहयामि, स्थापयामि ।

३४-क्षेत्रपालका आवाहन और स्थापन—

ॐ नहि स्पशमविदन्नन्यमस्माद्वैश्वानरात्पुर एतारमग्नेः ।
एमेनमवृधन्नमृता अमर्त्यं वैश्वानरं क्षैत्रजित्याय देवाः ।।
भूतप्रेतपिशाचाद्यैरावृतं शूलपाणिनम् ।
आवाहये क्षेत्रपालं कर्मण्यस्मिन् सुखाय नः ।।

ॐ भूर्भुवः स्वः क्षेत्राधिपते! इहागच्छ, इह तिष्ठ क्षेत्राधिपतये नमः, क्षेत्राधिपतिमावाहयामि, स्थापयामि ।

तदनन्तर **'ॐ मनो जूति०'** इस मन्त्रसे प्रतिष्ठाकर **'ॐ क्षेत्रपालाय नमः'** इस नाम-मन्त्रद्वारा गन्धादि उपचारोंसे पूजा करे।

* **गणेशश्चाम्बिका वायुराकाशश्चाश्विनौ तथा ।**
ग्रहाणामुत्तरे पञ्चलोकपालाः प्रकीर्तिताः ।।

(स्कन्दपुराण)

दश दिक्पाल-पूजन

नवग्रह-मण्डलमें परिधिके बाहर पूर्वादि दसों दिशाओंके अधिपति देवताओं (दिक्पाल देवताओं)-का अक्षत छोड़ते हुए आवाहन एवं स्थापन करे।

३५-(पूर्वमें) इन्द्रका आवाहन और स्थापन—

ॐ त्रातारमिन्द्रमवितारमिन्द्रँ हवे हवे सुहवँ शूरमिन्द्रम् ।
ह्वयामि शक्रं पुरुहूतमिन्द्रँ स्वस्ति नो मघवा धात्विन्द्रः ।।
इन्द्रं सुरपतिश्रेष्ठं वज्रहस्तं महाबलम् ।
आवाहये यज्ञसिद्ध्यै शतयज्ञाधिपं प्रभुम् ।।

ॐ भूर्भुवः स्वः इन्द्र! इहागच्छ, इह तिष्ठ इन्द्राय नमः, इन्द्रमावाहयामि, स्थापयामि ।

३६-(अग्निकोणमें) अग्निका आवाहन और स्थापन—

ॐ अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे । देवाँ२ आ सादयादिह ।।
त्रिपादं सप्तहस्तं च द्विमूर्धानं द्विनासिकम् ।
षण्नेत्रं च चतुःश्रोत्रमग्निमावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः अग्ने! इहागच्छ, इह तिष्ठ अग्नये नमः, अग्निमावाहयामि, स्थापयामि ।

३७-(दक्षिणमें) यमका आवाहन और स्थापन—

ॐ यमाय त्वाऽङ्गिरस्वते पितृमते स्वाहा । स्वाहा घर्माय स्वाहा घर्मः पित्रे ।।
महामहिषमारूढं दण्डहस्तं महाबलम् ।
यज्ञसंरक्षणार्थाय यममावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः यम! इहागच्छ, इह तिष्ठ यमाय नमः, यममावाहयामि, स्थापयामि ।

३८-(नैर्ऋत्यकोणमें) निर्ऋतिका आवाहन और स्थापन—

ॐ असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य ।
अन्यमस्मदिच्छ सा त इत्या नमो देवि निर्ऋते तुभ्यमस्तु ।।
सर्वप्रेताधिपं देवं निर्ऋतिं नीलविग्रहम् ।
आवाहये यज्ञसिद्ध्यै नरारूढं वरप्रदम् ।।

ॐ भूर्भुवः स्वः निर्ऋते! इहागच्छ, इह तिष्ठ निर्ऋतये नमः, निर्ऋतिमावाहयामि, स्थापयामि ।

३९-(पश्चिममें) वरुणका आवाहन और स्थापन—

ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशँ् स मा न आयुः प्रमोषीः ।।
शुद्धस्फटिकसंकाशं जलेशं यादसां पतिम् ।
आवाहये प्रतीचीशं वरुणं सर्वकामदम् ।।

ॐ भूर्भुवः स्वः वरुण! इहागच्छ, इह तिष्ठ वरुणाय नमः, वरुणमावाहयामि, स्थापयामि ।

४०-(वायव्यकोणमें) वायुका आवाहन और स्थापन—

ॐ आ नो नियुद्भिः शतिनीभिरध्वरँ् सहस्रिणीभिरुप याहि यज्ञम् ।
वायो अस्मिन्त्सवने मादयस्य यूयं पात स्वस्तिभिः सदा नः ।।
मनोजवं महातेजं सर्वतश्चारिणं शुभम् ।
यज्ञसंरक्षणार्थाय वायुमावाहयाम्यहम् ।।

ॐ भूर्भुवः स्वः वायो! इहागच्छ, इह तिष्ठ वायवे नमः, वायुमावाहयामि, स्थापयामि ।

४१-(उत्तरमें) कुबेरका आवाहन और स्थापन—

ॐ कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नम उक्तिं यजन्ति ।।
उपयामगृहीतोऽस्यश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्ण ।
एष ते योनिस्तेजसे त्वा वीर्याय त्वा बलाय त्वा ।।
आवाहयामि देवेशं धनदं यक्षपूजितम् ।
महाबलं दिव्यदेहं नरयानगतिं विभुम् ।।

ॐ भूर्भुवः स्वः कुबेर! इहागच्छ, इह तिष्ठ कुबेराय नमः, कुबेरमावाहयामि, स्थापयामि ।

४२-(ईशानकोणमें) ईशानका आवाहन और स्थापन—

ॐ तमीशानं जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ।।
सर्वाधिपं महादेवं भूतानां पतिमव्ययम् ।
आवाहये तमीशानं लोकानामभयप्रदम् ।।

ॐ भूर्भुवः स्वः ईशान! इहागच्छ, इह तिष्ठ ईशानाय नमः, ईशानमावाहयामि, स्थापयामि ।

४३-(ईशान-पूर्वके मध्यमें) ब्रह्माका आवाहन और स्थापन—

ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः ।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च वि वः ।।
पद्मयोनिं चतुर्मूर्तिं वेदगर्भं पितामहम् ।
आवाहयामि ब्रह्माणं यज्ञसंसिद्धिहेतवे ।।

ॐ भूर्भुवः स्वः ब्रह्मन्! इहागच्छ, इह तिष्ठ ब्रह्मणे नमः, ब्रह्माणमावाहयामि, स्थापयामि ।

४४-(नैर्ऋत्य-पश्चिमके मध्यमें) अनन्तका आवाहन और स्थापन—

ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः ।
अनन्तं सर्वनागानामधिपं विश्वरूपिणम् ।
जगतां शान्तिकर्तारं मण्डले स्थापयाम्यहम् ।।
ॐ भूर्भुवः स्वः अनन्त! इहागच्छ, इह तिष्ठ अनन्ताय नमः, अनन्तमावाहयामि, स्थापयामि ।

प्रतिष्ठा—इस प्रकार आवाहनकर **'ॐ मनो०'** इस मन्त्रसे अक्षत छोड़ते हुए प्रतिष्ठा करे। तदनन्तर निम्नलिखित नाम-मन्त्रसे यथालब्धोपचार पूजन करे—**'ॐ इन्द्रादिदशदिक्पालेभ्यो नमः ।'** इसके बाद **'अनया पूजया इन्द्रादिदशदिक्पालाः प्रीयन्ताम्, न मम'—**ऐसा उच्चारण कर अक्षत मण्डलपर छोड़ दे।

चतुःषष्टियोगिनी-पूजन

यज्ञादि अनुष्ठानोंमें चौंसठ योगिनियोंका विशेष पूजन प्रायः पृथक् वेदीमें चक्र बनाकर किया जाता है, परंतु साधारण पूजामें प्रायः षोडश-मातृका-मण्डलपर ही चौंसठ योगिनियोंके आवाहन एवं पूजनादिकी भी परम्परा है। तदनुसार बायें हाथमें अक्षत लेकर दाहिने हाथसे छोड़ते हुए निम्नलिखित नाम-मन्त्र पढ़कर चौंसठ योगिनियोंका आवाहन करे।

आवाहन—

१-ॐ दिव्ययोगायै नमः, २-ॐ महायोगायै नमः, ३-ॐ सिद्धयोगायै नमः, ४-ॐ महेश्वर्यै नमः, ५-ॐ पिशाचिन्यै नमः, ६-ॐ डाकिन्यै नमः, ७-ॐ कालरात्र्यै नमः, ८-ॐ निशाचर्यै नमः, ९-ॐ कंकाल्यै नमः, १०-ॐ रौद्रवेताल्यै नमः, ११-ॐ हुँकार्यै नमः, १२-ॐ ऊर्ध्वकेश्यै नमः, १३-ॐ विरूपाक्ष्यै नमः, १४-ॐ शुष्काङ्ग्यै नमः, १५-ॐ नरभोजिन्यै नमः, १६-ॐ फट्कार्यै नमः, १७-ॐ वीरभद्रायै नमः, १८-ॐ धूम्राक्ष्यै नमः, १९-ॐ कलहप्रियायै नमः, २०-ॐ रक्ताक्ष्यै नमः, २१-ॐ राक्षस्यै नमः, २२-ॐ घोरायै नमः, २३-ॐ विश्वरूपायै नमः, २४-ॐ भयङ्कर्यै नमः, २५-ॐ कामाक्ष्यै नमः, २६-ॐ उग्रचामुण्डायै नमः, २७-ॐ भीषणायै नमः, २८-ॐ त्रिपुरान्तकायै नमः, २९-ॐ वीरकौमारिकायै नमः, ३०-ॐ चण्ड्यै नमः, ३१-ॐ वाराह्यै नमः, ३२-ॐ मुण्डधारिण्यै नमः, ३३-ॐ भैरव्यै नमः, ३४-ॐ हस्तिन्यै नमः, ३५-ॐ क्रोधदुर्मुख्यै नमः, ३६-ॐ प्रेतवाहिन्यै नमः, ३७-ॐ खट्वाङ्गदीर्घ-लम्बोष्ठ्यै नमः, ३८-ॐ मालत्यै नमः, ३९-ॐ मन्त्रयोगिन्यै नमः, ४०-ॐ अस्थिन्यै नमः, ४१-ॐ चक्रिण्यै नमः, ४२-ॐ ग्राहायै नमः, ४३-ॐ भुवनेश्वर्यै नमः, ४४-ॐ कण्टक्यै नमः, ४५-ॐ कारक्यै नमः, ४६-ॐ शुभ्रायै नमः, ४७-ॐ क्रियायै नमः, ४८-ॐ दूत्यै नमः, ४९-ॐ करालिन्यै नमः, ५०-ॐ शङ्खिन्यै नमः, ५१-ॐ पद्मिन्यै नमः, ५२-ॐ क्षीरायै नमः, ५३-ॐ असन्धायै नमः, ५४-ॐ प्रहारिण्यै नमः, ५५-ॐ लक्ष्म्यै नमः, ५६-ॐ कामुक्यै नमः, ५७-ॐ लोलायै नमः, ५८-ॐ काकदृष्ट्यै नमः, ५९-ॐ अधोमुख्यै नमः, ६०-ॐ धूर्जट्यै नमः, ६१-ॐ मालिन्यै नमः, ६२-ॐ घोरायै नमः, ६३-ॐ कपाल्यै नमः, ६४-ॐ विषभोजिन्यै नमः ।

आवाहयाम्यहं देवीर्योगिनीः परमेश्वरीः ।
योगाभ्यासेन संतुष्टाः परं ध्यानसमन्विताः ।।
दिव्यकुण्डलसंकाशा दिव्यज्वालास्त्रिलोचनाः ।
मूर्तिमतीर्ह्यमूर्त्ताश्च उग्राश्चैवोग्ररूपिणीः ।।
अनेकभावसंयुक्ताः संसारार्णवतारिणीः ।
यज्ञे कुर्वन्तु निर्विघ्नं श्रेयो यच्छन्तु मातरः ।।

ॐ चतुः षष्टियोगिनीभ्यो नमः, युष्मान् अहम् आवाहयामि, स्थापयामि, पूजयामि च ।

पूजन—आवाहनके बाद प्रतिष्ठापूर्वक निम्नलिखित नाम-मन्त्रसे गन्धादि उपचारोंद्वारा पूजन करे—

'ॐ चतुःषष्टियोगिनीभ्यो नमः ।'

प्रार्थना—पूजनके अनन्तर हाथ जोड़कर निम्न मन्त्रसे प्रार्थना करे—

यज्ञे कुर्वन्तु निर्विघ्नं श्रेयो यच्छन्तु मातरः ।।

इसके बाद हाथमें अक्षत लेकर **'अनया पूजया चतुःषष्टियोगिन्यः प्रीयन्ताम्, न मम ।'** कहकर मण्डलपर अक्षत छोड़ दे।

रक्षा-विधान

बायें हाथमें अक्षत, पीली सरसों, द्रव्य और तीन तारकी मौली (नारा) लेकर दाहिने हाथसे ढककर नीचे लिखे मन्त्रसे अभिमन्त्रित करे—

ॐ गणाधिपं नमस्कृत्य नमस्कृत्य पितामहम् ।
विष्णुं रुद्रं श्रियं देवीं वन्दे भक्त्या सरस्वतीम् ।।
स्थानाधिपं नमस्कृत्य ग्रहनाथं निशाकरम् ।
धरणीगर्भसम्भूतं शशिपुत्रं बृहस्पतिम् ।।
दैत्याचार्यं नमस्कृत्य सूर्यपुत्रं महाग्रहम् ।
राहुं केतुं नमस्कृत्य यज्ञारम्भे विशेषतः ।।
शक्राद्या देवताः सर्वाः मुनींश्चैव तपोधनान् ।
गर्गं मुनिं नमस्कृत्य नारदं मुनिसत्तमम् ।।
वसिष्ठं मुनिशार्दूलं विश्वामित्रं च गोभिलम् ।
व्यासं मुनिं नमस्कृत्य सर्वशास्त्रविशारदम् ।।
विद्याधिका ये मुनय आचार्याश्च तपोधनाः ।
तान् सर्वान् प्रणमाम्येवं यज्ञरक्षाकरान् सदा ।।

अब निम्नलिखित मन्त्रोंसे दसों दिशाओंमें अक्षत तथा पीली सरसों छोड़े—

पूर्वे रक्षतु वाराह आग्येय्यां गरुडध्वजः ।
दक्षिणे पद्मनाभस्तु नैर्ऋत्यां मधुसूदनः ।।
पश्चिमे पातु गोविन्दो वायव्यां तु जनार्दनः ।
उत्तरे श्रीपती रक्षेदैशान्यां तु महेश्वरः ।।
ऊर्ध्वं गोवर्धनो रक्षेद् ह्यधोऽनन्तस्तथैव च ।
एवं दश दिशो रक्षेद् वासुदेवो जनार्दनः ।।
रक्षाहीनं तु यत्स्थानं रक्षत्वीशो महाद्रिधृक् ।
यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा ।।
स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु ।

अपक्रामन्तु ते भूता ये भूता भूमिसंस्थिताः ।।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ।
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशः ।।
सर्वेषामविरोधेन पूजाकर्म समारभे ।।

इसके बाद हाथकी मौली (नारा)-को गणेशजीके सम्मुख रख दे। फिर इसे उठाकर गणपति आदि आवाहित देवताओंपर चढ़ाये तथा उसमेंसे पहले पूजक आचार्यको और आचार्य पूजकको रक्षा बाँधे।

यजमानद्वारा रक्षाबन्धन—

ॐ व्रतेन दीक्षामाप्नोति दीक्षयाऽऽप्नोति दक्षिणाम् ।
दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ।।

अब यजमान आचार्यको निम्नलिखित मन्त्रसे तिलक करके प्रणाम करे—

यजमानद्वारा तिलक—नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ।।

आचार्यद्वारा रक्षाबन्धन—इसके बाद आचार्य यजमानको रक्षा बाँधे—

ॐ यदाबध्नन् दाक्षायणा हिरण्यँ शतानीकाय सुमनस्यमानाः ।
तन्म आ बध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासम् ।।
येन बद्धो बली राजा दानवेन्द्रो महाबलः ।
तेन त्वामनुबध्नामि रक्षे मा चल मा चल ।।

अब आचार्य यजमानको निम्न मन्त्रसे तिलक करे—

आचार्यद्वारा तिलक—

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।।

श्रीशालग्राम-पूजन

श्रीशालग्राम साक्षात् सत्यनारायण भगवान् हैं, नारायणस्वरूप हैं। इसलिये इसमें प्राण-प्रतिष्ठा आदि संस्कारोंकी आवश्यकता नहीं होती। इनकी पूजामें आवाहन और विसर्जन भी नहीं होता। इनके साथ देवी भगवती तुलसीका नित्य संयोग माना गया है। शयनके समय तुलसी-पत्रको शालग्राम-शिलासे हटाकर पार्श्वमें रख दिया जाता है। जहाँ शालग्राम-शिला होती है, वहाँ सभी तीर्थ और भुक्ति-मुक्तिका वास होता है। शालग्रामका चरणोदक सभी तीर्थोंसे अधिक पवित्र माना गया है। शालग्रामकी पूजा सम-संख्यामें अच्छी मानी जाती है, किंतु सम-संख्यामें दो शालग्रामोंका निषेध है। विषममें एक शालग्रामकी पूजाका विधान है। शालग्रामके साथ द्वारावती-शिला भी रखी जाती है। व्रत, दान, प्रतिष्ठा तथा श्राद्धादि कार्योंमें शालग्रामका सांनिध्य विशेष फलप्रद होता है। स्त्री, अनुपनीत ब्राह्मणादिको शालग्रामका स्पर्श नहीं करना चाहिये।

सत्यनारायण-पूजा अथवा शालग्रामकी नित्य-पूजामें शालग्रामकी मूर्तिको किसी पवित्र पात्रमें रखकर पुरुषसूक्तका पाठ करते हुए पंचामृत अथवा शुद्ध जलसे अभिषेक करानेके बाद मूर्तिको शुद्ध वस्त्रसे पोंछकर गन्धयुक्त तुलसीदलके साथ किसी सिंहासन अथवा यथास्थान पात्रादिमें विराजमान कराकर ही पूजा प्रारम्भ की जाती है।

पूजन-विधि

संध्या-वन्दनादि नित्यकृत्य सम्पन्न कर आचमन, पवित्रीधारण, मार्जन, प्राणायाम तथा पूजनका संकल्प कर हाथमें पुष्प लेकर गणपति-गौरी-स्मरणपूर्वक भगवान् शालग्रामका इस प्रकार ध्यान करना चाहिये—

ध्यान—नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ।।
ॐ श्रीमन्नारायणाय नमः । ध्यानार्थे पुष्पाणि समर्पयामि ।

(भगवान्के सामने पुष्प रख दे।)

शालग्राममें भगवान् विष्णुकी नित्य संनिधि रहती है, इसलिये उनका आवाहन नहीं होता, आवाहनके स्थानपर प्रार्थनापूर्वक पुष्प समर्पित करे, अन्य प्रतिमाओंमें प्रतिष्ठापूर्वक इस प्रकार आवाहन करे—

आवाहन—ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिँ् सर्वत स्पृप्त्वाऽत्यतिष्ठद्दशाङ्गुलम् ।।
आगच्छ भगवन् देव स्थाने चात्र स्थिरो भव ।

यावत् पूजां करिष्यामि तावत् त्वं संनिधौ भव ।।

ॐ श्रीमन्नारायणाय नमः । आवाहनार्थे पुष्पं समर्पयामि । (आवाहनके लिये पुष्प चढ़ाये।)

आसन—ॐ पुरुष एवेदँ् सर्वं यद्भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ।।
अनेकरत्नसंयुक्तं नानामणिगणान्वितम् ।
भावितं हेममयं दिव्यमासनं प्रतिगृह्यताम् ।।

ॐ श्रीमन्नारायणाय नमः । आसनार्थे पुष्पाणि समर्पयामि । (आसनके लिये पुष्प समर्पित करे।)

पाद्य—ॐ एतावानस्य महिमातो ज्यायाँश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।।
गङ्गोदकं निर्मलं च सर्वसौगन्ध्यसंयुतम् ।
पादप्रक्षालनार्थाय दत्तं मे प्रतिगृह्यताम् ।।

ॐ श्रीमन्नारायणाय नमः । पादयोः पाद्यं समर्पयामि । (आचमनीसे जल छोड़े।)

अर्घ्य—ॐ त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत् पुनः ।
ततो विष्वङ् व्यक्रामत्साशनानशने अभि ।।
गन्धपुष्पाक्षतैर्युक्तमर्घ्यं सम्पादितं मया ।
गृहाणार्घ्यं मया दत्तं प्रसन्नो वरदो भव ।।

ॐ श्रीमन्नारायणाय नमः । हस्तयोरर्घ्यं समर्पयामि । (अर्घ्यका जल छोड़े।)

आचमन—ॐ ततो विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ।।
कर्पूरेण सुगन्धेन वासितं स्वादु शीतलम् ।
तोयमाचमनीयार्थं गृहाण परमेश्वर ।।

ॐ श्रीमन्नारायणाय नमः । मुखे आचमनीयं जलं समर्पयामि । (आचमनके लिये जल समर्पित करे।)

एक शुद्ध पात्रमें कुङ्कुमादिसे स्वस्तिकादि बनाकर चन्दनयुक्त तुलसीदलके ऊपर भगवान्‌को स्थापितकर निम्नलिखित विधिसे स्नान कराये।

स्नान—ॐ तस्माद्यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम् ।
पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ।।
मन्दाकिन्यास्तु यद् वारि सर्वपापहरं शुभम् ।
तदिदं कल्पितं देव स्नानार्थं प्रतिगृह्यताम् ।।

ॐ श्रीमन्नारायणाय नमः । स्नानीयं जलं समर्पयामि । (जलसे स्नान कराये।)

स्नानाङ्ग-आचमन—ॐ श्रीमन्नारायणाय नमः । स्नानान्ते आचमनीयं जलं समर्पयामि । (स्नानके बाद आचमनीय जल समर्पित करे।)

दुग्धस्नान—ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः ।
पयस्वतीः प्रदिशः सन्तु मह्यम् ।।
कामधेनुसमुद्भूतं सर्वेषां जीवनं परम् ।
पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ।।
ॐ श्रीमन्नारायणाय नमः । पयःस्नानं समर्पयामि । (दूधसे स्नान कराये, पुनः शुद्ध जलसे स्नान कराये।)

दधिस्नान—ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत्प्र ण आयूँ षि तारिषत् ।।
पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ।
दध्यानीतं मया देव स्नानार्थं प्रतिगृह्यताम् ।।
ॐ श्रीमन्नारायणाय नमः । दधिस्नानं समर्पयामि । (दधिसे स्नान कराये, पुनः शुद्ध जलसे स्नान कराये।)

घृतस्नान—ॐ घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा । दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा ।
नवनीतसमुत्पन्नं सर्वसंतोषकारकम् ।
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ।।
ॐ श्रीमन्नारायणाय नमः । घृतस्नानं समर्पयामि । (घृतसे स्नान कराकर शुद्ध जलसे स्नान कराये।)

मधुस्नान—ॐ मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ।। मधु नक्तमुतोषसो मधुमत्पार्थिवँ् रजः । मधु द्यौरस्तु नः पिता ।। मधुमान्नो वनस्पतिर्मधुमाँ२ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ।।
पुष्परेणुसमुत्पन्नं सुस्वादु मधुरं मधु ।
तेजःपुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ।।
ॐ श्रीमन्नारायणाय नमः । मधुस्नानं समर्पयामि । (मधु (शहद) से स्नान कराये, पुनः शुद्धोदकसे स्नान कराये।)

शर्करास्नान—ॐ अपाँ्रसमुद्वयसँ् सूर्ये सन्तँ् समाहितम् ।
अपाँ् रसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयामगृहीतो-
ऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ।।
इक्षुरससमुद्भूतां शर्करां पुष्टिदां शुभाम् ।
मलापहारिकां दिव्यां स्नानार्थं प्रतिगृह्यताम् ।।
ॐ श्रीमन्नारायणाय नमः । शर्करास्नानं समर्पयामि । (शर्करासे स्नान कराये, पुनः शुद्ध जलसे स्नान कराये।)

पञ्चामृतस्नान—निम्न मन्त्र पढ़कर पञ्चामृतसे स्नान कराये ।
ॐ पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः ।
सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ।।

पयोदधिघृतं चैव मधुशर्करयान्वितम् ।
पञ्चामृतं मयानीतं स्नानार्थं प्रतिगृह्यताम् ।।

ॐ श्रीमन्नारायणाय नमः । पञ्चामृतस्नानं समर्पयामि । (पञ्चामृतसे स्नान करानेके बाद शुद्ध जलसे स्नान कराये।)

गन्धोदकस्नान—अँ् शुना ते अँ् शुः पृच्यतां परुषा परुः ।
गन्धस्ते सोममवतु मदाय रसो अच्युतः ।।
मलयाचलसम्भूतचन्दनेन विमिश्रितम् ।
इदं गन्धोदकस्नानं कुङ्कुमाक्तं नु गृह्यताम् ।।

ॐ श्रीमन्नारायणाय नमः । गन्धोदकस्नानं समर्पयामि । (केसरमिश्रित चन्दनसे स्नान कराये।)

शुद्धोदकस्नान—शुद्धवालः सर्वशुद्धवालो मणिवालस्त आश्विनाः श्येतः श्येताक्षोऽरुणस्ते रुद्राय पशुपतये कर्णा यामा अवलिप्ता रौद्रा नभोरूपाः पार्जन्याः ।
शुद्धं यत्सलिलं दिव्यं गङ्गाजलसमं स्मृतम् ।
समर्पितं मया भक्त्या शुद्धस्नानाय गृह्यताम् ।।

ॐ श्रीमन्नारायणाय नमः । शुद्धोदकस्नानं समर्पयामि । (शुद्ध जलसे स्नान कराये*। तदनन्तर आचमनीय जल समर्पित करे। फिर स्वच्छ वस्त्रसे (अङ्गप्रोक्षण कर) पोंछकर तुलसीदल एवं चन्दनके साथ शालग्रामको किसी सिंहासन आदिमें बैठाकर शेष पूजा करनी चाहिये। भगवान्‌के स्नानीय अथवा अभिषेकका जल पवित्र जगहमें ढँककर रख दे। पूजनके अन्तमें चरणोदकके रूपमें इसे ग्रहण करना चाहिये।)

वस्त्र—ॐ तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दाँ् सि जज्ञिरे तस्माद्यजुस्तस्मादजायत ।।
शीतवातोष्णसंत्राणं लज्जाया रक्षणं परम् ।
देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे ।।

ॐ श्रीमन्नारायणाय नमः । वस्त्रं समर्पयामि, आचमनीयं जलं च समर्पयामि। (वस्त्र चढ़ाये, पुनः आचमनीय जल दे।)

उपवस्त्र—उपवस्त्रं प्रयच्छामि देवाय परमात्मने ।
भक्त्या समर्पितं देव प्रसीद परमेश्वर ।।

ॐ श्रीमन्नारायणाय नमः । उपवस्त्रं समर्पयामि, आचमनीयं जलं च समर्पयामि। (उपवस्त्र चढ़ाये तथा आचमनीय जल समर्पित करे।)

यज्ञोपवीत—ॐ तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ।।
नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् ।
नपवीतं मया दत्तं गृहाण परमेश्वर ।।

ॐ श्रीमन्नारायणाय नमः । यज्ञोपवीतं समर्पयामि, यज्ञोपवीतान्ते आचमनीयं जलं च समर्पयामि। (यज्ञोपवीत अर्पण करे, पुनः आचमनीय जल दे।)

गन्ध—ॐ तं यज्ञं बर्हिषि प्रौक्षत् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ।।
श्रीखण्डचन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ।।
ॐ श्रीमन्नारायणाय नमः । चन्दनं समर्पयामि। (मलय चन्दन चढ़ाये।)

तिलाक्षत—(शालग्रामपर अक्षत नहीं चढ़ाया जाता, अतः अक्षतके स्थानपर श्वेत तिल अर्पित करना चाहिये।)

ॐ अक्षन्नमीमदन्त ह्यव प्रिया अधूषत । अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी ।।
अक्षताश्च सुरश्रेष्ठ कुङ्कुमाक्ताः सुशोभिताः ।
मया निवेदिता भक्त्या गृहाण परमेश्वर ।।
ॐ श्रीमन्नारायणाय नमः । अक्षतस्थाने श्वेततिलान् समर्पयामि। (श्वेत तिल चढ़ाये।)

पुष्प—ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्यासीत् किं बाहू किमूरू पादा उच्येते ।।
माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।
मयानीतानि पुष्पाणि गृहाण परमेश्वर ।।
ॐ श्रीमन्नारायणाय नमः । पुष्पं पुष्पमालां च समर्पयामि। (पुष्प और पुष्पमालाओंसे अलङ्कृत करे।)

तुलसीपत्र—ॐ इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् ।
समूढमस्य पाँसुरे स्वाहा ।।
तुलसीं हेमरूपां च रत्नरूपां च मञ्जरीम् ।
भवमोक्षप्रदां तुभ्यामर्पयामि हरिप्रियाम् ।।
ॐ श्रीमन्नारायणाय नमः । तुलसीदलं तुलसीमञ्जरीं च समर्पयामि। (तुलसीदल तथा तुलसीमञ्जरी अर्पित करे।)

दूर्वा—ॐ काण्डात्काण्डात् प्ररोहन्ती परुषः परुषस्परि ।
एवा नो दूर्वे प्र तनु सहस्रेण शतेन च ।।
दूर्वाङ्कुरान् सुहरितानमृतान् मङ्गलप्रदान् ।
आनीतांस्तव पूजार्थं गृहाण परमेश्वर ।।
ॐ श्रीमन्नारायणाय नमः । दूर्वाङ्कुरान् समर्पयामि। (दूब अर्पित करे।)

आभूषण—वज्रमाणिक्यवैदूर्यमुक्ताविद्रुममण्डितम् ।
पुष्परागसमायुक्तं भूषणं प्रतिगृह्यताम् ।।

ॐ श्रीमन्नारायणाय नमः । अलङ्करणार्थे आभूषणानि समर्पयामि । (अलङ्कृत करनेके लिये आभूषण समर्पित करे।)

सुगन्धित तैल—अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमाँसं परि पातु विश्वतः ।।
तैलानि च सुगन्धीनि द्रव्याणि विविधानि च ।
मया दत्तानि लेपार्थं गृहाण परमेश्वर ।।

ॐ श्रीमन्नारायणाय नमः । सुगन्धिततैलादिद्रव्यं समर्पयामि । (सुगन्धित तेल, इतर आदि अर्पित करे।)

धूप—ॐ ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्याँ् शूद्रो अजायत ।।
वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ।।
ॐ श्रीमन्नारायणाय नमः । धूपमाघ्रापयामि। (धूप आघ्रापित करे।)

दीप—ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ।।
साज्यं च वर्तिसंयुक्तं वह्निना योजितं मया ।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ।।
ॐ श्रीमन्नारायणाय नमः । दीपं दर्शयामि। (घृत-दीप दिखाये तथा हाथ धो ले।)

नैवेद्य—भगवान्‌के भोगके निमित्त सामने रखे नैवेद्यमें तुलसीदल छोड़कर निम्न मन्त्र पढ़कर नैवेद्य भगवान्‌को निवेदित करे—

ॐ नाभ्या आसीदन्तरिक्षँ् शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ अकल्पयन् ।।
त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पये ।
गृहाण सुमुखो भूत्वा प्रसीद परमेश्वर ।।

तदनन्तर पाँच ग्रास-मुद्रा दिखाये—

१-ॐ प्राणाय स्वाहा—कनिष्ठिका, अनामिका और अँगूठा मिलाये।
२-ॐ अपानाय स्वाहा—अनामिका, मध्यमा और अँगूठा मिलाये।
३-ॐ व्यानाय स्वाहा—मध्यमा, तर्जनी और अँगूठा मिलाये।
४-ॐ उदानाय स्वाहा—तर्जनी, मध्यमा, अनामिका और अँगूठा मिलाये।
५-ॐ समानाय स्वाहा—सब अँगुलियाँ मिलाये।

ॐ श्रीमन्नारायणाय नमः । नैवेद्यं निवेदयामि, आचमनीयं जलं समर्पयामि, मध्ये पानीयं जलं समर्पयामि, उत्तरापोऽशनार्थे जलं समर्पयामि। (नैवेद्य निवेदित करे, आचमनीय जल तथा पानीय जल अर्पित करे।)

करोद्वर्तन—ॐ अँ् शुना ते अँ् शुः पृच्यतां परुषा परुः ।

गन्धस्ते सोममवतु मदाय रसो अच्युतः ।।

ॐ श्रीमन्नारायणाय नमः । करोद्वर्तनार्थे चन्दनं समर्पयामि। (दोनों अनामिकाओंसे चन्दन छिड़के।)

अखण्ड ऋतुफल—ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वँ्हसः ।।
इदं फलं मया देव स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ।।
ॐ श्रीमन्नारायणाय नमः । अखण्ड ऋतुफलं समर्पयामि । (अखण्ड ऋतुफल समर्पित करे।)

ताम्बूल—ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ।।
पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ।
एलालवङ्गसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ।।

ॐ श्रीमन्नारायणाय नमः । एलालवङ्गपूगीफलयुतं ताम्बूलं समर्पयामि । (इलायची, लवंग तथा पूगीफलयुक्त ताम्बूल अर्पित करे।)

दक्षिणा—ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ।।
दक्षिणा प्रेमसहिता यथाशक्तिसमर्पिता ।
अनन्तफलदामेनां गृहाण परमेश्वर ।।

ॐ श्रीमन्नारायणाय नमः । द्रव्यदक्षिणां समर्पयामि । (द्रव्यदक्षिणा अर्पित करे।)

आरती—अष्टदलकमल अथवा स्वस्तिकादि मांगलिक चिह्नोंसे अलङ्कृत तथा पुष्प-अक्षतादिसे सुसज्जित थालीमें कर्पूर अथवा घृतकी बत्तीको प्रज्वलित कर जलसे प्रोक्षित कर ले। पुनः घण्टा-नाद करते हुए अपने स्थानपर खड़े होकर भगवान्‌की मंगलमय आरती करे। आरतीका यह मुख्य विधान है कि सर्वप्रथम चरणोंमें चार बार, नाभिमें दो बार, मुखमें एक बार आरती करनेके बाद पुनः समस्त अंगोंकी सात बार आरती करनी चाहिये। फिर शंखमें जल लेकर भगवान्‌के चारों ओर भ्रमण कराये तथा भगवान्‌को निवेदित करे।

आरती-मन्त्र—ॐ इदँ् हविः प्रजननं मे अस्तु दशवीरँ् सर्वगणँ् स्वस्तये । आत्मसनि प्रजासनि पशुसनि लोकसन्य-भयसनि । अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतो अस्मासु धत्त ।।
कदलीगर्भसम्भूतं कर्पूरं तु प्रदीपितम् ।
आरार्तिकमहं कुर्वे पश्य मे वरदो भव ।।
ॐ श्रीमन्नारायणाय नमः । कर्पूरारार्तिक्यं समर्पयामि ।

शङ्ख-जल—तदनन्तर शङ्खका जल भगवान्‌पर घुमाकर अपने ऊपर तथा भक्तजनोंपर निम्न मन्त्रके द्वारा छोड़े—

शङ्खमध्यस्थितं तोयं भ्रामितं केशवोपरि ।
अङ्गलग्नं मनुष्याणां ब्रह्महत्यां व्यपोहति ।।

श्रीसत्यनारायणजीकी आरती

जय लक्ष्मीरमणा, श्रीलक्ष्मीरमणा ।
सत्यनारायण स्वामी जन-पातक-हरणा ।।जय०।।टेक।।
रत्नजटित सिंहासन अद्‌भुत छबि राजै ।
नारद करत निराजन घंटा ध्वनि बाजै ।।जय०।।
प्रकट भये कलि कारण, द्विजको दरस दियो ।
बूढ़े ब्राह्मण बनकर कंचन-महल कियो ।।जय०।।
दुर्बल भील कठारो, जिनपर कृपा करी ।
चन्द्रचूड़ एक राजा, जिनकी बिपति हरी ।।जय०।।
वैश्य मनोरथ पायो, श्रद्धा तज दीन्हीं ।
सो फल भोग्यो प्रभुजी फिर अस्तुति कीन्हीं ।।जय०।।
भाव-भक्तिके कारण छिन-छिन रूप धर्यो ।
श्रद्धा धारण कीनी, तिनको काज सर्यो ।।जय०।।
ग्वाल-बाल सँग राजा वनमें भक्ति करी ।
मनवांछित फल दीन्हों दीनदयालु हरी ।।जय०।।
चढ़त प्रसाद सवायो कदलीफल, मेवा ।
धूप-दीप-तुलसीसे राजी सत्यदेवा ।।जय०।।
(सत्य) नारायणजीकी आरति जो कोइ नर गावै ।
तन-मन-सुख-सम्पति मन-वांछित फल पावै ।।जय०।।

मन्त्र-पुष्पाञ्जलि—हाथमें पुष्प लेकर इस प्रकार प्रार्थना करे—

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ।। ॐ राजाधिराजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे । स मे कामान् काम कामाय मह्यं कामेश्वरो वैश्रवणो ददातु ।। कुबेराय वैश्रवणाय महाराजाय नमः ।

ॐ स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात् सार्वभौमः सार्वायुष आऽन्तादा परार्धात् पृथिव्यै समुद्रपर्यन्ताया एकराडिति तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे । आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति ।।

ॐ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् । सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः ।

तत्पुरुषाय विद्महे नारायणाय धीमहि तन्नो विष्णुः प्रचोदयात् ।
कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतस्वभावात् ।

करोति यद्यत् सकलं परस्मै नारायणायेति समर्पयेत्तत् ।।

ॐ श्रीमन्नारायणाय नमः । मन्त्रपुष्पाञ्जलिं समर्पयामि । (भगवान्‌को मन्त्रपुष्पाञ्जलि समर्पित करे।)

स्तुति-प्रार्थना—शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ।।
नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ।।
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ।।
आकाशात्पतितं तोयं यथा गच्छति सागरम् ।
सर्वदेवनमस्कारः केशवम्प्रति गच्छति ।।
मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् ।
यत्कृपा तमहं वन्दे परमानन्दमाधवम् ।।
त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ।।
पापोऽहं पापकर्माहं पापात्मा पापसम्भवः ।
त्राहि मां पुण्डरीकाक्ष सर्वपापहरो भव ।।
कृष्णाय वासुदेवाय देवकीनन्दनाय च ।
नन्दगोपकुमाराय गोविन्दाय नमो नमः ।।

प्रदक्षिणा—ॐ सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद् यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ।।
यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ।।

ॐ श्रीमन्नारायणाय नमः । प्रदक्षिणां समर्पयामि । (भगवान्‌की प्रदक्षिणा कर उन्हें साष्टाङ्ग प्रणाम करे, तदनन्तर क्षमा-प्रार्थना करे।)

क्षमा-प्रार्थना—मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन ।
यत्पूजितं मया देव परिपूर्णं तदस्तु मे ।।
यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् ।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ।।
अनेन पूजनेन श्रीमन्नारायणः प्रीयतां न मम ।

चरणामृत-ग्रहण—भगवान्‌का चरणोदक अति पुण्यप्रद, कल्याणकारी है एवं सभी पाप-तापोंका समूल उच्छेद कर देता है। अतः श्रद्धा-भक्तिपूर्वक पूजनके अन्तमें इसे सर्वप्रथम ग्रहण करना चाहिये। ग्रहण करते समय इसे भूमिपर न गिरने दे। अतः

बायें हाथके ऊपर स्वच्छ दोहरा वस्त्र रखकर उसपर दाहिना हाथ रखे तथा दाहिने हाथमें लेकर ग्रहण करे। चरणोदकके बाद पञ्चामृत लेना चाहिये।

तुलसी-ग्रहण—तदनन्तर भगवान् शालग्रामको अर्पित एवं भोग लगाया गया तुलसीदल निम्न मन्त्रसे लेना चाहिये—

पूजनानन्तरं विष्णोरर्पितं तुलसीदलम् ।
भक्षयेद्देहशुद्ध्यर्थं चान्द्रायणशताधिकम् ।।

प्रसाद-ग्रहण—अन्तमें भगवान्को भोग लगाये गये नैवेद्यको प्रसादरूपमें भक्तोंको बाँटकर स्वयं भी ग्रहण करे।

---

* यथासम्भव पुरुषसूक्तका पाठ करते हुए घण्टानादपूर्वक शुद्ध जल अथवा गङ्गादि तीर्थजलोंद्वारा भगवान् शालग्रामका अभिषेक भी करना चाहिये, इससे उनकी विशेष अनुकम्पा प्राप्त होती है।

श्रीमहालक्ष्मी-पूजन

भगवती महालक्ष्मी चल एवं अचल, दृश्य एवं अदृश्य सभी सम्पत्तियों, सिद्धियों एवं निधियोंकी अधिष्ठात्री साक्षात् नारायणी हैं। भगवान् श्रीगणेश सिद्धि-बुद्धिके एवं शुभ और लाभके स्वामी तथा सभी अमङ्गलों एवं विघ्नोंके नाशक हैं, ये सत्-बुद्धि प्रदान करनेवाले हैं। अतः इनके समवेत-पूजनसे सभी कल्याण-मङ्गल एवं आनन्द प्राप्त होते हैं।

कार्तिक कृष्ण अमावास्याको भगवती श्रीमहालक्ष्मी एवं भगवान् गणेशकी नूतन प्रतिमाओंका प्रतिष्ठापूर्वक विशेष पूजन किया जाता है। पूजनके लिये किसी चौकी अथवा कपड़ेके पवित्र आसनपर गणेशजीके दाहिने भागमें माता महालक्ष्मीको स्थापित करना चाहिये। पूजनके दिन घरको स्वच्छ कर पूजन-स्थानको भी पवित्र कर लेना चाहिये और स्वयं भी पवित्र होकर श्रद्धा-भक्तिपूर्वक सायंकालमें इनका पूजन करना चाहिये। मूर्तिमयी श्रीमहालक्ष्मीजीके पास ही किसी थैलीमें या पवित्र पात्रमें केसरयुक्त चन्दनसे अष्टदल कमल अथवा स्वस्तिक बनाकर उसपर द्रव्य-लक्ष्मी (रुपयों)-को भी स्थापित करके एक साथ ही दोनोंकी पूजा करनी चाहिये। पूजन-सामग्रीको यथास्थान रख ले।

सर्वप्रथम पूर्वाभिमुख अथवा उत्तराभिमुख हो आचमन, पवित्री-धारण, मार्जन-प्राणायाम कर अपने ऊपर तथा पूजा-सामग्रीपर निम्न मन्त्र पढ़कर जल छिड़के—

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
ॐ यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।।

आसन-शुद्धि और स्वस्ति-पाठ (पृ० सं० १८४ के अनुसार) कर ले, सुपारीपर मौली लपेटकर गौरी-गणेश बनाकर अपने सामने अक्षतोंपर स्थापित कर रख ले। तदनन्तर हाथमें जल-अक्षतादि लेकर पूजनका संकल्प करे—

संकल्प—ॐ विष्णुः...(पृ० सं० ३५ के अनुसार) **मासोत्तमे मासे कार्तिकमासे कृष्णपक्षे पुण्यायाममावास्यायां तिथौ अमुक वासरे अमुक गोत्रोत्पन्नः अमुक नाम शर्मा (वर्मा, गुप्तः, दासः) अहं श्रुतिस्मृतिपुराणोक्तफलावाप्तिकामनया ज्ञाताज्ञातकायिकवाचिकमानसिकसकलपापनिवृत्तिपूर्वकं स्थिरलक्ष्मी-प्राप्तये श्रीमहालक्ष्मीप्रीत्यर्थं महालक्ष्मीपूजनं कुबेरादीनां च पूजनं करिष्ये । तदङ्गत्वेन गौरीगणपत्यादिपूजनं च करिष्ये ।**

यह संकल्प-वाक्य पढ़कर जलाक्षतादि गौरी-गणेशके समीप छोड़ दे। पूजनसे पूर्व गौरी-गणेशकी निम्न-रीतिसे प्राण-प्रतिष्ठा कर ले—

प्रतिष्ठा—बायें हाथमें अक्षत लेकर निम्न मन्त्रोंको पढ़ते हुए दाहिने हाथसे उन अक्षतोंको

गौरी-गणेशपर छोड़ता जाय—

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञँ् समिमं दधातु । विश्वे देवास इह मादयन्तामो३ म्प्रतिष्ठ ।

ॐ अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च ।
अस्यै देवत्वमर्चायै मामहेति च कश्चन ।।

इस प्रकार प्रतिष्ठा कर गौरी-गणेशका षोडशोपचार पूजन (पृ० सं० १९०-२०० के अनुसार) करे। तदनन्तर नवग्रह (पृ० सं० २२६), षोडशमातृका (पृ० सं० २२१) तथा कलश-पूजन (पृ० सं० २०२) के अनुसार करे।

प्रधान-पूजा

प्रधान-पूजामें गणेशजी तथा भगवती महालक्ष्मीकी नूतन प्रतिमाका पूजन करे। लक्ष्मी-गणेशकी नूतन प्रतिमा तथा द्रव्यलक्ष्मीकी **'ॐ मनो जूति०'** तथा **'ॐ अस्यै प्राणाः०'** इत्यादि मन्त्र पढ़कर पूर्वोक्त रीतिसे प्राण-प्रतिष्ठा कर ले।

ध्यान—हाथमें फूल लेकर निम्न मन्त्रसे गणेशजीका तथा भगवती महालक्ष्मीका ध्यान करे—

गजाननं भूतगणादिसेवितं कपित्थजम्बूफलचारूभक्षणम् ।
उमासुतं शोकविनाशकारकं नमामि विघ्नेश्वरपादपङ्कजम् ।।
या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी
गम्भीरावर्तनाभिस्तनभरनमिता शुभ्रवस्त्रोत्तरीया ।
या लक्ष्मीर्दिव्यरूपैर्मणिगणखचितैः स्नापिता हेमकुम्भैः
सा नित्यं पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । ध्यानार्थे पुष्पाणि समर्पयामि । (कहकर हाथके फूल गणेशजी तथा महालक्ष्मीपर चढ़ा दे।)

इसी प्रकार आगे भी उपचारोंको गणेश-लक्ष्मीपर चढ़ाता जाय।

आवाहन—एह्येहि हेरम्ब महेशपुत्र समस्तविघ्नौघविनाशदक्ष ।
माङ्गल्यपूजाप्रथमप्रधान गृहाण पूजां भगवन् नमस्ते ।।
ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । आवाहनार्थे पुष्पाणि समर्पयामि । (आवाहनके लिये पुष्प अर्पित करे।)

आसन—तप्तकाञ्चनवर्णाभं मुक्तामणिविराजितम् ।
अमलं कमलं दिव्यमासनं प्रतिगृह्यताम् ।।
ॐ तां म आ वह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । आसनार्थे पुष्पाणि समर्पयामि । (आसनके लिये

पुष्प अर्पित करे।)

पाद्य—गङ्गादितीर्थसम्भूतं गन्धपुष्पादिभिर्युतम् ।
पाद्यं ददाम्यहं देव गृहाणाशु नमोऽस्तु ते ।।
ॐ अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम् ।
श्रियं देवीमुप ह्वये श्रीर्मा देवी जुषताम् ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । पादयोः पाद्यं समर्पयामि । (पाद्यके लिये चन्दनपुष्पादियुक्त जल आचमनीद्वारा अर्पण करे।)

अर्घ्य—गन्धपुष्पाक्षतैर्युक्तमर्घ्यं सम्पादितं मया ।
गृहाणार्घ्यं मया दत्तं प्रसन्नो वरदो भव ।।
ॐ कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मेस्थितां पद्मवर्णां तामिहोप ह्वये श्रियम् ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । हस्तयोरर्घ्यं समर्पयामि । (अष्टगन्धमिश्रित* जल अर्घ्यपात्रसे हाथोंमें दे।)

आचमन—कर्पूरेण सुगन्धेन वासितं स्वादु शीतलम् ।
तोयमाचमनीयार्थं गृहाण परमेश्वर ।।
ॐ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मनीमीं शरणं प्र पद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । आचमनीयं जलं समर्पयामि । (आचमनके लिये जल दे।)

स्नान—मन्दाकिन्यास्तु यद् वारि सर्वपापहरं शुभम् ।
तदिदं कल्पितं देव स्नानार्थं प्रतिगृह्यताम् ।।
ॐ आदित्यवर्णे तपसोऽधि जातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसा नुदन्तु या अन्तरा याश्च बाह्या अलक्ष्मीः ।।
ॐ लक्ष्मीगणपतिभ्यां नमः । स्नानं समर्पयामि । (स्नानके लिये जल चढ़ाये।)
स्नानान्ते आचमनीयं जलं समर्पयामि । (स्नानके बाद **'ॐ लक्ष्मी-गणपतिभ्यां नमः'** ऐसा उच्चारण कर आचमनके लिये जल दे।)

दुग्धस्नान—कामधेनुसमुत्पन्नं सर्वेषां जीवनं परम् ।
पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ।।
ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः ।
पयस्वतीः प्रदिशः सन्तु मह्यम् ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । पयःस्नानं समर्पयामि । पयःस्नानान्ते शुद्धोदकस्नानं समर्पयामि । (गौके कच्चे दूधसे स्नान कराये, पुनः शुद्ध जलसे स्नान कराये।)

दधिस्नान—पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ।

दध्यानीतं मया देव स्नानार्थं प्रतिगृह्यताम् ।।

ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः सुरभि नो मुखा करत्प्र ण आयूँषि तारिषत् ।

ॐ लक्ष्मीगणपतिभ्यां नमः । दधिस्नानं समर्पयामि । दधिस्नानान्ते शुद्धोदकस्नानं समर्पयामि । (दधिसे स्नान कराये, फिर शुद्ध जलसे स्नान कराये।)

घृतस्नान—नवनीतसमुत्पन्नं सर्वसंतोषकारकम् ।
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ।।

ॐ घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा । दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । घृतस्नानं समर्पयामि । घृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि । (घृतसे स्नान कराये तथा फिर शुद्ध जलसे स्नान कराये।)

मधुस्नान—तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु ।
तेजःपुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ।।

ॐ मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ।। मधु नक्तमुतोषसो मधुमत्पार्थिवँ् रजः । मधु द्यौरस्तु नः पिता ।। मधुमान्नो वनस्पतिर्मधुमाँ२ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । मधुस्नानं समर्पयामि । मधुस्नानान्ते शुद्धोदकस्नानं समर्पयामि । (मधु (शहद)-से स्नान कराये, पुनः शुद्ध जलसे स्नान कराये।)

शर्करास्नान—इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका ।
मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम् ।।

ॐ अपाँ् रसमुद्वयसँ् सूर्ये सन्तँ् समाहितम् । अपाँ् रसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । शर्करास्नानं समर्पयामि, शर्करा-स्नानान्ते पुनः शुद्धोदकस्नानं समर्पयामि । (शर्करासे स्नान कराकर पश्चात् शुद्ध जलसे स्नान कराये।)

पञ्चामृतस्नान—दूध, दही, घी, मधु तथा शर्कराको एक पात्रमें मिलाकर पंचामृत तैयार कर ले और उस पञ्चामृतसे एकतन्त्रसे निम्न मन्त्रसे स्नान कराये—

पयो दधि घृतं चैव मधुशर्करयान्वितम् ।
पञ्चामृतं मयानीतं स्नानार्थं प्रतिगृह्यताम् ।।
ॐ पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः ।
सरस्वती तु पञ्चधा सो देशेऽभवत् सरित् ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । पञ्चामृतस्नानं समर्पयामि, पञ्चामृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि । (पञ्चामृतस्नानके अनन्तर शुद्ध जलसे स्नान कराये।)

(यदि भगवती महालक्ष्मीका अभिषेक करना अभीष्ट हो तो शुद्ध जल या दुग्धादिसे 'श्रीसूक्त' का पाठ करते हुए अखण्ड जलधारासे स्नान (अभिषेक) कराये। मृण्मय प्रतिमा

अखण्ड जलधारासे क्षरित न हो जाय, इस आशयसे धातुकी मूर्ति या द्रव्यलक्ष्मीपर अभिषेक किया जाता है, इसे पृथक् पात्रमें कराना चाहिये।)

गन्धोदकस्नान—मलयाचलसम्भूतं चन्दनागरुसम्भवम् ।
चन्दनं देवदेवेश स्नानार्थं प्रतिगृह्यताम् ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । गन्धोदकस्नानं समर्पयामि । (गन्ध (चन्दन)-मिश्रित जलसे स्नान कराये।)

शुद्धोदकस्नान—मन्दाकिन्यास्तु यद्वारि सर्वपापहरं शुभम् ।
तदिदं कल्पितं तुभ्यं स्नानार्थं प्रतिगृह्यताम् ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । शुद्धोदकस्नानं समर्पयामि । (गङ्गाजल अथवा शुद्ध जलसे स्नान कराये)।

आचमन—शुद्धोदकस्नानके बाद **'ॐ लक्ष्मीगणपतिभ्यां नमः'** (ऐसा कहकर आचमनीय जल अर्पित करे।)

तदनन्तर प्रतिमाका अङ्ग-प्रोक्षण कर (पोंछकर) उसे यथास्थान आसनपर स्थापित करे और निम्नरूपसे उत्तराङ्ग-पूजन करे।

वस्त्र—शीतवातोष्णसंत्राणं लज्जाया रक्षणं परम् ।
देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे ।।
ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । वस्त्रं समर्पयामि, आचमनीयं जलं च समर्पयामि । (वस्त्र अर्पित करे, आचमनीय जल दे।)

उपवस्त्र—यस्याभावेन शास्त्रोक्तं कर्म किञ्चिन्न सिध्यति ।
उपवस्त्रं प्रयच्छामि सर्वकर्मोपकारकम् ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । उपवस्त्रं समर्पयामि, आचमनीयं जलं च समर्पयामि । (गणेशजीको रक्तसूत्र तथा देवीको कञ्चुकी आदि उत्तरीय वस्त्र चढ़ाये, आचमनके लिये जल दे।)

मधुपर्क—कांस्ये कांस्येन पिहितो दधिमध्वाज्यसंयुतः ।
मधुपर्को मयानीतः पूजार्थं प्रतिगृह्यताम् ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । मधुपर्कं समर्पयामि, आचमनीयं जलं च समर्पयामि । (काँस्यपात्रमें स्थित मधुपर्क समर्पित कर आचमनके लिये जल दे।)

आभूषण—रत्नकङ्कणवैदूर्यमुक्ताहारादिकानि च ।
सुप्रसन्नेन मनसा दत्तानि स्वीकुरुष्व भोः ।।
ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । नानाविधानि कुण्डलकटकादीनि आभूषणानि

समर्पयामि । (आभूषण समर्पित करे।)

गन्ध—गन्धं कर्पूरसंयुक्तं दिव्यं चन्दनमुत्तमम् ।
विलेपनं सुरश्रेष्ठ प्रीत्यर्थं प्रतिगृह्यताम् ।।
ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोप ह्वये श्रियम् ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । गन्धं समर्पयामि । (अनामिका अँगुलीसे कर्पूर-केसरादिमिश्रित चन्दन अर्पित करे।)

रक्तचन्दन—श्रीखण्डचन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ।।
रक्तचन्दनसम्मिश्रं पारिजातसमुद्भवम् ।
मया दत्तं महालक्ष्मि चन्दनं प्रतिगृह्यताम् ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । रक्तचन्दनं समर्पयामि । (अनामिकासे रक्त चन्दन चढ़ाये।)

सिन्दूर—सिन्दूरं शोभनं रक्तं सौभाग्यं सुखवर्धनम् ।
शुभदं कामदं चैव सिन्दूरं प्रतिगृह्यताम् ।।
ॐ सिन्धोरिव प्राध्वने शूघनासो वात प्रमियः पतयन्ति यह्वाः ।
घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । सिन्दूरं समर्पयामि । (सिन्दूर चढ़ाये।)

कुङ्कुम—कुङ्कुमं कामदं दिव्यं कुङ्कुमं कामरूपिणम् ।
अखण्डकामसौभाग्यं कुङ्कुमं प्रतिगृह्यताम् ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । कुङ्कुमं समर्पयामि । (कुङ्कुम अर्पित करे।)

पुष्पसार (इतर)—दिव्यगन्धसमायुक्तं महापरिमलाद्भुतम् ।
गन्धद्रव्यमिदं भक्त्या दत्तं वै परिगृह्यताम् ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । सुगन्धिततैलं पुष्पसारं च समर्पयामि । (सुगन्धित तेल एवं इतर चढ़ाये।)

अक्षत*—अक्षताश्च सुरश्रेष्ठ कुङ्कुमाक्ताः सुशोभिताः ।
मया निवेदिता भक्त्या गृहाण परमेश्वर ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । अक्षतान् समर्पयामि । (कुङ्कुमाक्त अक्षत अर्पित करे।)

पुष्प एवं पुष्पमाला—माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।
मयानीतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ।।
ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । पुष्पं पुष्पमालां च समर्पयामि । (पुष्पों तथा

पुष्पमालाओंसे अलङ्कृत करे, देवीजीका यथासम्भव लाल कमलके फूलोंसे शृंगार करे।)

दूर्वा—दूर्वाङ्कुरान् सुहरितानमृतान् मङ्गलप्रदान् ।
आनीतांस्तव पूजार्थं गृहाण गणनायक ।।
विष्णवादिसर्वदेवानां प्रियां सर्वसुशोभनाम् ।
क्षीरसागरसम्भूते दूर्वां स्वीकुरु सर्वदा ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । दूर्वाङ्कुरान् समर्पयामि । (दूर्वाङ्कुर अर्पित करे।)

अङ्ग-पूजा

देवी महालक्ष्मीकी रोली, कुङ्कुममिश्रित अक्षत-पुष्पोंसे निम्नाङ्कित एक-एक नाम-मन्त्र पढ़ते हुए अङ्ग-पूजा करे—

ॐ चपलायै नमः, पादौ पूजयामि ।
ॐ चञ्चलायै नमः, जानुनी पूजयामि ।
ॐ कमलायै नमः, कटिं पूजयामि ।
ॐ कात्यायन्यै नमः, नाभिं पूजयामि ।
ॐ जगन्मात्रे नमः, जठरं पूजयामि ।
ॐ विश्ववल्लभायै नमः, वक्षःस्थलं पूजयामि ।
ॐ कमलवासिन्यै नमः, हस्तौ पूजयामि ।
ॐ पद्माननायै नमः, मुखं पूजयामि ।
ॐ कमलपत्राक्ष्यै नमः, नेत्रत्रयं पूजयामि ।
ॐ श्रियै नमः, शिरः पूजयामि ।
ॐ महालक्ष्म्यै नमः, सर्वाङ्गं पूजयामि ।

अष्टसिद्धि-पूजन

इस प्रकार अङ्ग-पूजाके अनन्तर पूर्वादि-क्रमसे आठों दिशाओंमें आठों सिद्धियोंकी पूजा कुङ्कुमाक्त अक्षतोंसे देवी महालक्ष्मीके पास निम्नाङ्कित मन्त्रोंसे करे—

१-ॐ अणिम्ने नमः (पूर्वे), २-ॐ महिम्ने नमः (अग्निकोणे), ३-ॐ गरिम्णे नमः (दक्षिणे), ४-ॐ लघिम्ने नमः (नैर्ऋत्ये), ५-ॐ प्राप्त्यै नमः (पश्चिमे), ६-ॐ प्राकाम्यै नमः (वायव्ये), ७-ॐ ईशितायै नमः (उत्तरे) तथा ८-ॐ वशितायै नमः (ऐशान्याम्) ।

अष्टलक्ष्मी-पूजन

तदनन्तर पूर्वादि-क्रमसे आठों दिशाओंमें महालक्ष्मीके पास कुङ्कुमाक्त अक्षत तथा पुष्पोंसे एक-एक नाम-मन्त्र पढ़ते हुए आठ लक्ष्मियोंका पूजन करे—

१-ॐ आद्यलक्ष्म्यै नमः, २-ॐ विद्यालक्ष्म्यै नमः, ३-ॐ सौभाग्यलक्ष्म्यै नमः, ४-ॐ अमृतलक्ष्म्यै नमः, ५-ॐ कामलक्ष्म्यै नमः, ६-ॐ सत्यलक्ष्म्यै नमः, ७-ॐ

भोगलक्ष्म्यै नमः ८-ॐ योगलक्ष्म्यै नमः ।

धूप—वनस्पतिरसोद्भूतो गन्धाढ्यः सुमनोहरः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ।।
ॐ कर्दमेन प्रजा भूता मयि संभव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । धूपमाघ्रापयामि । (धूप आघ्रापित करे।)

दीप—कार्पासवर्तिसंयुक्तं घृतयुक्तं मनोहरम् ।
तमोनाशकरं दीपं गृहाण परमेश्वर ।।
ॐ आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरं श्रियं वासय मे कुले ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । दीपं दर्शयामि । (दीपक दिखाये और फिर हाथ धो ले।)

नैवेद्य—शर्कराखण्डखाद्यानि दधिक्षीरघृतानि च ।
आहारं भक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम् ।।
ॐ आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । नैवेद्यं निवेदयामि, नैवेद्यान्ते आचमनीयं जलं समर्पयामि, मध्ये पानीयम्, उत्तरापोऽशनार्थं हस्तप्रक्षालनार्थं मुखप्रक्षालनार्थं च जलं समर्पयामि । (नैवेद्य निवेदित कर आचमनीय जल, पानीय जल एवं हस्तादि प्रक्षालनके लिये भी जल अर्पित करे।)

करोद्वर्तन—'ॐ लक्ष्मीगणपतिभ्यां नमः' यह कहकर करोद्वर्तनके लिये हाथोंमें चन्दन उपलेपित करे।

ऋतुफल—फलेन फलितं सर्वं त्रैलोक्यं सचराचरम् ।
तस्मात् फलप्रदानेन पूर्णाः सन्तु मनोरथाः ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । अखण्डऋतुफलं समर्पयामि । (ऋतुफल अर्पित करे।)

ताम्बूल-पूगीफल—पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ।
एलाचूर्णादिसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ।।
ॐ आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । मुखवासार्थे एलालवंगादिभिर्युतं ताम्बूलपत्रं पूगफलं च समर्पयामि । (एला, लवंग, पूगीफलयुक्त ताम्बूल अर्पित करे।)

दक्षिणा—हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।।

ॐ तां म आ वह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम् ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । दक्षिणां समर्पयामि । (दक्षिणा चढ़ाये।)

नीराजन—कदलीगर्भसम्भूतं कर्पूरं तु प्रदीपितम् ।
आरार्तिकमहं कुर्वे पश्य मे वरदो भव ।।
चक्षुर्दं सर्वलोकानां तिमिरस्य निवारणम् ।
आर्तिक्यं कल्पितं भक्त्या गृहाण परमेश्वरि ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । नीराजनं समर्पयामि । (आरती करे तथा जल छोड़े, हाथ धो ले।)

प्रदक्षिणा—यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । प्रदक्षिणां समर्पयामि । (प्रदक्षिणा करे।)

पुष्पांजलि—अंजलिमें फूल लेकर यह मन्त्र पढ़े—

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् ।।

ॐ लक्ष्मीगणपतिभ्यां नमः पुष्पाजलिं समर्पयामि । (पुष्पांजलि अर्पित करे।)

प्रार्थना—हाथ जोड़कर प्रार्थना करे—

विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय ।
नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते ।।
सुरासुरेन्द्रादिकिरीटमौक्तिकैर्युक्तं सदा यत्तव पादपङ्कजम् ।
परावरं पातु वरं सुमङ्गलं नमामि भक्त्याखिलकामसिद्धये ।।
भवानि त्वं महालक्ष्मीः सर्वकामप्रदायिनी ।
सुपूजिता प्रसन्ना स्यान्महालक्ष्मि नमोऽस्तु ते ।।
नमस्ते सर्वदेवानां वरदासि हरिप्रिये ।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात् त्वदर्चनात् ।।

ॐ लक्ष्मीगणपतिभ्यां नमः । प्रार्थनापूर्वकं नमस्कारान् समर्पयामि । (प्रार्थना करते हुए नमस्कार करे।)

समर्पण—पूजनके अन्तमें—**'कृतेनानेन पूजनेन लक्ष्मीगणपती प्रीयेताम्, न मम ।'** (यह वाक्य उच्चारणकर समस्त पूजन-कर्म निवेदित करे तथा जल गिराये।)

इस प्रकार गणेशजी तथा भगवती महालक्ष्मीके यथालब्धोपचार-पूजनके अनन्तर महालक्ष्मीपूजनके अंग-रूप—श्रीदेहलीविनायक, मसिपात्र, लेखनी, सरस्वती, कुबेर, तुला-मान तथा दीपकोंकी पूजा की जाती है। संक्षेपमें उन्हें भी यहाँ दिया जा रहा है। सर्वप्रथम 'देहलीविनायक' की पूजा की जाती है—

देहलीविनायक-पूजन

व्यापारिक प्रतिष्ठानादिमें दीवालोंपर **'ॐ श्रीगणेशाय नमः',** 'स्वस्तिक चिह्न', 'शुभ-लाभ' आदि मांगलिक एवं कल्याणकर शब्द सिन्दूरादिसे लिखे जाते हैं। इन्हीं शब्दोंपर **'ॐ देहलीविनायकाय नमः'** इस नाम-मन्त्रद्वारा गन्ध-पुष्पादिसे पूजन करे।

श्रीमहाकाली (दावात)-पूजन

स्याही-युक्त दावातको भगवती महालक्ष्मीके सामने पुष्प तथा अक्षतपुंजमें रखकर उसमें सिन्दूरसे स्वस्तिक बना दे तथा मौली लपेट दे। **'ॐ श्रीमहाकाल्यै नमः'** इस नाम-मन्त्रसे गन्ध-पुष्पादि पञ्चोपचारोंसे या षोडशोपचारोंसे दावातमें भगवती महाकालीका पूजन करे और अन्तमें इस प्रकार प्रार्थनापूर्वक उन्हें प्रणाम करे—

कालिके! त्वं जगन्मातर्मसिरूपेण वर्तसे ।
उत्पन्ना त्वं च लोकानां व्यवहारप्रसिद्धये ।।
या कालिका रोगहरा सुवन्द्या भक्तैः समस्तैर्व्यवहारदक्षैः ।
जनैर्जनानां भयहारिणी च सा लोकमाता मम सौख्यदास्तु ।।

लेखनी-पूजन

लेखनी (कलम)-पर मौली बाँधकर सामने रख ले और—

लेखनी निर्मिता पूर्वं ब्रह्मणा परमेष्ठिना ।
लोकानां च हितार्थाय तस्मात्तां पूजयाम्यहम् ।।

'ॐ लेखनीस्थायै देव्यै नमः' इस नाम-मन्त्रद्वारा गन्ध-पुष्पाक्षत आदिसे पूजनकर इस प्रकार प्रार्थना करे—

शास्त्राणां व्यवहाराणां विद्यानामाप्नुयाद्यतः ।
अतस्त्वां पूजयिष्यामि मम हस्ते स्थिरा भव ।।

सरस्वती-(पञ्जिका-बही-खाता) पूजन

पञ्जिका—बही, बसनामें रोली या केसरयुक्त चन्दनसे स्वस्तिक-चिह्न बनाये तथा उसमें सरस्वतीका पूजन करे। सर्वप्रथम सरस्वतीजीका ध्यान इस प्रकार करे—

ध्यान—या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता ।
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता ।
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ।।

'ॐ वीणापुस्तकधारिण्यै श्रीसरस्वत्यै नमः'—इस नाम-मन्त्रसे गन्धादि उपचारोंद्वारा पूजन करे।

कुबेर-पूजन

तिजोरी अथवा रुपये रखे जानेवाले संदूक आदिको स्वस्तिकादिसे अलङ्कृत कर उसमें निधिपति कुबेरका आवाहन करे—

आवाहयामि देव त्वामिहायाहि कृपां कुरु ।
कोशं वर्द्धय नित्यं त्वं परिरक्ष सुरेश्वर ।।

आवाहनके पश्चात् **'ॐ कुबेराय नमः'** इस नाम-मन्त्रसे यथालब्धोपचार पूजनकर अन्तमें इस प्रकार प्रार्थना करे—

धनदाय नमस्तुभ्यं निधिपद्माधिपाय च ।
भवन्तु त्वत्प्रसादेन धनधान्यादिसम्पदः ।।

—इस प्रकार प्रार्थना कर पूर्वपूजित हल्दी, धनिया, कमलगट्टा, द्रव्य, दूर्वादिसे युक्त थैली (द्रव्यलक्ष्मीको) तिजोरीमें रखे।

तुला तथा मान-पूजन

सिन्दूरसे तराजू आदिपर स्वस्तिक बना ले। मौली लपेटकर तुलाधिष्ठातृदेवताका इस प्रकार ध्यान करना चाहिये—

नमस्ते सर्वदेवानां शक्तित्वे सत्यमाश्रिता ।
साक्षीभूता जगद्धात्री निर्मिता विश्वयोनिना ।।

ध्यानके बाद **'ॐ तुलाधिष्ठातृदेवतायै नमः'** इस नाम-मन्त्रसे गन्धाक्षतादि उपचारोंद्वारा पूजनकर नमस्कार करे।

दीपमालिका-(दीपक)-पूजन

किसी पात्रमें ग्यारह, इक्कीस या उससे अधिक दीपकोंको प्रज्वलित कर महालक्ष्मीके समीप रखकर उस दीप-ज्योतिका **'ॐ दीपावल्यै नमः'** इस नाम-मन्त्रसे गन्धादि उपचारोंद्वारा पूजनकर इस प्रकार प्रार्थना करे—

त्वं ज्योतिस्त्वं रविश्चन्द्रो विद्युदग्निश्च तारकाः ।
सर्वेषां ज्योतिषां ज्योतिर्दीपावल्यै नमो नमः ।।

दीपमालिकाओंका पूजन कर अपने आचारके अनुसार संतरा, ईख, पानीफल, धानका लावा इत्यादि पदार्थ चढ़ाये। धानका लावा (खील) गणेश, महालक्ष्मी तथा अन्य सभी देवी-देवताओंको भी अर्पित करे। अन्तमें अन्य सभी दीपकोंको प्रज्वलित कर सम्पूर्ण गृह अलङ्कृत करे।

प्रधान आरती

इस प्रकार भगवती महालक्ष्मी तथा उनके सभी अंग-प्रत्यङ्गों एवं उपाङ्गोंका पूजन कर लेनेके अनन्तर प्रधान आरती करनी चाहिये। इसके लिये एक थालीमें स्वस्तिक आदि माङ्गलिक चिह्न बनाकर अक्षत तथा पुष्पोंके आसनपर किसी दीपक आदिमें घृतयुक्त बत्ती

प्रज्वलित करे। एक पृथक् पात्रमें कर्पूर भी प्रज्वलित कर वह पात्र भी थालीमें यथास्थान रख ले, आरती-थालका जलसे प्रोक्षण कर ले। पुनः आसनपर खड़े होकर अन्य पारिवारिक जनोंके साथ घण्टानादपूर्वक निम्न आरती गाते हुए साङ्ग-महालक्ष्मीजीकी मंगल आरती करे—

श्रीलक्ष्मीजीकी आरती

ॐ जय लक्ष्मी माता, (मैया) जय लक्ष्मी माता ।
तुमको निसिदिन सेवत हर-विष्णू-धाता ।।ॐ।।
उमा, रमा, ब्रह्माणी, तुम ही जग-माता ।
सूर्य-चन्द्रमा ध्यावत, नारद ऋषि गाता ।।ॐ।।
दुर्गारूप निरञ्जनि, सुख-सम्पति-दाता ।
जो कोइ तुमको ध्यावत, ऋधि-सिधि-धन पाता ।।ॐ।।
तुम पाताल-निवासिनि, तुम ही शुभदाता ।
कर्म-प्रभाव-प्रकाशिनि, भवनिधिकी त्राता ।।ॐ।।
जिस घर तुम रहती, तहँ सब सद्गुण आता ।
सब सम्भव हो जाता, मन नहिं घबराता ।।ॐ।।
तुम बिन यज्ञ न होते, वस्त्र न हो पाता ।
खान-पानका वैभव सब तुमसे आता ।।ॐ।।
शुभ-गुण-मन्दिर सुन्दर, क्षीरोदधि-जाता ।
रत्न चतुर्दश तुम बिन कोई नहिं पाता ।।ॐ।।
महालक्ष्मी (जी) की आरति, जो कोई नर गाता ।
उर आनन्द समाता, पाप उतर जाता ।।ॐ।।

मन्त्र-पुष्पाञ्जलि—दोनों हाथोंमें कमल आदिके पुष्प लेकर हाथ जोड़े और निम्न मन्त्रोंका पाठ करे—

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ।।
ॐ राजाधिराजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे ।
स मे कामान् कामकामाय मह्यं कामेश्वरो वैश्रवणो ददातु ।।
कुबेराय वैश्रवणाय महाराजाय नमः ।

ॐ स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात् सार्वभौमः सार्वायुष आऽन्तादा परार्धात् पृथिव्यै समुद्रपर्यन्ताया एकराडिति तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे । आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति ।।

ॐ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः ।।

महालक्ष्म्यै च विद्महे विष्णुपत्न्यै च धीमहि तन्नो लक्ष्मीः प्रचोदयात् ।

ॐ या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः ।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम् ।।

ॐ महालक्ष्म्यै नमः । मन्त्रपुष्पाञ्जलिं समर्पयामि । (हाथमें लिये फूल गणेशजी तथा महालक्ष्मीपर चढ़ा दे।) प्रदक्षिणा कर साष्टाङ्ग प्रणाम करे, पुनः हाथ जोड़कर क्षमा-प्रार्थना करे—

क्षमा-प्रार्थना—नमस्ते सर्वदेवानां वरदासि हरिप्रिये ।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्चनात् ।।
आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि क्षमस्व परमेश्वरि ।।
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ।
यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ।।
त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देवदेव ।।
पापोऽहं पापकर्माहं पापात्मा पापसम्भवः ।
त्राहि मां परमेशानि सर्वपापहरा भव ।।
अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ।।
सरसिजनिलये सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ।।

पुनः प्रणाम करके **'ॐ अनेन यथाशक्त्यर्चनेन श्रीमहालक्ष्मीः प्रसीदतु'** यह कहकर जल छोड़ दे। ब्राह्मण एवं गुरुजनोंको प्रणाम कर चरणामृत तथा प्रसाद वितरण करे।

विसर्जन—पूजनके अन्तमें हाथमें अक्षत लेकर नूतन गणेश एवं महालक्ष्मीकी प्रतिमाको छोड़कर अन्य सभी आवाहित, प्रतिष्ठित एवं पूजित देवताओंको अक्षत छोड़ते हुए निम्न मन्त्रसे विसर्जित करे—

यान्तु देवगणाः सर्वे पूजामादाय मामकीम् ।
इष्टकामसमृद्ध्यर्थं पुनरागमनाय च ।।

---

* अगर, तगर, चन्दन, कस्तूरी, लालचन्दन, कुंकुम, देवदारु तथा केसर—ये अष्टगन्ध

कहलाते हैं।

* देशाचारसे कहीं-कहीं महालक्ष्मीको अक्षतके स्थानपर हल्दी या धनिया तथा भोगमें गुड़का प्रसाद दिया जाता है।

वैदिक शिव-पूजन

भगवान् शङ्करकी पूजाके समय शुद्ध आसनपर बैठकर पहले आचमन, पवित्री-धारण, शरीर-शुद्धि और आसन-शुद्धि कर लेनी चाहिये। तत्पश्चात् पूजन-सामग्रीको यथास्थान रखकर रक्षादीप प्रज्वलित कर ले, तदनन्तर स्वस्ति-पाठ करे। इसके बाद पूजनका संकल्प कर तदङ्गभूत भगवान् गणेश एवं भगवती गौरीका स्मरणपूर्वक पूजन करना चाहिये। रुद्राभिषेक, लघुरुद्र, महारुद्र तथा सहस्रार्चन आदि विशेष अनुष्ठानोंमें नवग्रह, कलश, षोडशमातृका आदिका भी पूजन करना चाहिये। यदि ब्राह्मणोंद्वारा अभिषेक-कर्म सम्पन्न हो रहा हो तो पहले उनका पादप्रक्षालनपूर्वक अर्घ्य, चन्दन, पुष्पमाला आदिसे अर्चन करे, फिर वरणीय सामग्री हाथमें ग्रहणकर संकल्पपूर्वक उनका वरण करे।

वरणका संकल्प—ॐ अद्य....मम....रुद्राभिषेकाख्ये कर्मणि एभिर्वरणद्रव्यैः अमुकामुकगोत्रोत्पन्नान् अमुकामुक नाम्नो ब्राह्मणान् युष्मानहं वृणे ।

तदनन्तर ब्राह्मण बोलें—**'वृताः स्मः' ।**

(स्वस्तिवाचन एवं गणपत्यादि-पूजन पृ० १८४-२०१ के अनुसार करे) भगवान् शंकरकी पूजामें उनके विशिष्ट अनुग्रहकी प्राप्तिके लिये उनके परिकर-परिच्छद एवं पार्षदोंका भी पूजन किया जाता है। संक्षेपमें उसे भी यहाँ दिया जा रहा है।

नन्दीश्वर-पूजन

ॐ आयं गौः पृश्निरक्रमीदसदन् मातरं पुरः । पितरं च प्रयन्त्स्वः ।।

पूजन करके नीचे लिखी प्रार्थना करे—

ॐ प्रैतु वाजी कनिक्रदन्नानदद्रासभः पत्वा ।
भरन्नग्निं पुरीष्यं मा पाद्यायुषः पुरा ।।

वीरभद्र-पूजन

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाँ् सस्तनूभिर्व्यशेमहि देवहितं यदायुः ।।

पूजन करके नीचे लिखी प्रार्थना करे—

ॐ भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः । भद्रा उत प्रशस्तयः ।।

कार्तिकेय-पूजन

ॐ यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन् ।।

पूजन करके नीचे लिखी प्रार्थना करे—

ॐ यत्र बाणाः सम्पतन्ति कुमारा विशिखा इव । तन्न इन्द्रो
बृहस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु ।।

कुबेर-पूजन

ॐ कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नम उक्तिं यजन्ति ।।

पूजन करके नीचे लिखी प्रार्थना करे—

ॐ वयँ् सोम व्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ।।

कीर्तिमुख-पूजन

ॐ असवे स्वाहा वसवे स्वाहा विभुवे स्वाहा विवस्वते स्वाहा गणश्रियेस्वाहा गणपतये स्वाहाऽभिभुवे स्वाहाऽधिपतये स्वाहा शूषाय स्वाहा सँ् सर्पाय स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहा मलिम्लुचाय स्वाहा दिवा पतयते स्वाहा ।।

पूजन करके नीचे लिखी प्रार्थना करे—

ॐ ओजश्च मे सहश्च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थीनि च मे परूँ् षि च मे शरीराणि च म आयुश्च मे जरा च मे यज्ञेन कल्पन्ताम् ।

सर्प-पूजन

जलहरीमें सर्पका आकार हो तो सर्पका पूजनकर पश्चात् शिव-पूजन करे।

शिव-पूजन

सर्वप्रथम हाथमें बिल्वपत्र और अक्षत लेकर भगवान् शिवका ध्यान करे*।

ध्यान—ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ।।
ॐ नमस्ते रुद्र मन्यव उतो त इषवे नमः । बाहुभ्यामुत ते नमः ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, ध्यानार्थे बिल्वपत्रं समर्पयामि । (ध्यान करके शिवपर बिल्वपत्र चढ़ा दे।)

आसन—ॐ या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।

तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, आसनार्थे बिल्वपत्राणि समर्पयामि । (आसनके लिये बिल्वपत्र चढ़ाये।)

पाद्य—ॐ यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे ।

शिवां गिरित्र तां कुरु मा हिँ् सीः पुरुषं जगत् ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, पादयोः पाद्यं समर्पयामि । (जल चढ़ाये।)

अर्घ्य—ॐ शिवेन वचसा त्वा गिरिशाच्छा वदामसि ।

यथा नः सर्वमिज्जगदयक्ष्मँ् सुमना असत् ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, हस्तयोरर्घ्यं समर्पयामि । (अर्घ्य समर्पित करे।)

आचमन—ॐ अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।

अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योऽधराचीः परा सुव ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, आचमनीयं जलं समर्पयामि । (जल चढ़ाये।)

स्नान—ॐ असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ।

ये चैनँ् रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाँ् हेड ईमहे ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, स्नानीयं जलं समर्पयामि । स्नानान्ते आचमनीयं जलं च समर्पयामि । (स्नानीय और आचमनीय जल चढ़ाये।)

पयःस्नान—ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः ।

पयस्वतीः प्रदिशः सन्तु मह्यम् ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, पयःस्नानं समर्पयामि, पयःस्नानान्ते शुद्धोदकस्नानं समर्पयामि, शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि । (दूधसे स्नान कराये, पुनः शुद्ध जलसे स्नान कराये और आचमनके लिये जल चढ़ाये।)

दधिस्नान—ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।

सुरभि नो मुखा करत्प्र ण आयूँ षि तारिषत् ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, दधिस्नानं समर्पयामि, दधिस्नानान्ते शुद्धोदकस्नानं समर्पयामि, शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि । (दहीसे स्नान कराकर शुद्ध जलसे स्नान कराये तथा आचमनके लिये जल समर्पित करे।)

घृतस्नान—ॐ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ।

अनुष्वधमा वह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, घृतस्नानं समर्पयामि,

घृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि, शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि । (घृतसे स्नान कराकर शुद्ध जलसे स्नान कराये और पुनः आचमनके लिये जल चढ़ाये।)

मधुस्नान—

ॐ मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ।।
मधु नक्तमुतोषसो मधुमत्पार्थिवँ् रजः । मधु द्यौरस्तु नः पिता ।।
मधुमान्नो वनस्पतिर्मधुमाँ२ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, मधुस्नानं समर्पयामि, मधुस्नानान्ते शुद्धोदकस्नानं समर्पयामि, शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि । (मधुसे स्नान कराकर शुद्ध जलसे स्नान कराये तथा आचमनके लिये जल समर्पित करे।)

शर्करास्नान—ॐ अपाँ् रसमुद्वयसँ् सूर्ये सन्तँ् समाहितम् ।
अपाँ्रसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयामगृहीतो-
ऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, शर्करास्नानं समर्पयामि, शर्करास्नानान्ते शुद्धोदकस्नानं समर्पयामि, शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि । (शर्करासे स्नान कराकर शुद्ध जलसे स्नान कराये तथा आचमनके लिये जल चढ़ाये।)

पञ्चामृतस्नान—ॐ पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः ।
सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, पञ्चामृतस्नानं समर्पयामि, पञ्चामृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि, शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि । (पञ्चामृतसे स्नान कराकर शुद्ध जलसे स्नान कराये तथा आचमनके लिये जल चढ़ाये।)

गन्धोदकस्नान—ॐ अँ् शुना ते अँ् शुः पृच्यतां परुषा परुः ।
गन्धस्ते सोममवतु मदाय रसो अच्युतः ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, गन्धोदकस्नानं समर्पयामि, गन्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि । (गन्धोदकसे स्नान कराकर आचमनके लिये जल चढ़ाये।)

शुद्धोदकस्नान—ॐ शुद्धवालः सर्वशुद्धवालो मणिवालस्त आश्विनाः श्येतः
श्येताक्षोऽरुणस्ते रुद्राय पशुपतये कर्णा यामा अवलिप्ता रौद्रा नभोरूपाः पार्जन्या ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, शुद्धोदकस्नानं समर्पयामि । (शुद्ध जलसे स्नान कराये।)

आचमनीय जल—

ॐ अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहीँ् श्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योऽधराचीःपरा सुव ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, आचमनीयं जलं समर्पयामि । (आचमनके लिये जल चढ़ाये।)

अभिषेक

शुद्ध जल, गङ्गाजल अथवा दुग्धादिसे निम्न मन्त्रोंका पाठ करते हुए शिवलिङ्गका अभिषेक करे—

ॐ नमस्ते रुद्र मन्यव उतो त इषवे नमः । बाहुभ्यामुत ते नमः ।।
या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।
तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि ।।
यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे ।
शिवां गिरित्र तां कुरु मा हिँ् सीः पुरुषं जगत् ।।
शिवेन वचसा त्वा गिरिशाच्छा वदामसि ।
यथा नः सर्वमिज्जगदयक्ष्मँ् सुमना असत् ।।
अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योऽधराचीः परा सुव ।।
असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ।
ये चैनँ् रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाँ्हेड ईमहे ।।
असौ योऽवसर्पति नीलग्रीवो विलोहितः ।
उतैनं गोपा अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः ।।
नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः ।।
प्रमुञ्च धन्वनस्त्वमुभयोरात्न्योर्ज्याम् ।
याश्च ते हस्त इषवः परा ता भगवो वप ।।
विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ२ उत ।
अनेशन्नस्य या इषव आभुरस्य निषङ्गधिः ।।
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ।
तयाऽस्मान्विश्वतस्त्वमयक्ष्मया परि भुज ।।
परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ।
अथो य इषुधिस्तवारे अस्मन्नि धेहि तम् ।।
अवतत्य धनुष्ट्वँ् सहस्राक्ष शतेषुधे ।
निशीर्य शल्यानां मुखा शिवो नः सुमना भव ।।

नमस्त आयुधायानातताय धृष्णवे ।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ।।
मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ।।
मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
मा नो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित् त्वा हवामहे ।।

अभिषेकके अनन्तर शुद्धोदक-स्नान कराये। तत्पश्चात् **'ॐ द्यौः शान्तिः'** इत्यादि शान्तिक मन्त्रोंका पाठ करते हुए शान्त्यभिषेक करना चाहिये। तदनन्तर भगवान्‌को आचमन कराकर उत्तराङ्ग-पूजन करे।

वस्त्र—ॐ असौ योऽवसर्पति नीलग्रीवो विलोहितः ।
उतैनं गोपा अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, वस्त्रं समर्पयामि, वस्त्रान्ते आचमनीयं जलं समर्पयामि । (वस्त्र चढ़ाये तथा आचमनके लिये जल चढ़ाये।)

यज्ञोपवीत—ॐ नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, यज्ञोपवीतं समर्पयामि, यज्ञोपवीतान्ते आचमनीयं जलं समर्पयामि । (यज्ञोपवीत समर्पित करे तथा आचमनके लिये जल चढ़ाये।)

उपवस्त्र—ॐ सुजातो ज्योतिषा सह शर्म वरूथमाऽसदत्स्वः ।
वासो अग्ने विश्वरूपँ् सं व्ययस्व विभावसो ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, उपवस्त्रं समर्पयामि, उपवस्त्रान्ते आचमनीयं जलं समर्पयामि । (उपवस्त्र चढ़ाये तथा आचमनके लिये जल दे।)

गन्ध—ॐ प्रमुञ्च धन्वनस्त्वमुभयोरात्न्योर्ज्याम् ।
याश्च ते हस्त इषवः परा ता भगवो वप ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, गन्धानुलेपनं समर्पयामि । (चन्दन उपलेपित करे।)

सुगन्धित द्रव्य—ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, सुगन्धिद्रव्यं समर्पयामि । (सुगन्धित द्रव्य चढ़ाये।)

अक्षत—ॐ व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे यज्ञेन कल्पन्ताम् ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, अक्षतान् समर्पयामि ।

(अक्षत चढ़ाये।)

पुष्पमाला—ॐ विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ२ उत ।

अनेशन्नस्य या इषव आभुरस्य निषङ्गधिः ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, पुष्पमालां समर्पयामि । (पुष्पमाला चढ़ाये।)

बिल्वपत्र—ॐ नमो बिल्मिने च कवचिने च नमो वर्मिणे च वरूथिने च

नमः श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्याय च ।।

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रिधायुतम् ।

त्रिजन्मपापसंहारं बिल्वपत्रं शिवार्पणम् ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, बिल्वपत्राणि समर्पयामि । (बिल्वपत्र समर्पित करे।)

नानापरिमलद्रव्य—

ॐ अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ।

हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमाँ सं परि पातु विश्वतः ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, नानापरिमलद्रव्याणि समर्पयामि । (विविध परिमलद्रव्य चढ़ाये।)

धूप—ॐ या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ।

तयाऽस्मान्विश्वतस्त्वमयक्ष्मया परि भुज ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, धूपमाघ्रापयामि । (धूप आघ्रापित करे।)

दीप—ॐ परि ते धन्वनो हेतिरस्मान् वृणक्तु विश्वतः ।

अथो य इषुधिस्तवारे अस्मन्नि धेहि तम् ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, दीपं दर्शयामि । (दीप दिखलाये और हाथ धो ले।)

नैवेद्य—ॐ अवतत्य धनुष्ट्वँ सहस्राक्ष शतेषुधे ।

निशीर्य शल्यानां मुखा शिवो नः सुमना भव ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, नैवेद्यं निवेदयामि । नैवेद्यान्ते ध्यानम्, ध्यानान्ते आचमनीयं जलं समर्पयामि । (नैवेद्य निवेदित करे, तदनन्तर भगवान्‌का ध्यान करके आचमनके लिये जल चढ़ाये।)

करोद्वर्तन—ॐ सिञ्चति परि षिञ्चन्त्युत्सिञ्चन्ति पुनन्ति च ।

सुरायै बभ्र्वै मदे किन्त्वो वदति किन्त्वः ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, करोद्वर्तनार्थे चन्दनानुलेपनं समर्पयामि । (चन्दनका अनुलेपन करे।)

ऋतुफल—ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।

बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वँ् हसः ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, ऋतुफलानि समर्पयामि । (ऋतुफल समर्पित करे।)

ताम्बूल-पूगीफल—ॐ नमस्त आयुधायानातताय धृष्णवे ।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, मुखवासार्थे सपूगीफलं ताम्बूलपत्रं समर्पयामि । (पान और सुपारी चढ़ाये।)

दक्षिणा—ॐ यद्दत्तं यत्परादानं यत्पूर्तं याश्च दक्षिणाः ।
तदग्निर्वैश्वकर्मणः स्वर्देवेषु नो दधत् ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, कृतायाः पूजायाः साद्गुण्यार्थे द्रव्यदक्षिणां समर्पयामि । (द्रव्य-दक्षिणा समर्पित करे।)

आरती—ॐ आ रात्रि पार्थिवँ् रजः पितुरप्रायि धामभिः ।
दिवः सदाँ् सि बृहती वि तिष्ठस आ त्वेषं वर्तते तमः ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, कर्पूरार्तिक्यदीपं दर्शयामि । (कपूरकी आरती करे।)

भगवान् गङ्गाधरकी आरती

ॐ जय गङ्गाधर जय हर जय गिरिजाधीशा ।
त्वं मां पालय नित्यं कृपया जगदीशा ।।१।। हर हर हर महादेव ।।
कैलासे गिरिशिखरे कल्पद्रुमविपिने ।
गुञ्जति मधुकरपुञ्जे कुञ्जवने गहने ।।
कोकिलकूजित खेलत हंसावन ललिता ।
रचयति कलाकलापं नृत्यति मुदसहिता ।।२।। हर हर हर महादेव ।।
तस्मिंल्ललितसुदेशे शाला मणिरचिता ।
तन्मध्ये हरनिकटे गौरी मुदसहिता ।।
क्रीडा रचयति भूषारञ्जित निजमीशम् ।
इन्द्रादिक सुर सेवत नामयते शीशम् ।।३।। हर हर हर महादेव ।।
बिबुधबधू बहु नृत्यत हृदये मुदसहिता ।
किन्नर गायन कुरुते सप्त स्वर सहिता ।।
धिनकत थै थै धिनकत मृदङ्ग वादयते ।
क्वण क्वण ललिता वेणुं मधुरं नाटयते ।।४।। हर हर हर महादेव ।।
रुण रुण चरणे रचयति नूपुरमुज्ज्वलिता ।
चक्रावर्ते भ्रमयति कुरुते तां धिक तां ।।
तां तां लुप चुप तां तां डमरू वादयते ।

अङ्गुष्ठाङ्गुलिनादं लासकतां कुरुते ।।५।। हर हर हर महादेव ।।
कर्पूरद्युतिगौरं पञ्चाननसहितम् ।
त्रिनयनशशिधरमौलिं विषधरकण्ठयुतम् ।।
सुन्दरजटाकलापं पावकयुतभालम् ।
डमरुत्रिशूलपिनाकं करधृतनृकपालम् ।।६।। हर हर हर महादेव ।।
मुण्डै रचयति माला पन्नगमुपवीतम् ।
वामविभागे गिरिजारूपं अतिललितम् ।।
सुन्दरसकलशरीरे कृतभस्माभरणम् ।
इति वृषभध्वजरूपं तापत्रयहरणम् ।।७।। हर हर हर महादेव ।।
शङ्खनिनादं कृत्वा झल्लरि नादयते ।
नीराजयते ब्रह्मा वेदऋचां पठते ।।
अतिमृदुचरणसरोजं हृत्कमले धृत्वा ।
अवलोकयति महेशं ईशं अभिनत्वा ।।८।। हर हर हर महादेव ।।
ध्यानं आरति समये हृदये अति कृत्वा ।
रामस्त्रिजटानाथं ईशं अभिनत्वा ।।
संगतिमेवं प्रतिदिन पठनं यः कुरुते ।
शिवसायुज्यं गच्छति भक्त्या यः शृणुते ।।९।। हर हर हर महादेव ।।

आरतीके बाद जल गिरा दे। देवताको फूल चढ़ाये। फिर दोनों हाथोंसे आरती लेकर हाथ धो ले।

प्रदक्षिणा—

ॐ मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, प्रदक्षिणां समर्पयामि । (प्रदक्षिणा करे।)

पुष्पाञ्जलि—

ॐ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
मा नो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित् त्वा हवामहे ।।
ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, मन्त्रपुष्पाञ्जलिं समर्पयामि । (मन्त्र-पुष्पाञ्जलि समर्पण करे, तदनन्तर साष्टांग प्रणाम और पूजनकर्म शिवार्पण करे।)

नमः सर्वहितार्थाय जगदाधारहेतवे ।
साष्टाङ्गोऽयं प्रणामस्ते प्रयत्नेन मया कृतः ।।
पापोऽहं पापकर्माहं पापात्मा पापसम्भवः ।

त्राहि मां पार्वतीनाथ सर्वपापहरो भव ।।

ॐ भूर्भुवः स्वः श्रीनर्मदेश्वरसाम्बसदाशिवाय नमः, प्रार्थनापूर्वक-नमस्कारान् समर्पयामि । अनया पूजया श्रीनर्मदेश्वरसाम्बसदाशिवः प्रीयतां न मम । श्रीसाम्बसदाशिवार्पणमस्तु ।

इसके बाद भगवान् शंकरकी विशेष उपासनाकी दृष्टिसे पञ्चाक्षर-मन्त्रका जप, रुद्राभिषेक तथा बिल्वपत्र एवं कमलपुष्पोंसे सहस्रार्चन आदि किये जा सकते हैं। अन्तमें संक्षेपमें उत्तराङ्ग-पूजन कर आरती, पुष्पाञ्जलि एवं स्तुति करनी चाहिये। शिवरात्रि आदि पर्वोंमें बिल्व-पत्रादिसे शिवार्चन तथा रात्रि-जागरणकी विशेष महिमा है।

---

* प्रतिष्ठित शिवमूर्ति, ज्योतिर्लिंग, स्वयम्भूलिङ्ग तथा नर्मदेश्वरलिङ्गादिमें आवाहन एवं विसर्जन नहीं होता, उनमें ध्यान करके ही पूजा की जाती है।

पार्थिव-पूजन[१]

पार्थिव-पूजनके लिये स्नान, संध्योपासन आदि नित्यकर्मसे निवृत्त होकर शुभासनपर पूर्व या उत्तरकी ओर मुख करके बैठे। पूजाकी सामग्रीको सँभालकर रख दे। अच्छी मिट्टी[२] भी रख ले। भस्मका त्रिपुण्ड्र लगाकर रुद्राक्षकी माला पहन ले[३]। पवित्री धारण कर आचमन और प्राणायाम करे। इसके बाद विनियोगसहित **'ॐ अपवित्रः०'** इस मन्त्रसे अपना और पूजन-सामग्रीका सम्प्रोक्षण करे। रक्षादीप जला ले। विनियोगसहित **'ॐ पृथ्वि त्वया०'** इस मन्त्रसे आसनको पवित्र कर ले। हाथमें अक्षत और पुष्प लेकर स्वस्त्ययन (पृ० सं० १८४ के अनुसार) तथा गणपति-स्मरण करे। इसके बाद दाहिने हाथमें अर्घ्यपात्र लेकर उसमें कुशत्रय, पुष्प, अक्षत, जल और द्रव्य रखकर निम्नलिखित संकल्प करे।

(क) सकाम संकल्प—ॐ विष्णुर्विष्णुर्विष्णुः, अद्य....मम सर्वारिष्टनिरसनपूर्वकसर्वपापक्षयार्थं दीर्घायुरारोग्यधनधान्यपुत्र-पौत्रादिसमस्तसम्पत्प्रवृद्ध्यर्थं श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं श्रीसाम्बसदाशिवप्रीत्यर्थं पार्थिवलिङ्गपूजनमहं करिष्ये ।

(ख) निष्काम संकल्प—ॐ विष्णुर्विष्णुर्विष्णुः, अद्य....श्रीपरमात्मप्रीत्यर्थं पार्थिवलिङ्गपूजनमहं करिष्ये ।

भूमि-प्रार्थना—इस प्रकार संकल्प करनेके बाद निम्नलिखित मन्त्रसे भूमिकी प्रार्थना करे—

ॐ सर्वाधारे धरे देवि त्वद्रूपां मृत्तिकामिमाम् ।
ग्रहीष्यामि प्रसन्ना त्वं लिङ्गार्थं भव सुप्रभे ।।
ॐ ह्राँ पृथिव्यै नमः ।

मिट्टीका ग्रहण—उद्धृतासि वराहेण कृष्णेन शतबाहुना ।
मृत्तिके त्वां च गृह्णामि प्रजया च धनेन च ।।

'ॐ हराय नमः'—यह मन्त्र पढ़कर मिट्टी ले। मिट्टीको अच्छी तरह देखकर कंकड़ आदि निकाल दे। कम-से-कम १२ ग्राम मिट्टी हो। जल मिलाकर मिट्टीको गूँथ ले।

लिंग-गठन—'ॐ महेश्वराय नमः' कहकर लिंगका गठन करे। यह अँगूठेसे न छोटा हो और न बित्तेसे बड़ा। मिट्टीकी नन्हीं-सी गोली बनाकर लिंगके ऊपर रखे। यह 'वज्र' कहलाता है। काँसा आदिके पात्रमें बिल्वपत्र रखकर उसपर निम्नलिखित मन्त्र पढ़कर लिंगकी स्थापना करे।

प्रतिष्ठा—'ॐ शूलपाणये नमः, हे शिव इह प्रतिष्ठितो भव ।' यह कहकर लिङ्गकी प्रतिष्ठा करे।[*]

विनियोग—ॐ अस्य श्रीशिवपञ्चाक्षरमन्त्रस्य वामदेव ऋषिरनुष्टुप्छन्दः श्रीसदाशिवो देवता, ओङ्कारो बीजम्, नमः शक्तिः, शिवाय इति कीलकम्, मम साम्बसदाशिवप्रीत्यर्थं न्यासे पार्थिवलिङ्गपूजने जपे च विनियोगः ।

इस विनियोगसे अपने और देवताको दूर्वा अथवा कुशसे स्पर्श करते हुए तत्तद् अंगोंमें न्यास करे।

ऋष्यादिन्यास—ॐ वामदेवर्षये नमः, शिरसि ।
ॐ अनुष्टुप्छन्दसे नमः, मुखे ।
ॐ श्रीसदाशिवदेवतायै नमः, हृदि ।
ॐ बीजाय नमः, गुह्ये ।
ॐ शक्तये नमः, पादयोः ।
ॐ शिवाय कीलकाय नमः, सर्वाङ्गे ।
ॐ नं तत्पुरुषाय नमः, हृदये ।
ॐ मं अघोराय नमः, पादयोः ।
ॐ शिं सद्योजाताय नमः, गुह्ये ।
ॐ वां वामदेवाय नमः, मूर्ध्नि ।
ॐ यं ईशानाय नमः, मुखे ।

करन्यास—ॐ अङ्गुष्ठाभ्यां नमः ।
ॐ नं तर्जनीभ्यां नमः ।
ॐ मं मध्यमाभ्यां नमः ।
ॐ शिं अनामिकाभ्यां नमः ।
ॐ वां कनिष्ठिकाभ्यां नमः ।
ॐ यं करतलकरपृष्ठाभ्यां नमः ।

षडङ्गन्यास—ॐ हृदयाय नमः ।
ॐ नं शिरसे स्वाहा ।
ॐ मं शिखायै वषट् ।
ॐ शिं कवचाय हुम् ।
ॐ वां नेत्रत्रयाय वौषट् ।
ॐ यं अस्त्राय फट् ।

—इस प्रकार न्यास करनेके पश्चात् भगवान् साम्बसदाशिवका ध्यानपूर्वक पूजन करे—

ध्यान—ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्वबीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ।।

आवाहन—ॐ पिनाकधृषे नमः, श्रीसाम्बसदाशिव पार्थिवेश्वर इहागच्छ, इह प्रतिष्ठ,

इह सन्निहितो भव ।

श्रीभगवते साम्बसदाशिवपार्थिवेश्वराय नमः, आवाहनार्थे पुष्पं समर्पयामि । (पुष्प चढ़ाये।)

आसन—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय*‌ नमः, आसनार्थे अक्षतान् समर्पयामि । (अक्षत चढ़ाये।)

पाद्य—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, पादयोः पाद्यं समर्पयामि । (जल चढ़ाये।)

अर्घ्य—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, हस्तयोरर्घ्यं समर्पयामि । (जल चढ़ाये।)

आचमन—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, आचमनीयं जलं समर्पयामि । (जल चढ़ाये।)

मधुपर्क—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, मधुपर्कं समर्पयामि । (मधुपर्क निवेदित करे।)

स्नान—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, स्नानीयं जलं समर्पयामि । (जलसे स्नान कराये।)

पञ्चामृतस्नान—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, पञ्चामृतस्नानं समर्पयामि । (पञ्चामृतसे स्नान कराये।)

शुद्धोदकस्नान—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, शुद्धोदकस्नानं समर्पयामि । (शुद्ध जलसे स्नान कराये।)

आचमन—शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि । (जल चढ़ाये।)

महाभिषेक—पार्थिवलिङ्गपर महिम्नःस्तोत्र (पृ०-सं० ३०९) या वैदिक रुद्रसूक्त (पृ०-सं० २८२-२८३) से जलधाराद्वारा अभिषेक भी कर सकते हैं। (पत्र-पुष्पसे आच्छादित कर ही अभिषेक करना चाहिये, जिससे पार्थिवलिंगकी मिट्टी क्षरित न हो।)

गन्धोदकस्नान—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, गन्धोदकस्नानं समर्पयामि । (गन्धोदकसे स्नान कराये।)

शुद्धस्नान-आचमन—गन्धोदकस्नानान्ते शुद्धस्नानं समर्पयामि । शुद्धस्नानान्ते आचमनीयं जलं समर्पयामि । (शुद्ध जलसे स्नान तथा आचमन कराये।)

वस्त्र—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, वस्त्रं समर्पयामि । (वस्त्र निवेदित करे।)

आचमन—वस्त्रान्ते आचमनीयं जलं समर्पयामि । (जल चढ़ाये।)

यज्ञोपवीत—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, यज्ञोपवीतं समर्पयामि । (यज्ञोपवीत चढ़ाये।)

आचमन—यज्ञोपवीतान्ते आचमनीयं जलं समर्पयामि । (जल चढ़ाये।)

उपवस्त्र—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, उपवस्त्रं समर्पयामि । (उपवस्त्र चढ़ाये।)

आचमन—उपवस्त्रान्ते आचमनीयं जलं समर्पयामि । (जल चढ़ाये।)

चन्दन—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, चन्दनं समर्पयामि । (चन्दन चढ़ाये।)

भस्म—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, भस्म समर्पयामि । (भस्म निवेदित करे।)

अक्षत—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, अक्षतान् समर्पयामि । (अक्षत चढ़ाये।)

पुष्पमाला—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, पुष्पमालां समर्पयामि । (फूलकी माला चढ़ाये।)

बिल्वपत्र—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, बिल्वपत्राणि समर्पयामि । (बिल्वपत्र चढ़ाये।)

दूर्वा—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, दूर्वाङ्कुरान् समर्पयामि । (दूर्वांकुर चढ़ाये।)

नानापरिमलद्रव्य—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, नानापरिमलद्रव्याणि समर्पयामि । (परिमलद्रव्य चढ़ाये।)

धूप—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, धूपमाघ्रापयामि । (धूप निवेदित करे।)

दीप—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, दीपं दर्शयामि । (दीप दिखाये, हाथ धो ले।)

नैवेद्य—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, नैवेद्यं निवेदयामि । (नैवेद्य निवेदित करे।)

पानीय और आचमन—मध्ये पानीयमाचमनीयं च जलं समर्पयामि । (जल निवेदित करे।)

करोद्वर्तन—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, करोद्वर्तनार्थे चन्दनं समर्पयामि । (चन्दन चढ़ाये।)

ऋतुफल—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, ऋतुफलानि समर्पयामि । (ऋतुफल चढ़ाये।)

धत्तूरफल—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, धत्तूरफलानि समर्पयामि । (धत्तूरके फल चढ़ाये।)

ताम्बूल—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, मुखवासार्थे

एलालवंगपूगीफलयुतं ताम्बूलं समर्पयामि । (इलायची, लवंग, सुपारीके साथ पान चढ़ाये।)

दक्षिणा—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, दक्षिणां समर्पयामि । (दक्षिणा चढ़ाये।)

आरती—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिवाय नमः, आरार्तिक्यं समर्पयामि । (आरती करे, जल गिरा दे।)

मन्त्रपुष्पाञ्जलि—ॐ नमः शिवाय, श्रीभगवते साम्बसदाशिव-पार्थिवेश्वराय नमः, मन्त्रपुष्पाञ्जलिं समर्पयामि । (पुष्पाञ्जलि समर्पित करे।)

अष्टमूर्तियोंकी पूजा

अब गन्ध, अक्षत, फूलके द्वारा भगवान् शंकरकी आठों मूर्तियोंकी आठों दिशाओंमें पूजा करे—

१-पूर्वदिशामें (पृथ्वीरूपमें)—**ॐ शर्वाय क्षितिमूर्तये नमः ।**
२-ईशानकोणमें (जलरूपमें)—**ॐ भवाय जलमूर्तये नमः ।**
३-उत्तरदिशामें (अग्निरूपमें)—**ॐ रुद्राय अग्निमूर्तये नमः ।**
४-वायव्यकोणमें (वायुरूपमें)—**ॐ उग्राय वायुमूर्तये नमः ।**
५-पश्चिमदिशामें (आकाशरूपमें)—**ॐ भीमाय आकाशमूर्तये नमः ।**
६-नैर्ऋत्यकोणमें (यजमानरूपमें)—**ॐ पशुपतये यजमानमूर्तये नमः ।**
७-दक्षिणदिशामें (चन्द्ररूपमें)—**ॐ महादेवाय सोममूर्तये नमः ।**
८-अग्निकोणमें (सूर्यरूपमें)—**ॐ ईशानाय सूर्यमूर्तये नमः ।**

इसके बाद **'ॐ नमः शिवाय'** मन्त्रका कम-से-कम एक माला अथवा दस बार जप करे। उसके बाद—

गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देव! त्वत्प्रसादान्महेश्वर ।।

—यह मन्त्र पढ़कर देवताके दक्षिण हाथमें जपको समर्पित करे।

प्रदक्षिणा—यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ।।

क्षमा-प्रार्थना—आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां नैव हि जानामि क्षमस्व परमेश्वर ।।
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ।
यत् पूजितं महादेव! परिपूर्णं तदस्तु मे ।।
त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ।।

(क्षमा-प्रार्थना करे।)

विसर्जन—गच्छ गच्छ सुरश्रेष्ठ! स्वस्थाने परमेश्वर ।

मम पूजां गृहीत्वेमां पुनरागमनाय च ।।*

ॐ विष्णवे नमः, ॐ विष्णवे नमः, ॐ विष्णवे नमः ।। (ऐसा कहकर विसर्जन करे।)

समर्पण—अनेन पार्थिवलिङ्गपूजनकर्मणा श्रीयज्ञस्वरूपः शिवः प्रीयताम्, न मम । (पूजनकर्म समर्पण करे।)

ज्ञातव्य बातें

(१) शिवकी प्रदक्षिणाके लिये शास्त्रका आदेश है कि इनकी अर्धप्रदक्षिणा करनी चाहिये। आचारेन्दुमें 'अर्ध'का अर्थ—**'अर्धं सोमसूत्रान्तमित्यर्थः'** 'सोमसूत्रतक' ऐसा किया गया है। **'शिवं प्रदक्षिणीकुर्वन् सोमसूत्रं न लङ्घयेत्, इति वचनान्तरात् ।'**

अपवाद—तृण, काष्ठ, पत्ता, पत्थर, ईंट आदिसे ढके सोमसूत्रका लंघन किया जा सकता है।

(२) दुर्गाजीकी एक, सूर्यकी सात, गणेशकी तीन, विष्णुकी चार और शिवकी अर्ध प्रदक्षिणा करनी चाहिये।

एका चण्ड्या रवेः सप्त तिस्रः कार्या विनायके ।
हरेश्चतस्रः कर्तव्याः शिवस्यार्धप्रदक्षिणा ।।

(३) [क]—पूजनमें जिस सामग्रीकी कमी हो, उसकी पूर्ति मानसिक भावनासे करनी चहिये—**'असम्पन्नं मनसा सम्पादयेत् ।'** जैसे—**आसनं मनसा परिकल्पयामि, पुष्पमालां मनसा परिकल्पयामि इत्यादि ।**

[ख]—दूसरा विकल्प है, उस-उस सामग्रीके लिये अक्षत-फूल चढ़ा दे या जल चढ़ा दे—

तत्तद् द्रव्यं तु संकल्प्य पुष्पैर्वापि समर्चयेत् ।
अर्चनेषु विहीनं यत् तत्तोयेन प्रकल्पयेत् ।।

[ग]—केवल नैवेद्य चढ़ानेसे अथवा केवल चन्दन, फूल चढ़ानेसे भी पूजा मान ली जाती है।

'केवलनैवेद्यसमर्पणेनैव पूजासिद्धिरिति .... ।
गन्धपुष्पसमर्पणमात्रेण पूजासिद्धिरित्यपि पूर्वे ।'

(आचारेन्दु)

१-जिनका यज्ञोपवीत न हुआ हो, वे प्रणव (ॐ) रहित मन्त्रोंका उच्चारण करें। पार्थिव-पूजन करनेका अधिकार स्त्री, शूद्र, अन्त्यज आदि सभी वर्णोंको है।

२-शमी या पीपलके पेड़की जड़की मिट्टी या विमौट (वल्मीक) अच्छी मानी जाती है। या पवित्र जगहसे ऊपरसे चार अंगुल मिट्टी हटाकर भीतरकी मिट्टीका अथवा गङ्गादि पवित्र स्थानोंकी मिट्टीका संग्रह करे।

३-विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया ।
पूजितोऽपि महादेवो न स्यात् तस्य फलप्रदः ।
तस्मान्मृदापि कर्तव्यं ललाटे वै त्रिपुण्ड्रकम् ।।

(लिङ्गपुराण)

अर्थात् भस्मसे त्रिपुण्ड्र लगाये बिना और रुद्राक्षमाला पहने बिना पूजा कर देनेसे भगवान् शंकर फल प्रदान नहीं करते। इसलिये भस्म न हो तो मिट्टीसे भी त्रिपुण्ड्र लगाकर पूजा करे।

* यद्यपि सामान्यरूपसे पार्थिव-पूजनमें सुगमताकी दृष्टिसे प्रतिष्ठाकी सूक्ष्म विधि ऊपर दी गयी है, किंतु पूजनके अवसरोंपर निम्नरूपसे भी प्रतिष्ठाकी विधि है, जो यहाँ दी जा रही है—

प्राणप्रतिष्ठा-मन्त्रका विनियोग—प्रतिष्ठासे पूर्व जल ग्रहणकर निम्नरूपसे विनियोग करे—

विनियोग—ॐ अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः, ऋग्यजुःसामानिच्छन्दांसि, क्रियामयवपुः प्राणाख्या देवता आँ बीजं ह्रीं शक्तिः क्रौं कीलकं देव (देवी)-प्राणप्रतिष्ठापने विनियोगः ।

इतना कहकर जल भूमिपर छोड़ दे।

प्राणप्रतिष्ठा—हाथमें पुष्प लेकर उसे मूर्तिपर स्पर्श करते हुए नीचे लिखे मन्त्र बोले—

ॐ ब्रह्मविष्णुरुद्रऋषिभ्यो नमः, शिरसि । ॐ ऋग्यजुःसामच्छन्दोभ्यो नमः, मुखे । ॐ प्राणाख्यदेवतायै नमः, हृदि । ॐ आँ बीजाय नमः, गुह्ये । ॐ ह्रीं शक्त्यै नमः, पादयोः । ॐ क्रौं कीलकाय नमः, सर्वाङ्गेषु ।

इस प्रकार न्यास करके पुनः पार्थिव लिङ्गका स्पर्श करे—

ॐ आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हँ सः सोऽहं शिवस्य प्राणा इह प्राणाः ।
ॐ आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हँ सः सोऽहं शिवस्य जीव इह स्थितः ।
ॐ आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हँ सः सोऽहं शिवस्य सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रघ्राणजिह्वापाणिपादपायूपस्थानि इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ।

तदनन्तर अक्षतसे आवाहन करे।

ॐ भूः पुरुषं साम्बसदाशिवमावाहयामि । ॐ भुवः पुरुषं साम्बसदाशिवमावाहयामि । ॐ स्वः पुरुषं साम्बसदाशिवमावाहयामि ।

ॐ स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम् ।
तावत्त्वम्प्रीतिभावेन लिङ्गेऽस्मिम् सन्निधिं कुरु ।।

* जैसा कि ऊपर लिखा गया है—**‘साम्बसदाशिवपार्थिवेश्वराय नमः’,** वैसा आगे भी बोला जा सकता है।

* तीर्थजलमें अथवा किसी पवित्र स्थानमें विसर्जन करना चाहिये।

स्तुति-प्रकरण

श्रीसङ्कष्टनाशनगणेशस्तोत्रम्

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम् ।
भक्तावासं स्मरेन्नित्यमायुष्कामार्थसिद्धये ।।१।।
प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम् ।
तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम् ।।२।।
लम्बोदरं पञ्चमं च षष्ठं विकटमेव च ।
सप्तमं विघ्नराजेन्द्रं धूम्रवर्णं तथाष्टमम् ।।३।।
नवमं भालचन्द्रं च दशमं तु विनायकम् ।
एकादशं गणपतिं द्वादशं तु गजाननम् ।।४।।
द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः ।
न च विघ्नभयं तस्य सर्वसिद्धिकरं परम् ।।५।।
विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ।
पुत्रार्थी लभते पुत्रान् मोक्षार्थी लभते गतिम् ।।६।।
जपेद् गणपतिस्तोत्रं षड्भिर्मासैः फलं लभेत् ।
संवत्सरेण सिद्धिं च लभते नात्र संशयः ।।७।।
अष्टभ्यो ब्राह्मणेभ्यश्च लिखित्वा यः समर्पयेत् ।
तस्य विद्या भवेत् सर्वा गणेशस्य प्रसादतः ।।८।।

।। श्रीनारदपुराणे सङ्कष्टनाशनं नाम गणेशस्तोत्रं सम्पूर्णम् ।।

श्रीगणपत्यथर्वशीर्षम्

ॐ भद्रङ्कर्णेभिरिति शान्तिः

हरिः ॐ ।। नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्त्वमसि । त्वमेव केवलं कर्तासि । त्वमेव केवलं धर्तासि । त्वमेव केवलं हर्तासि । त्वमेव सर्वं खल्विदं ब्रह्मासि । त्वं साक्षादात्मासि नित्यम् । ऋतं वच्मि । सत्यं वच्मि । अव त्वं माम् । अव वक्तारम् । अव श्रोतारम् । अव दातारम् । अव धातारम् । अवानूचानमव शिष्यम् । अव पश्चात्तात् । अव पुरस्तात् । अव चोत्तरात्तात् । अव दक्षिणात्तात् । अव चोर्ध्वात्तात् । अवाधरात्तात् । सर्वतो मां पाहि पाहि समन्तात् । त्वं वाङ्मयस्त्वं चिन्मयः । त्वमानन्दमयस्त्वं ब्रह्ममयः । त्वं सच्चिदानन्दाद्वितीयोऽसि । त्वं प्रत्यक्षं ब्रह्मासि । त्वं ज्ञानमयो विज्ञानमयोऽसि । सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति । सर्वं जगदिदं त्वयि लयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति । त्वं भूमिरापोऽनलोऽनिलो नभः । त्वं चत्वारि वाक्पदानि । त्वं गुणत्रयातीतः । त्वं कालत्रयातीतः । त्वं देहत्रयातीतः । त्वं मूलाधारस्थितोऽसि नित्यम् । त्वं शक्तित्रयात्मकः । त्वां योगिनो ध्यायन्ति नित्यम् । त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवः सुवरोम् । गणादिं पूर्वमुच्चार्य वर्णादिं तदनन्तरम् । अनुस्वारः परतरः । अर्धेन्दुलसितम् ।।१।। तारेण रुद्धम् । एतत्तव मनुस्वरूपम् । गकारः पूर्वरूपम् । अकारो मध्यमरूपम् । अनुस्वारश्चान्त्यरूपम् । बिन्दुरुत्तररूपम् । नादः सन्धानम् । संहिता सन्धिः । सैषा गणेशविद्या । गणक ऋषिः निचृद्गायत्री छन्दः । श्रीमहागणपतिर्देवता । ॐ गम् । (गणपतये नमः ।) एकदन्ताय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्ती प्रचोदयात् ।। एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् । अभयं वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ।। रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् । रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम् ।। भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् । आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् ।। एवं ध्यायति यो नित्यं स योगी योगिनां वरः । नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु लम्बोद-रायैकदन्ताय विघ्नविनाशिने शिवसुताय श्रीवरदमूर्तये नमो नमः ।। एतदथर्वशिरो योऽधीते स ब्रह्मभूयाय कल्पते । स सर्वविघ्नैर्न बाध्यते । स सर्वतः सुखमेधते । स पञ्चमहापातकोपपातकात् प्रमुच्यते । सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायं प्रातः प्रयुञ्जानोऽपापो भवति । धर्मार्थकाममोक्षं च विन्दति । इदमथर्वशीर्षमशिष्याय न देयम् । यो यदि मोहाद्दास्यति स पापीयान् भवति । सहस्रावर्तनाद्यं यं काममधीते तं तमनेन साधयेत् । अनेन

पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ।।८६।।
मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।
वसुप्रदो वासुदेवो वसुर्वसुमना हविः ।।८७।।
सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ।
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ।।८८।।
भूतावासो वासुदेवः सर्वासुनिलयोऽनलः ।
दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ।।८९।।
विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ।
अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ।।९०।।
एको नैकः सवः कः किं यत् तत् पदमनुत्तमम् ।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ।।९१।।
सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ।
वीरहा विषमः शून्यो घृताशीरचलश्चलः ।।९२।।
अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक् ।
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ।।९३।।
तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः ।
प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः ।।९४।।
चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ।।९५।।
समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः ।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ।।९६।।
शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः ।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः ।।९७।।
उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः ।
अर्को वाजसनः शृङ्गी जयन्तः सर्वविज्जयी ।।९८।।
सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः ।

महाह्रदो महागर्तो महाभूतो महानिधिः ।।९९।।
कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः ।
अमृताशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ।।१००।।
सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रतापनः ।
न्यग्रोधोदुम्बरोऽश्वत्थश्चाणूरन्ध्रनिषूदनः ।।१०१।।
सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ।
अमूर्तिरनघोऽचिन्त्यो भयकृद् भयनाशनः ।।१०२।।
अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ।
अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः ।।१०३।।
भारभृत् कथितो योगी योगीशः सर्वकामदः ।
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ।।१०४।।
धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः ।
अपराजितः सर्वसहो नियन्ता नियमो यमः ।।१०५।।
सत्त्ववान् सात्त्विकः सत्यः सत्यधर्मपरायणः ।
अभिप्रायः प्रियार्होऽर्हः प्रियकृत् प्रीतिवर्धनः ।।१०६।।
विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग् विभुः ।
रविर्विरोचनः सूर्यः सविता रविलोचनः ।।१०७।।
अनन्तो हुतभुग् भोक्ता सुखदो नैकजोऽग्रजः ।
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ।।१०८।।
सनात् सनातनतमः कपिलः कपिरप्ययः ।
स्वस्तिदः स्वस्तिकृत् स्वस्ति स्वस्तिभुक् स्वस्तिदक्षिणः ।।१०९।।
अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः ।
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ।।११०।।
अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः ।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ।।१११।।
उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ।
वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः ।।११२।।
अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।
चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः ।।११३।।
अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः ।
जननो जनजन्मादिर्भीमो भीमपराक्रमः ।।११४।।
आधारनिलयोऽधाता पुष्पहासः प्रजागरः ।
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ।।११५।।
प्रमाणं प्राणनिलयः प्राणभृत् प्राणजीवनः ।
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ।।११६।।

भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ।।११७।।
यज्ञभृद् यज्ञकृद् यज्ञी यज्ञभुग् यज्ञसाधनः ।
यज्ञान्तकृद् यज्ञगुह्यमन्नमन्नाद एव च ।।११८।।
आत्मयोनिः स्वयंजातो वैखानः सामगायनः ।
देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः ।।११९।।
शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः ।
रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः ।।१२०।।

।।सर्वप्रहरणायुध ॐ नम इति।।

इतीदं कीर्तनीयस्य केशवस्य महात्मनः ।
नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम् ।।१२१।।
य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
नाशुभं प्राप्नुयात् किञ्चित् सोऽमुत्रेह च मानवः ।।१२२।।
वेदान्तगो ब्राह्मणः स्यात् क्षत्रियो विजयी भवेत् ।
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् ।।१२३।।
धर्मार्थी प्राप्नुयाद् धर्ममर्थार्थी चार्थमाप्नुयात् ।
कामानवाप्नुयात् कामी प्रजार्थी प्राप्नुयात् प्रजाम् ।।१२४।।
भक्तिमान् यः सदोत्थाय शुचिस्तद्गतमानसः ।
सहस्रं वासुदेवस्य नाम्नामेतत् प्रकीर्तयेत् ।।१२५।।
यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च ।
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् ।।१२६।।
न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति ।
भवत्यरोगो द्युतिमान् बलरूपगुणान्वितः ।।१२७।।
रोगार्तो मुच्यते रोगाद् बद्धो मुच्येत बन्धनात् ।
भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ।।१२८।।
दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ।
स्तुवन् नामसहस्रेण नित्यं भक्तिसमन्वितः ।।१२९।।
वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ।
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ।।१३०।।
न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।
जन्ममृत्युजराव्याधिभयं नैवोपजायते ।।१३१।।
इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ।
युज्येतात्मसुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः ।।१३२।।
न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ।।१३३।।

द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ।
वासुदेवस्य वीर्येण विधृतानि महात्मनः ।।१३४।।
ससुरासुरगन्धर्वं सयक्षोरगराक्षसम् ।
जगद् वशे वर्ततेदं कृष्णस्य सचराचरम् ।।१३५।।
इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः ।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ।।१३६।।
सर्वागमानामाचारः प्रथमं परिकल्पते ।
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ।।१३७।।
ऋषयः पितरो देवा महाभूतानि धातवः ।
जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम् ।।१३८।।
योगो ज्ञानं तथा सांख्यं विद्याः शिल्पादि कर्म च ।
वेदाः शास्त्राणि विज्ञानमेतत् सर्वं जनार्दनात् ।।१३९।।
एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ।
त्रीँल्लोकान् व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः ।।१४०।।
इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम् ।
पठेद् य इच्छेत् पुरुषः श्रेयः प्राप्तुं सुखानि च ।।१४१।।
विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम् ।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् ।।१४२।।

ॐ तत्सदिति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्या-मानुशासनिके पर्वणि भीष्मयुधिष्ठिरसंवादे श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रम् ।।

श्रीसप्तश्लोकी दुर्गा

शिव उवाच

देवि त्वं भक्तसुलभे सर्वकार्यविधायिनी ।
कलौ हि कार्यसिद्ध्यर्थमुपायं ब्रूहि यत्नतः ।।

देव्युवाच

शृणु देव प्रवक्ष्यामि कलौ सर्वेष्टसाधनम् ।
मया तवैव स्नेहेनाप्यम्बास्तुतिः प्रकाश्यते ।।

विनियोग—अस्य श्रीदुर्गासप्तश्लोकीस्तोत्रमन्त्रस्य नारायण ऋषिः, अनुष्टुप् छन्दः, श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः, श्रीदुर्गाप्रीत्यर्थं सप्तश्लोकीदुर्गापाठे विनियोगः ।

ॐ ज्ञानिनामपि चेतांसि देवी भगवती हि सा ।
बलादाकृष्य मोहाय महामाया प्रयच्छति ।।१।।
दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।
दारिद्रयदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदार्द्रचित्ता ।।२।।
सर्वमङ्गलमङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ।।३।।
शरणागतदीनार्तपरित्राणपरायणे ।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ।।४।।
सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ।।५।।
रोगानशेषानपहंसि तुष्टा
रुष्टा तु कामान् सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयान्ति ।।६।।
सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ।
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ।।७।।

।।श्रीसप्तश्लोकी दुर्गा सम्पूर्णा ।।

सप्तश्लोकी गीता

ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् ।
यः प्रयाति त्यजन् देहं स याति परमां गतिम् ।।१।।
स्थाने हृषीकेश तव प्रकीर्त्या
जगत् प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति
सर्वे नमस्यन्ति च सिद्धसङ्घाः ।।२।।
सर्वतःपाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।
सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति ।।३।।
कविं पुराणमनुशासितार-
मणोरणीयांसमनुस्मरेद्यः ।
सर्वस्य धातारमचिन्त्यरूप-
मादित्यवर्णं तमसः परस्तात् ।।४।।
ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ।।५।।
सर्वस्य चाहं हृदि सन्निविष्टो
मत्तः स्मृतिर्ज्ञानमपोहनं च ।
वेदैश्च सर्वैरहमेव वेद्यो
वेदान्तकृद्वेदविदेव चाहम् ।।६।।
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ।।७।।

।।सप्तश्लोकी गीता सम्पूर्णा ।।

चतुःश्लोकि भागवतम्

अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम् ।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ।।१।।
ऋतेऽर्थं यत् प्रतीयेत न प्रतीयेत चात्मनि ।
तद्विद्यादात्मनो मायां यथाऽऽभासो यथा तमः ।।२।।
यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु ।
प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ।।३।।
एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनाऽऽत्मनः ।
अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्वत्र सर्वदा ।।४।।

।।चतुःश्लोकि भागवतं सम्पूर्णम् ।।

एकश्लोकि रामायणम्

आदौ रामतपोवनादिगमनं हत्वा मृगं काञ्चनं
वैदेहीहरणं जटायुमरणं सुग्रीवसम्भाषणम् ।
बालीनिग्रहणं समुद्रतरणं लङ्कापुरीदाहनं
पश्चाद्रावणकुम्भकर्णहननमेतद्धि रामायणम् ।।

।।एकश्लोकि रामायणं सम्पूर्णम् ।।

अश्वत्थस्तोत्रम्

श्रीनारद उवाच

अनायासेन लोकोऽयं सर्वान् कामानवाप्नुयात् ।
सर्वदेवात्मकं चैकं तन्मे ब्रूहि पितामह ।।१।।

ब्रह्मोवाच

शृणु देव मुनेऽश्वत्थं शुद्धं सर्वात्मकं तरुम् ।
यत्प्रदक्षिणतो लोकः सर्वान् कामान् समश्नुते ।।२।।
अश्वत्थाद्दक्षिणे रुद्रः पश्चिमे विष्णुरास्थितः ।
ब्रह्मा चोत्तरदेशस्थः पूर्वे त्विन्द्रादिदेवताः ।।३।।
स्कन्धोपस्कन्धपत्रेषु गोविप्रमुनयस्तथा ।
मूलं वेदाः पयो यज्ञाः संस्थिता मुनिपुङ्गव ।।४।।
पूर्वादिदिक्षु संयाता नदीनदसरोऽब्धयः ।
तस्मात् सर्वप्रयत्नेन ह्यश्वत्थं संश्रयेद्बुधः ।।५।।
त्वं क्षीर्यफलकश्चैव शीतलश्च वनस्पते ।
त्वामाराध्य नरो विन्द्यादैहिकामुष्मिकं फलम् ।।६।।
चलद्दलाय वृक्षाय सर्वदाश्रितविष्णवे ।
बोधिसत्त्वाय देवाय ह्यश्वत्थाय नमो नमः ।।७।।
अश्वत्थ यस्मात् त्वयि वृक्षराज नारायणस्तिष्ठति सर्वकाले ।
अतः श्रुतस्त्वं सततं तरूणां धन्योऽसि चारिष्टविनाशकोऽसि ।।८।।
क्षीरदस्त्वं च येनेह येन श्रीस्त्वां निषेवते ।
सत्येन तेन वृक्षेन्द्र मामपि श्रीर्निषेवताम् ।।९।।
एकादशात्मरुद्रोऽसि वसुनाथशिरोमणिः ।
नारायणोऽसि देवानां वृक्षराजोऽसि पिप्पल ।।१०।।
अग्निगर्भः शमीगर्भो देवगर्भः प्रजापतिः ।
हिरण्यगर्भो भूगर्भो यज्ञगर्भो नमोऽस्तु ते ।।११।।
आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ।
ब्रह्म प्रज्ञां च मेधां च त्वं नो देहि वनस्पते ।।१२।।
सततं वरुणो रक्षेत् त्वामाराद्दृष्टिराश्रयेत् ।
परितस्त्वां निषेवन्तां तृणानि सुखमस्तु ते ।।१३।।
अक्षिस्पन्दं भुजस्पन्दं दुःस्वप्नं दुर्विचिन्तनम् ।
शत्रूणां च समुत्थानं ह्यश्वत्थ शमय प्रभो ।।१४।।

अश्वत्थाय वरेण्याय सर्वैश्वर्यप्रदायिने ।
नमो दुःस्वप्ननाशाय सुस्वप्नफलदायिने ।।१५।।
मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे ।
अग्रतः शिवरूपाय वृक्षराजाय ते नमः ।।१६।।
यं दृष्ट्वा मुच्यते रोगैः स्पृष्ट्वा पापैः प्रमुच्यते ।
यदाश्रयाच्चिरञ्जीवी तमश्वत्थं नमाम्यहम् ।।१७।।
अश्वत्थ सुमहाभाग सुभग प्रियदर्शन ।
इष्टकामांश्च मे देहि शत्रुभ्यस्तु पराभवम् ।।१८।।
आयुः प्रजां धनं धान्यं सौभाग्यं सर्वसम्पदम् ।
देहि देव महावृक्ष त्वामहं शरणं गतः ।।१९।।
ऋग्यजुःसाममन्त्रात्मा सर्वरूपी परात्परः ।
अश्वत्थो वेदमूलोऽसावृषिभिः प्रोच्यते सदा ।।२०।।
ब्रह्महा गुरुहा चैव दरिद्रो व्याधिपीडितः ।
आवृत्य लक्षसंख्यं तत् स्तोत्रमेतत् सुखी भवेत् ।।२१।।
ब्रह्मचारी हविष्याशी त्वधःशायी जितेन्द्रियः ।
पापोपहतचित्तोऽपि व्रतमेतत् समाचरेत् ।।२२।।
एकहस्तं द्विहस्तं वा कुर्याद्गोमयलेपनम् ।
अर्चेत् पुरुषसूक्तेन प्रणवेन विशेषतः ।।२३।।
मौनी प्रदक्षिणं कुर्यात् प्रागुक्तफलभाग्भवेत् ।
विष्णोर्नामसहस्रेण ह्यच्युतस्यापि कीर्तनात् ।।२४।।
पदे पदान्तरं गत्वा करचेष्टाविवर्जितः ।
वाचा स्तोत्रं मनो ध्याने चतुरङ्गं प्रदक्षिणम् ।।२५।।
अश्वत्थः स्थापितो येन तत्कुलं स्थापितं ततः ।
धनायुषां समृद्धिस्तु नरकात् तारयेत् पितृन् ।।२६।।
अश्वत्थमूलमाश्रित्य शाकान्नोदकदानतः ।
एकस्मिन् भोजिते विप्रे कोटिब्राह्मणभोजनम् ।।२७।।
अश्वत्थमूलमाश्रित्य जपहोमसुरार्चनात् ।
अक्षयं फलमाप्नोति ब्रह्मणो वचनं यथा ।।२८।।
एवमाश्वासितोऽश्वत्थः सदाश्वासाय कल्पते ।
यज्ञार्थं छेदितेऽश्वत्थे ह्यक्षयं स्वर्गमाप्नुयात् ।।२९।।
छिन्नो येन वृथाऽश्वत्थश्छेदिताः पितृदेवताः ।
अश्वत्थः पूजितो यत्र पूजिताः सर्वदेवताः ।।३०।।

।।ब्रह्मनारदसंवादे अश्वत्थस्तोत्रं सम्पूर्णम् ।।

तुलसीस्तोत्रम्

जगद्धात्रि नमस्तुभ्यं विष्णोश्च प्रियवल्लभे ।
यतो ब्रह्मादयो देवाः सृष्टिस्थित्यन्तकारिणः ।।१।।
नमस्तुलसि कल्याणि नमो विष्णुप्रिये शुभे ।
नमो मोक्षप्रदे देवि नमः सम्पत्प्रदायिके ।।२।।
तुलसी पातु मां नित्यं सर्वापद्भ्योऽपि सर्वदा ।
कीर्तितापि स्मृता वापि पवित्रयति मानवम् ।।३।।
नमामि शिरसा देवीं तुलसीं विलसत्तनुम् ।
यां दृष्ट्वा पापिनो मर्त्या मुच्यन्ते सर्वकिल्बिषात् ।।४।।
तुलस्या रक्षितं सर्वं जगदेतच्चराचरम् ।
या विनिहन्ति पापानि दृष्ट्वा वा पापिभिर्नरैः ।।५।।
नमस्तुलस्यतितरां यस्यै बद्ध्वाञ्जलिं कलौ ।
कलयन्ति सुखं सर्वं स्त्रियो वैश्यास्तथाऽपरे ।।६।।
तुलस्या नापरं किञ्चिद्दैवतं जगतीतले ।
यथा पवित्रितो लोको विष्णुसङ्गेन वैष्णवः ।।७।।
तुलस्याः पल्लवं विष्णोः शिरस्यारोपितं कलौ ।
आरोपयति सर्वाणि श्रेयांसि वरमस्तके ।।८।।
तुलस्यां सकला देवा वसन्ति सततं यतः ।
अतस्तामर्चयेल्लोके सर्वान् देवान् समर्चयन् ।।९।।
नमस्तुलसि सर्वज्ञे पुरुषोत्तमवल्लभे ।
पाहि मां सर्वपापेभ्यः सर्वसम्पत्प्रदायिके ।।१०।।
इति स्तोत्रं पुरा गीतं पुण्डरीकेण धीमता ।
विष्णुमर्चयता नित्य शोभनैस्तुलसीदलैः ।।११।।
तुलसी श्रीर्महालक्ष्मीर्विद्याविद्या यशस्विनी ।
धर्म्या धर्मानना देवी देवीदेवमनःप्रिया ।।१२।।
लक्ष्मीप्रियसखी देवी द्यौर्भूमिरचला चला ।
षोडशैतानि नामानि तुलस्याः कीर्तयन्नरः ।।१३।।
लभते सुतरां भक्तिमन्ते विष्णुपदं लभेत् ।
तुलसी भूर्महालक्षीः पद्मिनी श्रीर्हरिप्रिया ।।१४।।
तुलसि श्रीसखि शुभे पापहारिणि पुण्यदे ।
नमस्ते नारदनुते नारायणमनःप्रिये ।।१५।।

।।श्रीपुण्डरीककृतं तुलसीस्तोत्रं सम्पूर्णम् ।।

गौको नमस्कार करनेके मन्त्र

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ।।
यया सर्वमिदं व्याप्तं जगत् स्थावरजङ्गमम् ।
तां धेनुं शिरसा वन्दे भूतभव्यस्य मातरम् ।।

(महा० अनु० ८०।१५)

पञ्च गावः समुत्पन्ना मथ्यमाने महोदधौ ।
तासां मध्ये तु या नन्दा तस्यै देव्यै नमो नमः ।।
सर्वकामदुघे देवि सर्वतीर्थाभिषेचिनि ।
पावनि सुरभिश्रेष्ठे देवि तुभ्यं नमो नमः ।।

गोग्रास-नैवेद्य-मन्त्र

सुरभिस्त्वं जगन्मातर्देवि विष्णुपदे स्थिता ।
सर्वदेवमयी ग्रासं मया दत्तमिमं ग्रस ।।

प्रदक्षिणा-मन्त्र

गवां दृष्ट्वा नमस्कृत्य कुर्याच्चैव प्रदक्षिणम् ।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ।।
मातरः सर्वभूतानां गावः सर्वसुखप्रदाः ।
वृद्धिमाकाङ्क्षता पुंसा नित्यं कार्या प्रदक्षिणा ।।

।। श्रीहनूमते नमः ।।

श्रीहनुमानचालीसा

दोहा

श्रीगुरु चरन सरोज रज निज मनु मुकुरु सुधारि ।
बरनउँ रघुबर बिमल जसु जो दायकु फल चारि ।।
बुद्धिहीन तनु जानिके, सुमिरौं पवन-कुमार ।
बल बुधि बिद्या देहु मोहिं, हरहु कलेस बिकार ।।

चौपाई

जय हनुमान ज्ञान गुन सागर । जय कपीस तिहुँ लोक उजागर ।।
राम दूत अतुलित बल धामा । अंजनि-पुत्र पवनसुत नामा ।।
महाबीर बिक्रम बजरंगी । कुमति निवार सुमति के संगी ।।
कंचन बरन बिराज सुबेसा । कानन कुंडल कुंचित केसा ।।
हाथ बज्र औ ध्वजा बिराजै । काँधे मूँज जनेऊ साजै ।।
संकर सुवन केसरीनंदन । तेज प्रताप महा जग बंदन ।।
बिद्यावान गुनी अति चातुर । राम काज करिबे को आतुर ।।
प्रभु चरित्र सुनिबे को रसिया । राम लषन सीता मन बसिया ।।
सूक्ष्म रूप धरि सियहिं दिखावा । बिकट रूप धरि लंक जरावा ।।
भीम रूप धरि असुर सँहारे । रामचंद्र के काज सँवारे ।।
लाय सजीवन लखन जियाये । श्रीरघुबीर हरषि उर लाये ।।
रघुपति कीन्ही बहुत बड़ाई । तुम मम प्रिय भरतहि सम भाई ।।
सहस बदन तुम्हरो जस गावैं । अस कहि श्रीपति कंठ लगावैं ।।
सनकादिक ब्रह्मादि मुनीसा । नारद सारद सहित अहीसा ।।
जम कुबेर दिगपाल जहाँ ते । कबि कोबिद कहि सके कहाँ ते ।।
तुम उपकार सुग्रीवहिं कीन्हा । राम मिलाय राज पद दीन्हा ।।
तुम्हरो मन्त्र बिभीषन माना । लंकेस्वर भए सब जग जाना ।।
जुग सहस्र जोजन पर भानू । लील्यो ताहि मधुर फल जानू ।।
प्रभु मुद्रिका मेलि मुख माहीं । जलधि लाँघि गये अचरज नाहीं ।।
दुर्गम काज जगत के जेते । सुगम अनुग्रह तुम्हरे तेते ।।
राम दुआरे तुम रखवारे । होत न आज्ञा बिनु पैसारे ।।
सब सुख लहै तुम्हारी सरना । तुम रच्छक काहू को डर ना ।।
आपन तेज सम्हारो आपै । तीनों लोक हाँक तें काँपै ।।
भूत पिसाच निकट नहिं आवै । महाबीर जब नाम सुनावै ।।

नासै रोग हरै सब पीरा । जपत निरंतर हनुमत बीरा ।।
संकट तें हनुमान छुड़ावै। मन क्रम बचन ध्यान जो लावै ।।
सब पर राम तपस्वी राजा । तिन के काज सकल तुम साजा ।।
और मनोरथ जो कोइ लावै । सोइ अमित जीवन फल पावै ।।
चारों जुग परताप तुम्हारा । है परसिद्ध जगत उजियारा ।।
साधु संत के तुम रखवारे । असुर निकंदन राम दुलारे ।।
अष्ट सिद्धि नौ निधि के दाता । अस बर दीन जानकी माता ।।
राम रसायन तुम्हरे पासा । सदा रहो रघुपति के दासा ।।
तुम्हरे भजन राम को पावै । जनम जनम के दुख बिसरावै ।।
अंत काल रघुबर पुर जाई । जहाँ जन्म हरि-भक्त कहाई ।।
और देवता चित्त न धरई । हनुमत सेइ सर्ब सुख करई ।।
संकट कटै मिटै सब पीरा । जो सुमिरै हनुमत बलबीरा ।।
जै जै जै हनुमान गोसाईं । कृपा करहु गुरु देव की नाईं ।।
जो सत बार पाठ कर कोई । छूटहि बंदि महा सुख होई ।।
जो यह पढ़ै हनुमान चलीसा । होय सिद्धि साखी गौरीसा ।।
तुलसीदास सदा हरि चेरा । कीजै नाथ हृदय महँ डेरा ।।

दोहा

पवनतनय संकट हरन, मंगल मूरति रूप ।
राम लखन सीता सहित, हृदय बसहु सुर भूप ।।

देव-पूजामें विहित एवं निषिद्ध पत्र-पुष्प

पञ्चदेव-पूजामें गणपति, गौरी, विष्णु, सूर्य और शिवकी पूजा की जाती है। यहाँ इन देवी-देवताओंके लिये विहित और निषिद्ध पत्र-पुष्प आदिका उल्लेख किया जा रहा है—

गणपतिके लिये विहित पत्र-पुष्प

गणेशजीको तुलसी छोड़कर सभी पत्र-पुष्प प्रिय हैं। अतः सभी अनिषिद्ध पत्र-पुष्प इनपर चढ़ाये जाते हैं[१]। गणपतिको दूर्वा अधिक प्रिय है। अतः इन्हें सफेद या हरी दूर्वा अवश्य चढ़ानी चाहिये[२]। दूर्वाकी फुनगीमें तीन या पाँच पत्ती होनी चाहिये। गणपतिपर तुलसी कभी न चढ़ाये। पद्मपुराण, आचाररत्नमें लिखा है कि **'न तुलस्या गणाधिपम्'** अर्थात् तुलसीसे गणेशजीकी पूजा कभी न की जाय। कार्तिक-माहात्म्यमें भी कहा है कि **'गणेशं तुलसीपत्रैर्दुर्गां नैव तु दूर्वया'** अर्थात् गणेशजीकी तुलसीपत्रसे और दुर्गाकी दूर्वासे पूजा न करे। गणपतिको नैवेद्यमें लड्डू अधिक प्रिय है[३]।

देवीके लिये विहित पत्र-पुष्प

भगवान् शंकरकी पूजामें जो पत्र-पुष्प विहित हैं, वे सभी भगवती गौरीको भी प्रिय हैं। अपामार्ग उन्हें विशेष प्रिय है। शंकरपर चढ़ानेके लिये जिन फूलोंका निषेध है तथा जिन फूलोंका नाम नहीं लिया गया है, वे भी भगवतीपर चढ़ाये जाते हैं[१]। जितने लाल फूल हैं वे सभी भगवतीको अभीष्ट हैं तथा सुगन्धित समस्त श्वेत फूल भी भगवतीको विशेष प्रिय हैं[२]।

बेला, चमेली, केसर, श्वेत और लाल फूल, श्वेत कमल, पलाश, तगर, अशोक, चंपा, मौलसिरी, मदार, कुंद, लोध, कनेर, आक, शीशम और अपराजित (शंखपुष्पी) आदिके फूलोंसे देवीकी भी पूजा की जाती है[३]।

इन फूलोंमें आक और मदार—इन दो फूलोंका निषेध भी मिलता है —**'देवीनामर्कमन्दारौ.....(वर्जयेत्)'** (शातातप)। अतः ये दोनों विहित भी हैं और प्रतिषिद्ध भी हैं। जब अन्य विहित फूल न मिलें तब इन दोनोंका उपयोग करे[४]। दुर्गासे भिन्न देवियोंपर इन दोनोंको न चढ़ाये। किंतु दुर्गाजीपर चढ़ाया जा सकता है, क्योंकि दुर्गाकी पूजामें इन दोनोंका विधान है[१]।

शमी, अशोक, कर्णिकार (कनियार या अमलतास), गूमा, दोपहरिया, अगस्त्य, मदन, सिन्दुवार, शल्लकी, माधवी आदि लताएँ, कुशकी मंजरियाँ, बिल्वपत्र, केवड़ा, कदम्ब, भटकटैया, कमल[२]—ये फूल भगवतीको प्रिय हैं।

देवीके लिये विहित-प्रतिषिद्ध पत्र-पुष्प

आक और मदारकी तरह दूर्वा, तिलक, मालती, तुलसी, भंगरैया और तमाल विहित-प्रतिषिद्ध हैं अर्थात् ये शास्त्रोंसे विहित भी हैं और निषिद्ध भी हैं[३]। विहित-प्रतिषिद्धके सम्बन्धमें तत्त्वसागरसंहिताका कथन है कि जब शास्त्रोंसे विहित फूल न मिल पायें तो विहित-प्रतिषिद्ध फूलोंसे पूजा कर लेनी चाहिये[१]।

शिव-पूजनके लिये विहित पत्र-पुष्प

भगवान् शंकरपर फूल चढ़ानेका बहुत अधिक महत्त्व है। बतलाया जाता है कि तपःशील सर्वगुणसम्पन्न वेदमें निष्णात किसी ब्राह्मणको सौ सुवर्ण दान[२] करनेपर जो फल प्राप्त होता है, वह भगवान् शंकरपर सौ फूल चढ़ा देनेसे प्राप्त हो जाता है[३]। कौन-कौन पत्र-पुष्प शिवके लिये विहित हैं और कौन-कौन निषिद्ध हैं, इनकी जानकारी अपेक्षित है। अतः उनका उल्लेख यहाँ किया जाता है—

पहली बात यह है कि भगवान् विष्णुके लिये जो-जो पत्र और पुष्प विहित हैं, वे सब भगवान् शंकरपर भी चढ़ाये जाते हैं। केवल केतकी—केवड़ेका निषेध है[४]।

शास्त्रोंने कुछ फूलोंके चढ़ानेसे मिलनेवाले फलका तारतम्य बतलाया है, जैसे दस सुवर्ण-मापके बराबर सुवर्ण-दानका फल एक आकके फूलको चढ़ानेसे मिल जाता है। हजार आकके फूलोंकी अपेक्षा एक कनेरका फूल, हजार कनेरके फूलोंके चढ़ानेकी अपेक्षा एक बिल्वपत्रसे फल मिल जाता है और हजार बिल्वपत्रोंकी अपेक्षा एक गूमाफूल (द्रोण-पुष्प) होता है। इस तरह हजार गूमासे बढ़कर एक चिचिड़ा, हजार चिचिड़ों (अपामार्गों)-से बढ़कर एक कुशका फूल, हजार कुश-पुष्पोंसे बढ़कर एक शमीका पत्ता, हजार शमीके पत्तोंसे बढ़कर एक नीलकमल, हजार नीलकमलोंसे बढ़कर एक धतूरा, हजार धतूरोंसे बढ़कर एक शमीका फूल होता है। अन्तमें बतलाया है कि समस्त फूलोंकी जातियोंमें सबसे बढ़कर नीलकमल होता है[१]।

भगवान् व्यासने कनेरकी कोटिमें चमेली, मौलसिरी, पाटला, मदार, श्वेतकमल, शमीके फूल और बड़ी भटकटैयाको रखा है । इसी तरह धतूरेकी कोटिमें नागचम्पा और पुंनागको माना है[२]।

शास्त्रोंने भगवान् शंकरकी पूजामें मौलसिरी (बक-बकुल)-के फूलको ही अधिक महत्त्व दिया है[३]।

भविष्यपुराणने भगवान् शंकरपर चढ़ानेयोग्य और भी फूलोंके नाम गिनाये हैं—

करवीर (कनेर), मौलसिरी, धतूरा, पाढर[४], बड़ी कटेरी, कुरैया, कास, मन्दार, अपराजिता, शमीका फूल, कुब्जक, शंखपुष्पी, चिचिड़ा, कमल, चमेली, नागचम्पा[१], चम्पा, खस, तगर, नागकेसर, किंकिरात (करंटक अर्थात् पीले फूलवाली कटसरैया), गूमा, शीशम, गूलर, जयन्ती, बेला, पलाश, बेलपत्ता, कुसुम्भ-पुष्प, कुङ्कुम[२] अर्थात् केसर, नीलकमल और लाल कमल। जल एवं स्थलमें उत्पन्न जितने सुगन्धित फूल हैं, सभी भगवान् शंकरको प्रिय हैं[३]।

शिवार्चामें निषिद्ध पत्र-पुष्प

कदम्ब, सारहीन फूल या कठूमर, केवड़ा, शिरीष, तिन्तिणी, बकुल (मौलसिरी), कोष्ठ, कैथ, गाजर, बहेड़ा, कपास, गंभारी, पत्रकंटक, सेमल, अनार, धव, केतकी, वसंत-ऋतुमें खिलनेवाला कंद-विशेष, कुंद, जूही, मदन्ती, शिरीष सर्ज और दोपहरियाके फूल भगवान् शंकरपर नहीं चढ़ाने चाहिये। वीरमित्रोदयमें इनका संकलन किया गया है[४]।

कदम्ब, बकुल और कुन्दपर विशेष विचार

इन पुष्पोंका कहीं विधान और कहीं निषेध मिलता है। अतः विशेष विचारद्वारा निष्कर्ष प्रस्तुत किया जाता है—

कदम्ब—शास्त्रका एक वचन है—**'कदम्बकुसुमैः शम्भुमुन्मत्तैः सर्वसिद्धिभाक् ।'** अर्थात् कदम्ब और धतूरेके फूलोंसे पूजा करनेसे सारी सिद्धियाँ मिलती हैं। शास्त्रका दूसरा वचन मिलता है—

अत्यन्तप्रतिषिद्धानि कुसुमानि शिवार्चने ।
कदम्बं फल्गुपुष्पं च केतकं च शिरीषकम् ।।

अर्थात् कदम्ब तथा फल्गु (गन्धहीन आदि)-के फूल शिवके पूजनमें अत्यन्त निषिद्ध हैं। इस तरह एक वचनसे कदम्बका शिव-पूजनमें विधान और दूसरे वचनसे निषेध मिलता है, जो परस्पर विरुद्ध प्रतीत होता है।

इसका परिहार वीरमित्रोदयकारने कालविशेषके द्वारा इस प्रकार किया है। इनके कथनका तात्पर्य यह है कि कदम्बका जो विधान किया गया है, वह केवल भाद्रपदमास—मास-विशेषमें। इस पुष्प-विशेषका महत्त्व बतलाते हुए देवीपुराणमें लिखा है—

'कदम्बैश्चम्पकैरेवं नभस्ये सर्वकामदा ।'

अर्थात् 'भाद्रपदमासमें कदम्ब और चम्पासे शिवकी पूजा करनेसे सभी इच्छाएँ पूरी होती हैं।'

इस प्रकार भाद्रपदमासमें 'विधि' चरितार्थ हो जाती है और भाद्रपदमाससे भिन्न

मासोंमें निषेध चरितार्थ हो जाता है। दोनों वचनोंमें कोई विरोध नहीं रह जाता।

'सामान्यतः कदम्बकुसुमार्चनं यत्तद् वर्षर्तुविषयम् । अन्यदा तु निषेधः । तेन न पूर्वोत्तरवाक्यविरोधः ।'

(वीरमित्रोदय, पूजाप्रकाश, पृ० २१६)

बकुल (मौलसिरी)—यही बात बकुल-सम्बन्धी विधि-निषेधपर भी लागू होती है। आचारेन्दुमें 'बक' का अर्थ 'बकुल' किया गया है और 'बकुल' का अर्थ है—'मौलसिरी'। शास्त्रका एक वचन है—

'बकपुष्पेण चैकेन शैवमर्चनमुत्तमम् ।'

दूसरा वचन है—

'बकुलैर्नार्चयेद् देवम् ।'

पहले वचनमें मौलसिरीका शिव-पूजनमें विधान है और दूसरे वचनमें निषेध। इस प्रकार आपाततः पूर्वापर-विरोध प्रतीत होता है। इसका भी परिहार कालविशेषद्वारा हो जाता है, क्योंकि मौलसिरी चढ़ानेका विधान सायंकाल किया गया है—**'सायाह्ने बकुलं शुभम् ।'** इस तरह सायंकालमें विधि चरितार्थ हो जाती है और भिन्न समयमें निषेध चरितार्थ हो जाता है।

कुन्द—कुन्द-फूलके लिये भी उपर्युक्त पद्धति व्यवहरणीय है। माघ महीनेमें भगवान् शंकरपर कुन्द चढ़ाया जा सकता है, शेष महीनोंमें नहीं। वीरमित्रोदयने लिखा है—

कुन्दपुष्पस्य निषेधेऽपि माघे निषेधाभावः ।

विष्णु-पूजनमें विहित पत्र-पुष्प

भगवान् विष्णुको तुलसी बहुत ही प्रिय हैं[१]। एक ओर रत्न, मणि तथा स्वर्णनिर्मित बहुत-से फूल चढ़ाये जायँ और दूसरी ओर तुलसीदल चढ़ाया जाय तो भगवान् तुलसीदलको ही पसंद करेंगे। सच पूछा जाय तो ये तुलसीदलकी सोलहवीं कलाकी भी समता नहीं कर सकते[२]। भगवान्‌को कौस्तुभ भी उतना प्रिय नहीं है, जितना कि तुलसीपत्र-मंजरी[१]। काली तुलसी तो प्रिय है ही किंतु गौरी तुलसी तो और भी अधिक प्रिय है[३]। भगवान्‌ने श्रीमुखसे कहा है कि यदि तुलसीदल न हो तो कनेर, बेला, चम्पा, कमल और मणि आदिसे निर्मित फूल भी मुझे नहीं सुहाते[३]। तुलसीसे पूजित शिवलिङ्ग या विष्णुकी प्रतिमाके दर्शनमात्रसे ब्रह्महत्या भी दूर हो जाती है[४]। एक ओर मालती आदिकी ताजी मालाएँ हों और दूसरी ओर बासी तुलसी हो तो भगवान् बासी तुलसीको ही अपनायेंगे[५]।

शास्त्रने भगवान्‌पर चढ़ानेयोग्य पत्रोंका भी परस्पर तारतम्य बतलाकर तुलसीकी

सर्वातिशायिता बतलायी है, जैसे कि चिचिड़ेकी पत्तीसे भँगरैयाकी पत्ती अच्छी मानी गयी है तथा उससे अच्छी खैरकी और उससे अच्छी शमीकी। शमीसे दूर्वा, उससे अच्छा कुश, उससे अच्छी दौनाकी, उससे अच्छी बेलकी पत्तीको और उससे भी अच्छा तुलसीदल होता है[६]।

नरसिंहपुराणमें फूलोंका तारतम्य बतलाया गया है। कहा गया है कि दस स्वर्ण-सुमनोंका दान करनेसे जो फल प्राप्त होता है, वह एक गूमाके फूल चढ़ानेसे प्राप्त हो जाता है। इसके बाद उन फूलोंके नाम गिनाये गये हैं, जिनमें पहलेकी अपेक्षा अगला उत्तरोत्तर हजार गुना अधिक फलप्रद होता जाता है, जैसे—गूमाके फूलसे हजार गुना बढ़कर एक खैर, हजारों खैरके फूलोंसे बढ़कर एक शमीका फूल, हजारों शमीके फूलोंसे बढ़कर एक मौलसिरीका फूल, हजारों मौलसिरी पुष्पोंसे बढ़कर एक नन्द्यावर्त, हजारों नन्द्यावर्तोंसे बढ़कर एक कनेर, हजारों कनेरके फूलोंसे बढ़कर एक सफेद कनेर, हजारों सफेद कनेरसे बढ़कर एक कुशका फूल, हजारों कुशके फूलोंसे बढ़कर वनवेला, हजारों वनवेलाके फूलोंसे एक चम्पा, हजारों चम्पाओंसे बढ़कर एक अशोक, हजारों अशोकके पुष्पोंसे बढ़कर एक माधवी, हजारों वासन्तियोंसे बढ़कर एक गोजटा, हजारों गोजटाओंके फूलोंसे बढ़कर एक मालती, हजारों मालती फूलोंसे बढ़कर एक लाल त्रिसंधि (फगुनिया), हजारों लाल त्रिसंधि फूलोंसे बढ़कर एक सफेद त्रिसंधि, हजारों सफेद त्रिसंधि फूलोंसे बढ़कर एक कुन्दका फूल, हजारों कुन्द-पुष्पोंसे बढ़कर एक कमल-फूल, हजारों कमल-पुष्पोंसे बढ़कर एक बेला और हजारों बेला-फूलोंसे बढ़कर एक चमेलीका फूल होता है[१]।

निम्नलिखित फूल भगवान्‌को लक्ष्मीकी तरह प्रिय हैं। इस बातको उन्होंने स्वयं श्रीमुखसे कहा है—

मालती, मौलसिरी, अशोक, कालीनेवारी (शेफालिका), बसंतीनेवारी (नवमल्लिका), आम्रात (आमड़ा), तगर, आस्फोत, बेल, मधुमल्लिका, जूही (यूथिका), अष्टपद, स्कन्द, कदम्ब, मधुपिंगल, पाटला, चम्पा, हृद्य, लवंग, अतिमुक्तक (माधवी), केवड़ा, कुरब, बेल, सायंकालमें फूलनेवाला श्वेत कमल (कह्लार) और अड़ूसा[१]।

कमलका फूल तो भगवान्‌को बहुत ही प्रिय है। विष्णुरहस्यमें बतलाया गया है कि कमलका एक फूल चढ़ा देनेसे करोड़ों वर्षके पापोंका भगवान् नाश कर देते हैं[२]। कमलके अनेक भेद हैं। उन भेदोंके फल भी भिन्न-भिन्न हैं। बतलाया गया है कि सौ लाल कमल चढ़ानेका फल एक श्वेत कमलके चढ़ानेसे मिल जाता है तथा लाखों श्वेत कमलोंका फल एक नीलकमलसे और करोड़ों नीलकमलोंका फल एक पद्मसे प्राप्त हो जाता है। यदि कोई भी किसी प्रकार एक भी पद्म चढ़ा दे, तो उसके लिये विष्णुपुरीकी प्राप्ति सुनिश्चित है[३]।

बलिके द्वारा पूछे जानेपर भक्तराज प्रह्लादने विष्णुके प्रिय कुछ फूलोंके नाम बतलाये हैं—‘सुवर्णजाती (जाती), शतपुष्पा (शताह्वा), चमेली (सुमनाः), कुंद,

कठचंपा (चारुपुट), बाण, चम्पा, अशोक, कनेर, जूही, पारिभद्र, पाटला, मौलसिरी, अपराजिता (गिरिशालिनी), तिलक, अड़हुल, पीले रंगके समस्त फूल (पीतक) और तगर[१]।

पुराणोंने कुछ नाम और गिनाये हैं, जो नाम पहले आ गये हैं, उनको छोड़कर शेष नाम इस प्रकार हैं—

अगस्त्य[२] आमकी मंजरी[३], मालती, बेला, जूही, (माधवी) अतिमुक्तक, यावन्ति, कुब्जई, करण्टक (पीली कटसरैया), धव (धातक), वाण (काली कटसरैया), बर्बरमल्लिका (बेलाका भेद) और अड़ूसा[४]।

विष्णुधर्मोत्तरमें बतलाया गया है कि भगवान् विष्णुकी श्वेत[१] पीले[२] फूलकी प्रियता प्रसिद्ध है, फिर भी लाल फूलोंमें दोपहरिया[३] (बन्धूक), केसर[४], कुंकुम और अड़हुलके फूल उन्हें प्रिय हैं, अतः इन्हें अर्पित करना चाहिये। लाल कनेर और बर्रे भी भगवान्‌को प्रिय हैं[५]। बर्रेका फूल पीला-लाल होता है।

इसी तरह कुछ सफेद फूलोंको वृक्षायुर्वेद लाल उगा देता है। लाल रंग होनेमात्रसे वे अप्रिय नहीं हो जाते, उन्हें भगवान्‌को अर्पण करना चाहिये[६]। इसी प्रकार कुछ सफेद फूलोंके बीच भिन्न-भिन्न वर्ण होते हैं। जैसे पारिजातके बीचमें लाल वर्ण। बीचमें भिन्न वर्ण होनेसे भी उन्हें सफेद फूल माना जाना चाहिये और वे भगवान्‌के अर्पण योग्य हैं[७]।

विष्णुधर्मोत्तरके द्वारा प्रस्तुत नये नाम ये हैं—तीसी[८], भूचम्पक[९], पुरन्ध्रि[१०], गोकर्ण[११] और नागकर्ण।

अन्तमें विष्णुधर्मोत्तरने पुष्पोंके चयनके लिये एक उपाय बतलाया है। कहा है कि जो फूल शास्त्रसे निषिद्ध न हों और गन्ध तथा रंग-रूपसे संयुक्त हों उन्हें विष्णुभगवान्‌को अर्पण करना चाहिये[१]।

विष्णुके लिये निषिद्ध फूल

विष्णु भगवान्‌पर नीचे लिखे फूलोंको चढ़ाना मना है—

आक, धतूरा, कांची, अपराजिता (गिरिकर्णिका), भटकटैया, कुरैया, सेमल, शिरीष, चिचिड़ा (कोशातकी), कैथ, लांगुली, सहिजन, कचनार, बरगद, गूलर, पाकर, पीपर और अमड़ा (कपीतन)[२]।

घरपर रोपे गये कनेर और दोपहरियाके फूलका भी निषेध है[३]।

सूर्यके अर्चनके लिये विहित पत्र-पुष्प

भविष्यपुराणमें बतलाया गया है कि सूर्यभगवान्‌को यदि एक आकका फूल

अर्पण कर दिया जाय तो सोनेकी दस अशर्फियाँ चढ़ानेका फल मिल जाता है[१]। फूलोंका तारतम्य इस प्रकार बतलाया गया है—

हजार अड़हुलके फूलोंसे बढ़कर एक कनेरका फूल होता है, हजार कनेरके फूलोंसे बढ़कर एक बिल्वपत्र, हजार बिल्वपत्रोंसे बढ़कर एक 'पद्म' (सफेद रंगसे भिन्न रंगवाला), हजारों रंगीन पद्म-पुष्पोंसे बढ़कर एक मौलसिरी, हजारों मौलसिरियोंसे बढ़कर एक कुशका फूल, हजार कुशके फूलोंसे बढ़कर एक शमीका फूल, हजार शमीके फूलोंसे बढ़कर एक नीलकमल, हजारों नील एवं रक्त कमलोंसे बढ़कर 'केसर और लाल कनेर' का फूल होता है[२]।

यदि इनके फूल न मिलें तो बदलेमें पत्ते चढ़ाये और पत्ते भी न मिलें तो इनके फल चढ़ाये[१]।

फूलकी अपेक्षा मालामें दुगुना फल प्राप्त होता है[२]।

रातमें कदम्बके फूल और मुकुरको अर्पण करे और दिनमें शेष समस्त फूल। बेला दिनमें और रातमें भी चढ़ाना चाहिये[३]।

सूर्यभगवान्‌पर चढ़ाने योग्य कुछ फूल ये हैं—बेला, मालती, काश, माधवी, पाटला, कनेर, जपा, यावन्ति, कुब्जक, कर्णिकार, पीली कटसरैया (कुरण्टक), चम्पा, रोलक, कुन्द, काली कटसरैया (वाण), बर्बरमल्लिका, अशोक, तिलक, लोध, अरूषा, कमल, मौलसिरी, अगस्त्य और पलाशके फूल तथा दूर्वा[४]।

कुछ समकक्ष पुष्प

शमीका फूल और बड़ी कटेरीका फूल एक समान माने जाते हैं। करवीरकी कोटिमें चमेली, मौलसिरी और पाटला आते हैं। श्वेत कमल और मन्दारकी श्रेणी एक है। इसी तरह नागकेसर, चम्पा, पुन्नाग और मुकुर एक समान माने जाते हैं[५]।

विहित पत्र

बेलका पत्र, शमीका पत्ता, भँगरैयाकी पत्ती, तमालपत्र, तुलसी और काली तुलसीके पत्ते तथा कमलके पत्ते सूर्यभगवान्‌की पूजामें गृहीत हैं[*]।

सूर्यके लिये निषिद्ध फूल

गुंजा (कृष्णला), धतूरा, कांची, अपराजिता (गिरिकर्णिका), भटकटैया, तगर और अमड़ा—इन्हें सूर्यपर न चढ़ाये। 'वीरमित्रोदय' ने इन्हें सूर्यपर चढ़ानेका स्पष्ट निषेध किया है, यथा—

कृष्णलोन्मत्तकं काञ्ची तथा च गिरिकर्णिका ।

न कण्टकारिपुष्पं च तथान्यद् गन्धवर्जितम् ।।
देवीनामर्कमन्दारौ सूर्यस्य तगरं तथा ।
न चाम्रातकजैः पुष्पैरर्चनीयो दिवाकरः ।।

फूलोंके चयनकी कसौटी—सभी फूलोंका नाम गिनाना कठिन है। सब फूल सब जगह मिलते भी नहीं। अतः शास्त्रने योग्य फूलोंके चुनावके लिये हमें एक कसौटी दी है कि जो फूल निषेध कोटिमें नहीं हैं और रंग-रूप तथा सुगन्धसे युक्त हैं उन सभी फूलोंको भगवान्‌को चढ़ाना चाहिये।

येषां न प्रतिषेधोऽस्ति गन्धवर्णान्वितानि च ।
तानि पुष्पाणि देयानि भानवे लोकभानवे ।।

१-तुलसीं वर्जयित्वा सर्वाण्यपि पत्रपुष्पाणि गणपतिप्रियाणि ।।

(आचारभूषण)

२-हरिताः श्वेतवर्णा वा पञ्चत्रिपत्रसंयुताः ।
दूर्वाङ्कुरा मया दत्ता एकविंशतिसम्मिताः ।।

(गणेशपुराण)

३-गणेशो लड्डुकप्रियः । (आचारेन्दु)

१-यानि पुष्पाणि चोक्तानि शङ्करस्यार्चने पुरा ।
तानि गौर्याः प्रशस्तानि त्वपामार्गो विशेषतः ।।
शिवार्चने निषिद्धानि पत्रपुष्पफलानि च ।
तानि देव्याः प्रशस्तानि अनुक्तानि विशेषतः ।।

२-नित्यं गौर्याः प्रशस्तानि रक्तपुष्पाणि सर्वदा ।
शुक्लान्यपि च सर्वाणि गन्धवन्ति स्मृतानि वै ।।

(पारिजात)

३-ऋतुकालोद्भवैः पुष्पैर्मल्लिकाजातिकुङ्कुमैः ।।
सितरक्तैश्च कुसुमैस्तथा पद्मैश्च पाण्डुरैः ।।
किंशुकैस्तगरैश्चैव किंकिरातैः सचम्पकैः ।
बकुलैश्चैव मन्दरैः कुन्दपुष्पैस्तिरीटकैः ।
करवीरार्कपुष्पैश्च शिंशपैश्चापराजितैः ।।

(आचारभूषण)

४-अर्कपुष्पविधानं तु विहितालाभे द्रष्टव्यम् देवीनामर्कमन्दाराविति निषेधात् ।

१-अर्कमन्दारनिषेधो दुर्गेतरदेवीविषयः । दुर्गापूजाधिकारे तयोः पाठात् ।

(आचारेन्दु, पृ० १५९)

२-मल्लिकामुत्पलं पुष्पं शमीं पुन्नागचम्पकम् ।
अशोकं कर्णिकारं च द्रोणपुष्पं विशेषतः ।।

(आचारेन्दु, पृ० १५९)

धत्तूरकातिरक्तैश्च बन्धूकागस्तिसम्भवैः ।
मदनैः सिन्दुवारैश्च सुरभीभिर्बकैस्तथा ।
लताभिर्ब्रह्मवृक्षस्य दूर्वाङ्कुरैः सुकोमलैः ।।
मञ्जरीभिः कुशानां च बिल्वपत्रैः सुशोभनैः ।
...... केतकीं चातिमुक्तं च बन्धूकं बहुलान्यपि ।
कर्णिकारः कदम्बश्च सिन्दुवारः समृद्धये ।
पुन्नागश्चम्पकश्चैव यूथिका वनमल्लिका ।।
तगरार्जुनमल्ली च बृहती शतपत्रिका ।।

(वीरमि०, पृ० ३१५-३१८)

विशेषः—इन श्लोकोंमें जो फूल आ चुके हैं, उनका हिंदीमें उल्लेख नहीं किया गया है ।

३-तिलकं मालती वाणस्तुलसी भृङ्गजकम् ।
तमालं शिवदुर्गार्थं निषिद्धविहितं भवेत् ।।

(भविष्यपुराण)

१-विहितप्रतिषिद्धैस्तु विहितालाभतोऽर्चयेत् ।

२-एक सुवर्ण=सोलह माशा या एक कर्ष ।

३-तपःशीलगुणोपेते विप्रे वेदस्य पारगे ।
दत्त्वा सुवर्णस्य शतं तत्फलं कुसुमस्य च ।।

(वीरमित्रोदय, पृ० २०)

४-विष्णोर्यानीह चोक्तानि पुष्पाणि च पत्रिकाः ।
केतकीपुष्पमेकं तु विना तान्यखिलान्यपि ।

शस्तान्येव सुरश्रेष्ठ शंकराराधनाय हि ।। (नारद)

१-सर्वासां पुष्पजातीनां प्रवरं नीलमुत्पलम् ।।

(वीरमित्रोदय, पूजाप्रकाश)

२-करवीरसमा ज्ञेया जातीबकुलपाटलाः ।
श्वेतमन्दारकुसुमं सितपद्मं च तत्समम् ।।
शमीपुष्पं बृहत्याश्च कुसुमं तुल्यमुच्यते ।
नागचम्पकपुन्नागौ धत्तूरकसमौ स्मृतौ ।।

३-सत्यं सत्यं पुनः सत्यं शिवं स्पृष्ट्वेदमुच्यते ।
बकपुष्पेण चैकेन शैवमर्चनमुत्तमम् ।।

(वीर० मि०, पू० प्र०)

४-'पाटला' का अर्थ 'पाढर' होता है। कुछ लोग इसका अर्थ 'गुलाब' बतलाते हैं।

१-मूलमें 'कांचनम्' पद है। अमरकोषकारने बतलाया है कि स्वर्णके जितने नाम हैं वे 'नागचम्पा' फूलके वाचक हैं। अतः 'कांचन' का अर्थ नागचम्पा होता है। —'काञ्चनाह्वयः।' (२।४।६५)

२-'...... अथ कुङ्कुमम् । काश्मीरजन्माग्निशिखं वरं बाह्लीकपीतनम् ।'

(अमरकोष २।६।१२३)

३-वीरमित्रोदय, पू० प्र०।

४-कदम्बं फल्गुपुष्पं च केतकं च शिरीषकम् ।
तिन्तिणी बकुलं कोष्ठं कपित्थं गृञ्जनं तथा ।।
बिभीतकं च कार्पासं श्रीपर्णी पत्रकण्टकम् ।
शाल्मली दाडिमीवर्ज्यं धातकी शंकरार्चने ।।
केतकी चातिमुक्तं च कुन्दो यूथी मदन्तिका ।
शिरीषसर्जबन्धूककुसुमानि विवर्जयेत् ।।

(वीरमित्रोदय, पूजाप्रकाश)

१-अत्यन्तवल्लभा सा हि शालग्रामाभिधे हरौ ।।

(पद्मपुराण)

२-मणिकाञ्चनपुष्पाणि तथा मुक्तामयानि च ।
तुलसीदलमात्रस्य कलां नार्हन्ति षोडशीम् ।।

(स्कन्दपुराण)

१-तावद्गर्जन्ति भूतानि कौस्तुभादीनि भूतले ।
यावन्न प्राप्यते कृष्णा तुलसी विष्णुवल्लभा ।। (पद्मपु०)

२-श्यामापि तुलसी विष्णोः प्रिया गौरी विशेषतः । (पद्मपु०)

३-करवीरप्रसूनं वा मल्लिका वाथ चम्पकम् ।
उत्पलं शतपत्रं वा पुष्पे चान्यतमं तु वा ।।
सुवर्णेन कृतं पुष्पं राजतं रत्नमेव वा ।
मम पादाब्जपूजायामनर्हं भवति ध्रुवम् ।। (स्कन्दपु०)

४-लिङ्गमभ्यर्चितं दृष्ट्वा प्रतिमां केशवस्य च ।
तुलसीपत्रनिकरैर्मुच्यते ब्रह्महत्यया ।। (ब्रह्मपु०)

५-त्यक्त्वा तु मालतीपुष्पं पुष्पाण्यन्यानि च प्रभुः ।
गृह्णाति तुलसीं शुष्कामपि पर्युषितां प्रभुः ।। (पद्मपु०)

६-अपामार्गदलं पुण्यं तस्माद् भृङ्गरजस्य च ।
तस्माच्च खादिरं श्रेष्ठं शमीपत्रं ततः परम् ।।
दूर्वापत्रं ततः श्रेष्ठं ततश्च कुशपत्रकम् ।
ततो दमनकं श्रेष्ठं ततो बिल्वस्य पत्रकम् ।।
बिल्वपत्रादपि हरेस्तुलसीपत्रमुत्तमम् ।। (पद्मपु०)

१. द्रोणपुष्पे तथैकस्मिन् माधवाय निवेदिते ।
दत्त्वा दश सुवर्णानि यत्फलं तदवाप्नुयात् ।।
द्रोणपुष्पसहस्रेभ्यः खादिरं वै प्रशस्यते ।
खादिरपुष्पसहस्रेभ्यः शमीपुष्पं विशिष्यते ।।
शमीपुष्पसहस्रेभ्यो बकपुष्पं विशिष्यते ।
बकपुष्पसहस्राद्धि नन्द्यावर्तो विशिष्यते ।।
नन्द्यावर्तसहस्राद्धि करवीरं विशिष्यते ।
करवीरस्य पुष्पाद्धि श्वेतं तत्पुष्पमुत्तमम् ।।
कुशपुष्पसहस्राद्धि वनमल्ली विशिष्यते ।
वनमल्लीसहस्राद्धि चाम्पकं पुष्पमुत्तमम् ।।
चाम्पकात् पुष्पसाहस्रादशोकं पुष्पमुत्तमम् ।
अशोकपुष्पसाहस्राद् वासन्तीपुष्पमुत्तमम् ।
वासन्तीपुष्पसाहस्राद् गोजटापुष्पमुत्तमम् ।।
गोजटापुष्पसाहस्रान्मालतीपुष्पमुत्तमम् ।
मालतीपुष्पसाहस्रात् त्रिसंध्यं रक्तमुत्तमम् ।।
त्रिसंध्यरक्तसाहस्रात् त्रिसंध्यश्वेतकं वरम् ।
त्रिसंध्यश्वेतकसाहस्रात् कुन्दपुष्पं विशिष्यते ।।

कुन्दपुष्पसहस्राद्धि शतपत्रं विशिष्यते ।
शतपत्रसहस्राद्धि मल्लिकापुष्पमुत्तमम् ।।
मल्लिकापुष्पसाहस्राद् जातीपुष्पं विशिष्यते ।।

(नरसिंहपुराण)

१-मालतीबकुलाशोकशेफालीनवमल्लिकाः ।
आम्रातत्तगरास्फोता मल्लिकामधुमल्लिकाः ।।
यूथिकाष्टपदं स्कन्दं कदम्बं मधुपिङ्गलम् ।
पाटला चम्पकं हृद्यं लवङ्गमतिमुक्तकम् ।।
केतकं कुरबं बिल्वं कह्लारं वासकं द्विजाः ।
पञ्चविंशतिपुष्पाणि लक्ष्मीतुल्यप्रियाणि मे ।।

(विष्णुधर्मोत्तर)

२-कमलेनैकेन देवेशं योऽर्चयेत् कमलाप्रियम् ।
वर्षायुतसहस्रस्य पापस्य कुरुते क्षयम् ।।
३-रक्तोत्पलशतेनापि यत्फलं पूजिते नृणाम् ।
श्वेतोत्पलेन चैकेन तत्फलं समवाप्नुयात् ।।
श्वेतानामेकलक्षेण यत्फलं पूजिते भवेत् ।
नीलोत्पलेन चैकेन तत्फलं समवाप्नुयात् ।।
नीलोत्पलयुतानां तु लक्षकोट्ययुतायुतैः ।
समर्चिते हृषीकेशे यत्फलं देहिनां भवेत् ।।
तत्फलं समवाप्नोति पद्मेनैकेन पूजकः ।
किमन्यैर्बहुभिः पुष्पैर्नैवेद्यैर्वान्यसाधनैः ।।
पद्मेनैकेन सम्पूज्य कृष्णं विष्णुपुरं व्रजेत् ।
अवशेनापि चैकेन पद्मेन मधुसूदनम् ।
यदा तदापि चाभ्यर्च्य नरो विष्णुपुरीं व्रजेत् ।।
१-जातीशताह्वा सुमनाः कुन्दं चारुपुटं तथा ।
बाणं च चम्पकाशोकं करवीरं च यूथिका ।।
पारिभद्रं पाटला च बकुलं गिरिशालिनी ।
तिलकं जम्बुवनजं पीतकं तगरं तथा ।।
एतानि तु प्रशस्तानि कुसुमान्यच्युतार्चने ।
सुरभीणि तथान्यानि (वर्जयित्वा तु केतकीम्) ।।

(वीरमित्रोदय, पूजाप्रकाश)

२-अगस्त्यवृक्षसम्भूतैः कुसुमैरसितैः सितैः ।

येऽर्चयन्ति हि देवेशं तैः प्राप्तं परमं पदम् ।।

(स्कन्दपु०)

३-मञ्जर्यः सहकारस्य तथा देया जनार्दने ।।

(विष्णुधर्मोत्तर)

४-मालती मल्लिका चैव यूथिका चातिमुक्तकः ।
पाटला करवीरं च जया यावन्तिरेव च ।।
कुब्जकस्तगरश्चैव कर्णिकारः करण्टकः ।
चम्पको धातकः कुन्दो वाणो बर्बरमल्लिका ।।
अशोकस्तिलकश्चम्पस्तथा चैवाऽऽरूषकः ।
अमी पुष्पाकराः सर्वे शस्ता केशवपूजने ।।

(अग्निपुराण)

१-श्वेतैः पुष्पैः समभ्यर्च्य सर्वान् कामानवाप्नुयात् ।
२-ऐश्वर्यं प्राप्नुयाल्लोके पीतैरेवं समर्चयन् ।।
३-बन्धुजीवस्य पुष्पाणि रक्तान्यपि निवेदयेत् ।
४-कुङ्कुमस्य तु पुष्पाणि बन्धुजीवस्य चाप्यथ ।

५-अतिरिक्तैर्महापुष्पैः कुसुमेः करवीरकैः ।
अर्चयित्वाच्युतं याति यत्रास्ति गरुडध्वजः ।।

६-वृक्षायुर्वेदविधिना शुक्लं रक्तं कृतं च यत् ।
तद्रक्तमपि दातव्यम् .... ।।

७-मध्येऽन्यवर्णो यस्य स्याच्छुक्लस्य कुसुमस्य तु ।
पुष्पं युक्तं तु विज्ञेयं मनोज्ञं केशवप्रियम् ।।

८-अतसीकुसुमं तथा ।

९-तथा भूचम्पकस्य च । इसमें पत्ते न रहनेपर भी जड़ते फूल निकलता है—

‘भूचम्पकः=यस्य पत्राभावेऽपि मूलात् पुष्पमुद्गच्छति ।’

(वीरमित्रोदय, पूजाप्रकाश, पृ० ५५)

१०-तथा पुरन्ध्रिपुष्पैर्यः कुर्यात् पूजां मधुद्विषः ।
११-गोकर्णनागकर्णाभ्याम् ।

१-येषां न प्रतिषेधोऽस्ति गन्धवर्णान्वितानि च ।
तानि पुष्पाणि देयानि विष्णवे प्रभविष्णवे ।।

(विष्णुधर्मोत्तर)

२-नार्कं नोन्मत्तकं काञ्चीं तथैव गिरिकर्णिकाम् ।
न कण्टकाटिकापुष्पमच्युताय निवेदयेत् ।।
कौटजं शाल्मलीपुष्पं शैरीषं च जनार्दने ।
निवेदितं भयं शोकं निःस्वतां च प्रयच्छति ।।
(विष्णुधर्मोत्तर)

कोशातिक्यर्कधत्तूरशाल्मलीगिरिकर्णिका ।
कपित्भलाङ्गुलीशिंगुकोविदारशिरीषकैः ।।
अज्ञानात् पूजयेद् विष्णुं नरो नरकमाप्नुयात् ।
....
न्यग्रोधोदुम्बरप्लक्षसपिप्पलकपीतनैः ।।
कोविदारैश्च तत्पत्रैर्नैव विष्णुं प्रपूजयेत् ।। (विष्णुरहस्य)

३-विष्णुधर्मोत्तरका एक वचन है—

करवीरस्य पुष्पाणि तथा धत्तूरकस्य च ।
कृष्णं च कुटजं चार्कं नैव देयं जनार्दने ।।

तात्पर्य यह कि करवीर, धतूर, काला कुटज तथा मदारका फूल विष्णुको नहीं चढ़ाना चाहिये। इसके विपरीत वचन इस प्रकार है—

करवीरस्य पुष्पेण रक्तेनाथ सितेन वा ।
मुचुकुन्दस्य चैकेन सम्पूज्य गरुडध्वजम् ।।

इसमें कनेर और मुचुकुन्दके फूलको विष्णुभगवान्पर चढ़ानेका विधान किया गया है। इस तरह परस्पर विरोध प्रतीत होता है। इसका समन्वय निबन्धकारोंने इस प्रकार किया है—निषेध-वचनमें जो 'करवीर' शब्द आया है उसका तात्पर्य 'गृहरोपित करवीर' है, अर्थात् घरमें रोपे गये करवीर-फूलको नहीं चढ़ाना चाहिये। इससे भिन्न कनेरोंको तो चढ़ाना ही चाहिये। इस अभिप्रायका एक वचन स्वयं विष्णुधर्मोत्तरमें मिलता है—

'न गृहे करवीरोत्थैः कुसुमैरर्चयेद्धरिम्।'

यहाँ कुछ पुष्प विहित-निषिद्ध हैं जिन्हें शास्त्रानुसार पूजनमें अन्य पुष्पोंके अभाव होनेपर चढ़ाया जा सकता है।

१-करवीरे नृपैकस्मिन्नकार्यं विनिवेदिते ।
दत्त्वा दशसुवर्णस्य निष्कस्य लभते फलम् ।।
(भविष्यपुराण)

२-जपापुष्पसहस्रेभ्यः करवीरं विशिष्यते ।
करवीरसहस्रेभ्यो बिल्वपत्रं विशिष्यते ।।
बिल्वपत्रसहस्रेभ्यः पद्ममेकं विशिष्यते ।।

वीर पद्मसहस्रेभ्यो वकपुष्पं विशिष्यते ।।
वकपुष्पसहस्रेभ्यः कुशपुष्पं विशिष्यते ।।
कुशपुष्पसहस्रेभ्यः शमीपुष्पं विशिष्यते ।।
शमीपुष्पसहस्रेभ्यो नृप नीलोत्पलं वरम् ।
रक्तोत्पलसहस्रेण नीलोत्पलशतेन च ।
रक्तैश्च करवीरैश्च यस्तु पूजयते रविम् ।। (भविष्यपुराण)

१-अलाभे सति पुष्पाणां पत्राण्यपि निवेदयेत् ।
पत्राणामप्यलाभे तु फलान्यपि निवेदयेत् ।। (भविष्यपुराण)

२-स्रग्भिश्च नृपशार्दूल तदेव द्विगुणं भवेत् । (")

३-मुकुराणि कदम्बानि रात्रौ देयानि भानवे ।
दिवा शेषाणि पुष्पाणि दिवा रात्रौ च मल्लिका ।। (")

४-मल्लिका मालती चैव दूर्वा काशोऽतिमुक्तकः ।
पाटला करवीरश्च जपा यावन्तिरेव च ।।
कुब्जकस्तगरश्चैव कर्णिकारः कुरण्टकः ।
चम्पको रोलकः कुन्दो वाणो बर्बरमल्लिकाः ।।
अशोकस्तिलको लोधस्तथा चैवाटरूषकम् ।।
शतपत्राणि चान्यानि बकुलश्च विशेषतः ।
... . अगस्तिकिंशुकौतद्वत् ।।

(वीरमित्रोदय, पूजाप्रकाश, पृ० २५७)

५-शमीपुष्पबृहत्याश्च कुसुमं तुल्यमुच्यते ।
करवीरसमा ज्ञेया जातीबकुलपाटलाः ।।
श्वेतमन्दारकुसुमं सितपद्मं च तत्समम् ।
नागचम्पकपुन्नागमुकुराश्च समाः स्मृताः ।। (")

* बिल्वपत्रं शमीपत्रं पत्रं भृङ्गरजस्य च ।
तमालपत्रं च हरे सदैव तपनप्रियम् ।।
तुलसीकालतुलसी तथा रक्तं च चन्दनम् ।
केतकी पद्मपत्रं च सद्यस्तुष्टिकरं रवेः ।।

(वीरमित्रोदय, पूजाप्रकाश पृ० २५७)

संक्षिप्त पुण्याहवाचन

यजमान—

ब्राह्मं पुण्यं महर्यच्च सृष्ट्युत्पादनकारकम् ।
वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः ।।

भो ब्राह्मणाः मम सकुटुम्बस्य सपरिवारस्य गृहे अमुककर्मणः पुण्याहं भवन्तो ब्रुवन्तु ।

ब्राह्मण—

ॐ पुण्याहम्, ॐ पुण्याहम्, ॐ पुण्याहम् ।
ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ।।

यजमान—

पृथिव्यामुद्धृतायां तु यत्कल्याणं पुरा कृतम् ।
ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः ।।

भो ब्राह्मणाः मम सकुटुम्बस्य सपरिवारस्य गृहे अमुककर्मणः कल्याणं भवन्तो ब्रुवन्तु ।

ब्राह्मण—

ॐ कल्याणम्, ॐ कल्याणम्, ॐ कल्याणम् ।

ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः । ब्रह्मराजन्याभ्याँ् शूद्राय चार्याय च स्वाय चारणाय च । प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यतामुप मादो नमतु ।

यजमान—

सागरस्य तु या ऋद्धिर्महालक्ष्म्यादिभिः कृता ।
सम्पूर्णा सुप्रभावा च तां च ऋद्धिं ब्रुवन्तु नः ।।

भो ब्राह्मणाः मम सकुटुम्बस्य सपरिवारस्य गृहे अमुककर्मणः ऋद्धिं भवन्तो ब्रुवन्तु ।

ब्राह्मण—

ॐ कर्म ऋध्यताम्, ॐ कर्म ऋध्यताम्, ॐ कर्म ऋध्यताम् ।
ॐ सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृता अभूम । दिवं पृथिव्याम्
अध्याऽरुहामाविदाम देवान्त्स्वर्ज्योतिः ।।

यजमान—

स्वस्तिस्तु याऽविनाशाख्या पुण्यकल्याणवृद्धिदा ।

विनायकप्रिया नित्यं तां च स्वस्तिं ब्रुवन्तु नः ।।

भो ब्राह्मणाः मम सकुटुम्बस्य सपरिवारस्य गृहे अमुककर्मणः स्वस्तिं भवन्तो ब्रुवन्तु ।

ब्राह्मण—

ॐ आयुष्मते स्वस्ति, ॐ आयुष्मते स्वस्ति, ॐ आयुष्मते स्वस्ति ।

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।।

यजमान—

मृकण्डसूनोरायुर्यद्ध्रुवलोमशयोस्तथा ।
आयुषा तेन संयुक्ता जीवेम शरदः शतम् ।।

ब्राह्मण—

जीवन्तु भवन्तः, जीवन्तु भवन्तः, जीवन्तु भवन्तः ।

ॐ शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ।।

यजमान—

समुद्रमथनाज्जाता जगदानन्दकारिका ।
हरिप्रिया च माङ्गल्या तां श्रियं च ब्रुवन्तु नः ।।
शिवगौरीविवाहे तु या श्रीरामे नृपात्मजे ।
धनदस्य गृहे या श्रीरस्माकं सास्तु सद्मनि ।।

ब्राह्मण—

अस्तु श्रीः, अस्तु श्रीः, अस्तु श्रीः ।

ॐ मनसः काममाकूतिं वाचः सत्यमशीय पशूनाँ् रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा ।

यजमान—

प्रजापतिर्लोकपालो धाता ब्रह्मा च देवराट् ।
भगवाञ्छाश्वतो नित्यं स नो रक्षतु सर्वतः ।।
योऽसौ प्रजापतिः पूर्वे यः करे पद्मसम्भवः ।
पद्मा वै सर्वलोकानां तन्नोऽस्तु प्रजापते ।।

—पश्चात् हाथमें जल लेकर छोड़ दे और कहे—

भगवान् प्रजापतिः प्रीयताम् ।

ब्राह्मण—

ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्त्वयममुष्य पितासावस्य पिता वयँ् स्याम पतयो रयीणाँ् स्वाहा ।।

आयुष्मते स्वस्तिमते यजमानाय दाशुषे ।
कृताः सर्वाशिषः सन्तु ऋत्विग्भिर्वेदपारगैः ।।

या स्वस्तिर्ब्रह्मणो भूता या च देवे व्यवस्थिता ।
धर्मराजस्य या पत्नी स्वस्तिः शान्तिः सदा तव ।।
देवेन्द्रस्य यथा स्वस्तिर्यथा स्वस्तिर्गुरोर्गृहे ।
एकलिंगे यथा स्वस्तिस्तथा स्वस्तिः सदा तव ।।

ॐ आयुष्मते स्वस्ति, ॐ आयुष्मते स्वस्ति, ॐ आयुष्मते स्वस्ति ।

ॐ प्रति पन्थामपद्महि स्वस्तिगामनेहसम् । येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ।

पुण्याहवाचनकर्मणः समृद्धिरस्तु ।

नित्यहोम-विधि

नित्यकर्मके पश्चात् पूर्वमुख बैठकर आसन-शुद्धिके बाद आचमन, प्राणायाम करके संकल्प करे। **ॐ अद्य** आदि देश-कालका उच्चारण कर **गोत्रः, प्रवरः, शर्मा (वर्मा/ गुप्तः/ दासः) अहं नित्यकर्मानुष्ठानसिद्धिद्वारा श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थं च नित्यहोमं करिष्ये ।**

पञ्चभूसंस्कार—संकल्प करनेके बाद वेदीके निम्नलिखित पाँच संस्कार करने चाहिये—

(१) तीन कुशोंसे वेदी अथवा ताम्रकुण्डका दक्षिणसे उत्तरकी ओर परिमार्जन करे तथा उन कुशोंको ईशान दिशामें फेंक दे **(दर्भैः परिसमुह्य)**। (२) गोबर और जलसे लीप दे **(गोमयोदकेनोपलिप्य)**। (३) स्रुवा अथवा कुशमूलसे पश्चिमसे पूर्वकी ओर प्रादेशमात्र (दस अंगुल लंबी) तीन रेखाएँ दक्षिणसे प्रारम्भ कर उत्तरकी ओर खींचे **(वज्रेणोल्लिख्य)**। (४) उल्लेखनक्रमसे दक्षिण अनामिका और अँगूठेसे रेखाओंपरसे मिट्टी निकालकर बायें हाथमें तीन बार रखकर पुनः सब मिट्टी दाहिने हाथमें रख ले और उसे उत्तरकी ओर फेंक दे **(अनामिकाङ्गुष्ठाभ्यां मृदमुद्धृत्य)**। (५) पुनः जलसे कुण्ड या स्थण्डिलको सींच दे **(उदकेनाभ्युक्ष्य)**।

इस प्रकार पञ्चभूसंस्कार करके पवित्र अग्नि अपने दक्षिणकी ओर रखे और उस अग्निसे थोड़ा क्रव्याद-अंश निकालकर नैर्ऋत्यकोणमें रख दे। पुनः सामने रखी पवित्र अग्निको कुण्ड या स्थण्डिलपर निम्न मन्त्रसे स्थापित करे—**ॐ अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे । देवाँ२ आ सादयादिह ।**

—इस मन्त्रसे अग्नि-स्थापनके पश्चात् कुशोंसे परिस्तरण करे। कुण्ड या स्थण्डिलके पूर्व उत्तराग्र तीन कुश या दूर्वा रखे। दक्षिणभागमें पूर्वाग्र तीन कुश या दूर्वा रखे। पश्चिमभागमें उत्तराग्र तीन कुश या दूर्वा रखे। उत्तरभागमें पूर्वाग्र तीन कुश या दूर्वा रखे। अग्निको बाँसकी नलीसे प्रज्वलित करे। इसके बाद अग्निका ध्यान करे।

अग्निका ध्यान—ॐ चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां२ आ विवेश ।

ॐ मुखं यः सर्वदेवानां हव्यभुक् कव्यभुक् तथा ।
पितॄणां च नमस्तस्मै विष्णवे पावकात्मने ।।

—ऐसा ध्यान करके **'ॐ अग्ने शाण्डिल्यगोत्र मेषध्वज प्राङ्मुख मम सम्मुखो भव'—**इस प्रकार प्रार्थना करके **'पावकाग्नये नमः'** इस मन्त्रसे पञ्चोपचार-पूजन करे। गन्ध, पुष्प, धूप, दीप और नैवेद्य चढ़ाये। तदनन्तर घृतमिश्रित हविष्यान्नसे अथवा घृतसे हवन करे। सम्भव हो तो घृतसे स्रुवाद्वारा अग्निके जलते अंशपर तीन आहुति दे—

१-ॐ भूः स्वाहा, इदमग्नये न मम ।
२-ॐ भुवः स्वाहा, इदं वायवे न मम ।
३-ॐ स्वः स्वाहा, इदं सूर्याय न मम ।
(१) ॐ अग्नये स्वाहा, इदमग्नये न मम ।
(२) ॐ धन्वन्तरये स्वाहा, इदं धन्वन्तरये न मम ।
(३) ॐ विश्वेभ्यो देवेभ्यः स्वाहा, इदं विश्वेभ्यो देवेभ्यो न मम ।
(४) ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम ।
(५) ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते न मम ।

—इस प्रकार गौतम महर्षिप्रोक्त पाँच आहुतियाँ देकर निम्न मन्त्रोंसे आहुतियाँ और दें—

[१] ॐ देवकृतस्यैनसोऽवयजनमसि स्वाहा, इदमग्नये न मम ।
[२] ॐ मनुष्यकृतस्यैनसोऽवयजनमसि स्वाहा, इदमग्नये न मम ।
[३] ॐ पितृकृतस्यैनसोऽवयजनमसि स्वाहा, इदमग्नये न मम ।
[४] ॐ आत्मकृतस्यैनसोऽवयजनमसि स्वाहा, इदमग्नये न मम ।
[५] ॐ एनस एनसोऽवयजनमसि स्वाहा, इदमग्नये न मम ।
[६] ॐ यच्चाहमेनो विद्वांश्चकार यच्चाविद्वाँस्तस्य सर्वस्यैनसोऽवयजनमसि स्वाहा, इदमग्नये न मम ।

—इस प्रकार होम सम्पन्न कर पञ्चोपचार—गन्ध, पुष्प, धूप, दीप तथा नैवेद्यसे अग्निकी उत्तर-पूजा करके न्यूनतापूर्तिके लिये प्रार्थना करे—

ॐ सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त ऋषयः सप्त धाम प्रियाणि । सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरा पृणस्व घृतेन स्वाहा ।। अन्तमें निम्नाङ्कित वाक्य कहकर कृत हवन-कर्म भगवान्को अर्पित करे—**अनेन नित्यहोमकर्मणा श्रीपरमेश्वरः प्रीयताम् न मम ।**

ॐ तत्सद् ब्रह्मार्पणमस्तु ।